नं० ४२४५-घ

शास्त्रदीपिकाव्याख्यामयूखमालिकाद्वितीयाध्यायः

नं० ४२४५-घ

पत्राणि ११६

पत्रे ११५८

शास्त्रदीपिकाव्याख्या सोमनाथी





सोम० १ श्रीगणेशाय नमः ॥ भावार्थाः कर्मशब्दास्तेभ्यः क्रियाप्रतीयेतैष ह्यर्थो विधीयते ॥ ॥ विनियोगप्रयुक्त्यादीनामपि यद्यपि
प्रमाणाधीनसिद्धिकत्वमस्ति तथापि प्रमाणनिरूपणानन्तरं धर्मस्वरूपविशेषस्य प्रथमं जिज्ञासितत्वात्तद्भेदनिरूपणमेव
कर्तव्यं न तु विनियोगादिनिरूपणमित्याशयेन धर्मस्वरूपविशेषस्य प्रथमजिज्ञासितत्वस्फोरणार्थं द्वितीयपति प्रथमइति
कृत्स्नस्याध्यायस्य प्रमाणनिरूपणपरत्वं न तु प्रथमपादमात्रस्येति नामधेयपादाद्येस्वेन प्रतिपादितमर्थं मनसि निधा
य कृत्स्नाध्यायस्य प्रमाणनिरूपणपरत्वविशदपतिप्रथमपाद इति द्विपाद्यां त्विति नलेकदेशिरीत्या प्रकारव्युत्पादनपर
त्वं त्रिपाद्या इति भावः चोदनापेक्षयत्प्रमाणं तद्व्युत्पादनरूपार्थैक्यात्त्रीपादीति समाससमाहारे बोध्यः सामान्यशब्दत्सनाद्यवि
धिपरत्वं तत्रश्च वाक्यशेषसामर्थ्ययोः संदिग्धार्थनिर्णयो चेत्यन्वयो बोध्यः यथाचार्थाद्वाफल्यनैकदेशत्वादिति स
त्रे संदिग्धे तु वाक्यशेषादित्यत्र संदिग्धपदानुषंगस्य पातत्रैव प्रतिपादितं ननु समस्तस्य प्रमाणनिरूपणपरत्वे सोम० १
मनुपपन्नं कर्मलक्षणा इति भाष्ये यमुपत्यय प्रयोगेन प्रकारस्यापि व्युत्पाद्यत्वप्रतीतेरित्याशंकाभाष्यस्या

पिप्रकारस्य प्रधानतयाव्युत्पादनेन तात्पर्यं किंतु समस्तेनाध्यायेन प्रमाणे व्युत्पाद्यमाने आनुषंगिकतया प्रका
रव्युत्पादनं इति न भाष्यविरोधः इत्याशयेन स्वोक्तार्थमेव भाष्यारूढं करोति एवमिति इत्ययमंशः इति इति जिज्ञासितोशइ
त्यर्थः अंशत्वे चास्य प्रथमसूत्रोपक्षिप्तप्रमाणस्वरूपसाधनादिसमुदायापेक्षया चोदनासूत्रे श्रुत्यर्थाभ्यां प्रतिपा
द्यमानप्रमाणस्वरूपोभयसमुदायापेक्षयापि वा बोध्यं एवमत्रापि एवं वृत्तमनुकीर्त्य तत एव विशेषजिज्ञासोपयो
गितया धर्मस्वरूपस्य सामान्यतस्सिद्धिमाह तद्विचारादेवेति न तु उपयोगितयैव विशेषतो निर्णयाभावमाह वेदादीति
नन्वस्तु प्रमाणनिरूपणेन सामान्यतो धर्मस्वरूपस्य ज्ञातत्वात्तद्विशेषजिज्ञासा तथापि भेदलक्षणारंभे किमायात
मित्यत आह भेदलक्षणेनेति भेदनिरूपणेन परस्परव्यावृत्तत्वावगतौ सत्यामियंति धर्मस्वरूपाणीत्यशेषधर्मस्वरू
पावगतिर्भवतीत्यर्थः ततश्च प्रमाणनिरूपणानंतरं प्रथमजिज्ञासितधर्मविशेषस्वरूपनिर्णयार्थत्वाद्भेदलक्षण
मेव प्रथममारंभणीयमित्याशयेनाह अतो भेदलक्षणमपीति ततश्च सर्वेषां प्रमाणाधीनसिद्धिकत्वाविशेषेपि शे

सो॰म॰
२

षलक्षणादौ निरूपणीयस्यार्थस्य प्रमाण्यानिरूपणाधीनजिज्ञासाविषयत्वाभावात् न तन्निरूपणमिह संगतमित्याश
येनाह काम्यस्येति नन्वेवं प्रथमसूत्रे स्वपदोपात्तधर्मस्वरूपस्यैव प्रामाण्यापेक्षयापि प्रथमं जिज्ञासितत्वात् तदर्थस्य भेद
लक्षलक्षणस्यैव प्राथम्यं स्यादत एव भाष्यकारेण को धर्मः कथंलक्षण इति प्रमाणजिज्ञासापेक्षयापि स्वरूपजिज्ञासै
व प्रथममुपात्तेत्यत आह सर्वं चेति एकस्यैव पुनःश्रुतिरविशेषादनर्थकं हि स्यादित्युक्तस्योत्पत्तिविध्यानर्थक्याक्षेदः
प्रतिपाद्यतेन त्वविप्रतिपादनेन च आनर्थक्यपरिहारेण प्रामाण्यव्युत्पादनानन्तरमेव घटते नान्यथा शेषत्वादौ तु नैवं अ
वधानादेरास्याघर्यत्वेप्यदृष्टार्थत्वपात्रानर्थक्याभावादित्यसाधारणेनापि भेदलक्षणस्य प्रमाणलक्षणापेक्षावो
ध्यान्वेवं स्मृत्यादिप्रामाण्यविचारस्य प्राथम्यं न स्यादितिशंकते नन्विति वेदार्थस्यैवेति तस्यैव सर्वत्रोदाहरणादिति भा
वः आह स्योदाहृतत्वाभावेपि न्यायसाम्यात् स्मार्तस्यापि शास्त्रविषयत्वमप्रतिहतमिति परिहरति नैवमिति अनुहतत्व सो॰म॰
मप्यसिद्धं स्मार्तादिमात्रनिष्ठविचारस्यापि दर्शनादित्याह अपि चेति द्रव्येति प्रतिग्रहादिनेव ब्राह्मणो धनमार्जयेदित्ये २

वेरूप इत्यर्थः। तत्र येति नेक्षेतोद्यन्तमादित्यमित्यादीन्नि प्रजापतिव्रतानि विचारयिष्यंत इत्यर्थः। तस्मिन्निति॥ प्राग्भु
स्वोन्नानि मुंजातत्रद द्यु खे वा मन्त्रं कुर्यादित्यादयः स्मार्तनियमास्तस्मिन् पुरुषे शिष्यमाणे जननेन जननमारभ्य प्रवर्त्तेर
न्निति। वेदाध्ययनतुल्यत्वादुपायनग्रपनमारभ्य प्रवर्त्तेरन्निति च पर्वोत्तरपक्षस्तत्राम्यां षष्ठे स्मार्तनियमाश्चिंतयि
ष्यंत इत्यर्थः। स्मार्तस्याहत्यविचार्यत्वमुदाहत्याचारप्रमाणकस्याप्युदाहरति। आचारादिति। आचारा इह स्वमारो युगुर्व
नुगमनादिषु तथा भेदनहोमादिवत्स्वनितिनिमितमात्रत्तिस्यादित्यनेनाचारप्रमाणके विचारयिष्यत इत्यर्थः। आदिशब्देनउ
दगयनपर्वपक्षाहः पुराणाहेषु दैवानि इतरेषु तु पैत्र्याणीत्यादि संग्रहः। ४ ननु स्मार्ततोदिविचारः प्रासंगिकतयाप्युपपद्य
त इत्यस्वरसादाह तथा चेति मीमांसायां धर्माख्यं विषयं प्रयोजनं च वक्तुं आद्यसूत्रं प्रवृत्तमित्यर्थः॥ तथा च एतत् द्वार्त्तिक
विरोधाद्वेदार्थमात्रस्य विषयत्वं वक्तुं न शक्यत इति भावः। यदि शंकको गुरुमतानुसारी तदा सवार्त्तिकविरोधं नानुमन्यत
इत्यनुशयेनाह तथा चेति शाबराभाष्यकाराणां तथा व्याख्यानमेव दोष इति भावः। ननु प्रथमसूत्रे अथशब्देन वेदाध्ययनानंतर्यं

सो॰म॰ ३ स्योक्तत्पात्तदनुसारेण धर्मशब्दस्य वेदार्थपरत्वेन व्याख्यानानदुपपत्तिश्च अथशब्दस्यानंतर्यमेव प्रतिपादयति वेदाध्य
यनानंतर्यं तु वेदार्थभूतधर्मजिज्ञासाबलादेव वर्णनीयं तथा च वेदाध्ययनानंतर्यं न वक्तव्यम् अध्ययनानंतर्यमप्यथश
ब्देन प्रतिपादयितुं शक्यत इति न तद्बलाद्धर्मशब्दस्य वेदार्थपरत्वेन व्याख्यानं युक्तमिति वाच्यं एवमप्याचारप्रमाणकध
र्मस्यासंग्रहापत्तेरिति चेन्नैवं स्मृत्यादीनां वेदमूलतया प्रमाणत्वेन प्रधानभूतवेदाध्ययनानंतर्ये क्लिष्टमूलप्रमाणभाव
3 स्मृत्यादिगम्यधर्मस्यावर्ज्जनाक्षमत्वादिति भावः भेदलक्षणस्य प्राथम्ये नियामकांतरमाह तत्रेति भेदपूर्वकत्वादिति तत्र सर्व
स्य प्रमाणाधीनत्वेपीत्यर्थः। ननु शब्दांतरादीनां न भेदबोधने सामर्थ्यमित्यत आह तत्रेति तथा च शब्दांतरादीनामुत्पत्तिवि
धिद्वारा भेदबोधकत्वमस्तीत्यर्थः ४ उत्पत्तिविधिरपि न साक्षाद्भेदं बोधयति किं त्वर्थादित्याह उत्पन्नस्येति अनेन उत्पत्तिपू
र्वकत्वाद्विनियोगादीनां उत्पत्तिविध्यर्थविचाररूपस्य भेदलक्षणस्य विनियोगादिविध्यर्थविचारात्मकशेषलक्षणाद्यपे रां॰म॰
क्षया प्राथम्यमावश्यकमिति नियामकांतरं सूचितं ननु प्रयाजैकादशत्वादेः संख्यांतरावरूढेष्वन्वयदर्शनान्न संख्यायाः ३

स्वविशिष्टकर्मोत्पत्तिपरत्वापादकत्वमितिकथंतस्याभेदकत्वमित्यत आह संख्यातिनिःसप्तदश प्राजापत्यानित्यत्र अने
कगुणश्रवणाद्द्वेधा हि गुणस्य भेदकत्वमिति पौर्णमास्यधिकरणोक्तस्य मारणान्यायेन गुणतः कर्मोत्पत्तिपरत्वे सति उत्पाद्यमा
नस्य कर्मणो नैकत्वं बोधयतीत्यर्थः॥ अनेन संख्यागुणयोर्भेदोपि दर्शितः॥ शब्दांतरसंज्ञयोस्तु भेदं संज्ञाधिकरणोक्तस्याम
॥ लिंगस्य क्रमप्रकरणादिसापेक्षस्यापि श्रुत्यादिभिः सह एव संख्यायागुणादिसापेक्षमात्रापि शब्दांतरादिभिः सह परिग
णनं न विरुध्यत इति द्रष्टव्यम् ननु यदि शब्दांतरादिभिः॥ भेदोस्मिन्नध्याये व्युत्पाद्यते तर्हि भावार्थाधिकरणस्य भेदव्युत्पादक
त्वाभावादत्राध्याये संगतिर्न स्यादिशंकायां त्र्योद्घाततया संगतिरिति परिहारं वक्ष्यंस्तत्रोपोद्घातत्वोपयोगित्वेनाध्यायप्र
तिपाद्यं विशदयति तदिहेति तस्मादुक्तरीत्याभेदव्युत्पादनस्यात्रैव संगतत्वादित्यर्थः॥ इहाध्याय इत्यस्यार्थः॥ ननु त्रयाणा
मध्यायार्थत्वमात्रेणाकथमुपोद्घातत्वसिद्धिरित्यत आह तत्रापूर्वस्येत्यादिना भावनाभेदेति अंशत्रयविशिष्टभावना
याः वाक्यार्थत्वेन तद्भेदस्य साक्षात्प्रतिपादयितुं शक्यत्वात् तत्प्रतिपादने सति क्रियाणां फलापवर्गित्वेन तद्भेदस्य फल

मेदंविनानुपपत्तेर्नीतरीय्यकतयाऽपूर्वभेदास्सिध्यतीत्यर्थः८ अनुनिष्पादीत्यस्यायमन्यसिद्धत्वेनात्पर्यं ननु अनाद
रणीय्यत्वेऽपूर्वसाधनत्वेनैव भावनानां धर्मत्वेन स्वरूपेणोत्तिधर्मभेदे यत्नात्तानस्यापूर्वभेदानादरे सिध्यभावादिति
तद्भेदश्चेति भावनाभेदश्चेत्यर्थः८ एवं च भावनाभेदएवाध्यापार्थः अपूर्वभेदधात्वर्थभेदौ तु तत्र फलतयागुण
तथा चान्यथासिद्धावित्यध्यायभेदशकायाअप्यनवकाश इति भावः प्रस्तुतेति॥ अनुनिष्पादिशब्देन धात्वर्थ
भेदानुनिष्पादित्वाद्भावनाभेदो विवक्षितस्तत्र धात्वर्थभेदस्य तदनुनिष्पादी यो भावनाभेद८ पूर्वापूर्वभेद८ त
योर्यो नुत्पार८ प्रस्तुतस्तत्सिध्यर्थं इत्यर्थः धात्वर्थभेदस्य भावनाभेदद्वारापूर्वभेदपर्यन्तत्वे यत्र प्रस्तोष्यते नास्तिर्थमि
तियावत् प्राभाकरोक्तोदाहरणानिराचिकीर्षुः स्वमते उदाहरणं प्रश्नपूर्वकमाह किमिहेत्यादिना अभिचरन् शत्रुव
धकामः दशापवित्रमुकूबलस्पाः पवित्रमोत्तमवनीत्यापलेवोऽक्षलक्षणां द्रष्टव्यं दशहोता चित्तिः स्रुगित्यादिर्मंत्रः चतु
र्होता पृथिवी होतेत्यादि८ उभयत्रात्मनीयार्थंक्षितीयाअदृष्टार्थमिति यद्यप्यत्र धात्वर्थस्य भावनाकरणत्वेऽमुत्पाद्यमेवंच

दृष्टार्थस्यावहननादेर्वैतुष्यादिभावनाकरणत्वमप्येतदधिकरणलक्ष्यमितितत्स्याप्युदाहरणत्वं संभवति तथापि कर
णत्वमुत्पादनस्य करणभेदनिबंधनभावनाभेदानुनिष्पाद्यपूर्वभेदे तात्पर्यमितितत्सर्वविषयीभूतापूर्वभेदस्य दृष्टा
र्थत्वाभावात तद्व्यावृत्त्यर्थमदृष्टार्थमित्युक्तं नियमादृष्टेनु न क्रियाजन्यमितितन्न तदिदमन्यत्किंचित्कर ४७ केचवार्त्तिकेस
त्यप्यवहत्यादीनां शब्दान्तरादिभिर्भेदकर्माकांक्षितदृष्टप्रयोजनपर्यवसानान्न क्रियाजन्यापूर्वान्तरोत्पत्तिः यत्तु निमा
पूर्वं निरूपितान्न तत्क्रियाजन्यं न भवतीति न तत्पाव्यपदिश्यन इति । एवं च दर्शायवित्रेणाग्रहे सत्स्मार्त्तीतिनित्यं च धूतस्य
सत्स्मार्गस्यानित्यत्वोभावसेकनिर्हरणार्थत्वानुपपत्तेर्दृष्टसंस्कारार्थत्वमेवेत्याशयेन तदुदाहृतं तु व्यगताधेयशक्ति
रूपादृष्टसंस्कारस्याप्यपूर्वत्वेन सन्मार्गाधिकरणेऽग्रंथकारेण व्यवहारादुपपन्नं तस्योदाहरणत्वमिति इष्टं प्राभाकरम
तमाह केचिदिति विरुद्धेति ननु तन्मते किंचिद्विषयत्वान्वयमादायविरुद्धत्रिकद्वयं कारणान्वयमादायपकानाद्यः कृत्यवच्छेद
द्वाराकार्यावच्छेदकत्वं हि विषयत्वेन तादृशस्य च विषयत्वस्य कारकानपायाविरोधित्वेन विध्यावृत्तिं विनान्वितामिदाना

सोम० ५

5

देवोपपदार्थकारकविशिष्टधात्वर्थप्रतीतिसंभवेनविरुद्धत्रिकद्वयाप्रसंगात्॥ न द्वितीयः यदनिमित्तान्वयो हि विरुद्धत्रि
कद्वयापत्तिप्रयोजकः विषयत्वमेव च तन्मते आभिधानिकं करणत्वं चौपादानिकमिति करणत्वान्वयस्य मदेनिमित्त
कत्वाभावात्तमादाय विरुद्धत्रिकद्वयप्रसक्त्यभावादिति चेत्तमेवं यद्यप्यवच्छेदकत्वमेव विषयत्वं तथापि तद्घटकत्वप
र्यन्तमिति वाजपेयोऽधिकरणे वरदराजोक्तेरवच्छेदकत्वरूपविषयत्वाभिधाने धात्वर्थस्यापूर्वगतत्वोक्तिसाध्यताघटकत्वस्या
भिधानमायातं घटकत्वं च कृतिसाध्यत्वे सत्यपूर्वसाधनत्वरूपमिति कृतिजन्यसाध्यमध्यस्थस्य धात्वर्थस्यापूर्वे प्रतिसा
धनतयाधीस्थत्वेन उपपदार्थकारकान्वयायोग्यतयान्विताभिधानतो विशिष्टप्रतीत्यसंभवेन धात्वर्थोद्देशेनोपपदा
र्थस्य एष्टव्यविधेयतया विरुद्धत्रिद्वयापत्तिसंभवाज्जकामाधिकारे च फलकरणत्वेनाभिसंहितस्यैव विषयत्वेनाभिधानदशा
यामेव करणत्वस्फुरणेन करणत्वस्याप्याभिधानिककल्पत्वात् करणत्वान्वयमादाय तथापि तत्र विरुद्धत्रिकद्वयापत्तिसं रांम०
भवतीति न काप्यनुपपत्तिः नामेतिनामोपपदान्यधिकारचोदनावाक्यान्येवोदाहरणमित्यर्थः ४ प्रथममधिकारचो ५

द्रनामात्रोदाहरणत्वांगिकारपूर्वकेजत्रनामोपपदत्वनियमं दूषयन्तियथपीत्यादिनापौगिकेत्तियौगिकशब्दोभाव
प्रधान । तत्तश्चकर्मणियोगेनसंभवइतिकेत्ववाक्यभेदादि युक्तमित्यर्थ । नैमित्तिकेत्तिवृत्तस्यनिवृत्तस्यनिरासेत्यत्तिनिरस्त
पुरुषस्यैवायंविधिरितिकर्तृत्वर्थत्वाभावादस्यनैमित्तिकाधिकारत्वमितिभाव । ननु चतुर्होत्रशब्दस्याज्यशब्दस्य चगुणवि
धित्वेविरुद्धत्रिकद्वयापत्त्यानामत्वमेष्टव्यमित्याशंकानिराकरोतितत्रचेतिननुतर्हि मत्वर्थलक्षणैव दोषइत्यतआह
वरंचेतिननूत्पत्तिवाक्येलिङः प्रत्ययेनप्रधानापूर्वानुवादशंकयात्रपूर्वप्रतीत्यभावेनधात्वर्थस्यकरणत्वाभावात्सा
ध्यतयाक्रियात्मनाप्रतीयमानेतस्मिन्सोमेनेतिकारकान्वयस्यमत्वर्थलक्षणांविनैवसंभवात्सोमेनयजेतेत्युत्पत्ति
वाक्येनमत्वर्थलक्षणाप्रसक्तिरित्यतआह उत्पत्तीतिअभ्यासाधिकरणेसमिधोयजतीत्यत्रगुणविशिष्टकर्मविधौमत्व
र्थलक्षणाप्रसंगात्समिच्छब्दोनगुणपरइतिनिबंधनकारेणोक्तत्वात्तथाभाकरमतेपिसोमेनयजेतेत्युत्पत्तिवाक्येपिम
त्वर्थलक्षणास्यादित्यर्थ । ननुसमिधोयजतीतिद्वितीयांतस्यसमिच्छब्दस्यसाध्यार्थकत्वादुत्पत्तौचधात्वर्थस्यसाध्यत्वे

सोम० ६६ नसाध्यस्यसाध्यांतरसंबंधाभावात्सामिद्धेतर्यागंकुर्यादितियुक्तामत्वर्थलक्षणासोमेनयजेतेत्यत्रतुनैवंत्र्जीयांतत्वादर्थचा
र्थाभ्यासाधिकरणेवरदराजीयेस्पष्टं॥ तस्मात्सोमेनयजेतेत्यत्रनमत्वर्थलक्षणाप्रसक्तिरित्यस्वरसादाहयुक्तंचैतदिति
तथापीतिप्रधानापूर्वानुवादशंकयाप्रथममपूर्वांतरप्रतीत्यभावेपिप्रधानापूर्वैककरणत्वेनावगतस्यधात्वर्थस्यप्राच्या
दीयांगोपकार्यत्वस्यिव्यर्थकल्प्यमानमुत्पत्त्यपूर्वंलिङ्ग्वाच्यतयैवकल्प्यतइतिजैरंगिकारात्त्वयममत्रतिपादितम
प्युत्पत्त्यपूर्वमप्यालिङ्गभिधीयतेतस्यचकार्यत्वेनधात्वर्थस्यप्रधानापूर्वइवकरणत्वंवक्तव्यमितिकरणस्यकरणांत
रसंबंधाभावेनविरुद्धत्रिकद्वयापत्तिर्मत्वर्थलक्षणान्यतरदोषसाम्यात्सोमपदस्यापिनामत्वमेवस्यादित्यर्थः॥ ननुपश्चाद
भिधीयमानेप्युत्पत्त्यपूर्वेधात्वर्थोविषयत्वेनैवाभिधास्यतेनकरणत्वेनेतिनविरुद्धत्रिकद्वयापत्तिरित्यतआहतत्करणा
मितिउत्पत्त्यपूर्वस्योपादानेनकल्प्यमानस्यधात्वर्थजन्यत्वेनकल्पनात्प्रथमजोधात्वर्थसाधनत्वेनावगतस्यैवतस्यलि राम० ६६
ङ्वाच्यत्वमितिकामाधिकारइवकरणत्वमादायविरुद्धत्रिकद्वयापत्तिर्वक्तुंशक्यैत्यपिप्रायः॥ क्वचिदुदाहरणेमत्वर्थ

त्वक्षणा प्रसक्तिरपि नास्तीत्याशयेनाह किं चेति अधिकारचोदनेयमिति प्रत्येकाभिप्रायेणैकवचननिर्देशः ननु भावार्था इति
सूत्रानुसारेण भावार्थ उक्ताधिकारचोदनानामेवोदाहरणत्वाद्दनयोरधिकारचोदनात्वेपि नोदाहरणत्वमित्यत आह सौर्यादि
पदमिति सौर्यादिशब्दः सास्य देवतेति विहिततद्धितान्तो देवताविशिष्टद्रव्यपरस्तत्र द्रव्यस्य साध्यत्वाभावेन विषयत्वाभावा
द्द्रव्यदेवतासंबन्धोपयोगेन साध्यत्वाद्विषयत्वं यद्यपि द्रव्यदेवतासंबन्धस्यापि यागं विनानुपपत्तेस्तस्यावश्यकत्वात्तथापि श
ब्दतः संबन्धस्यैव प्रतीतेस्तस्यैव विषयत्वं इति निबन्धनकारो मन्यत इत्यर्थः भावार्थसाध्यार्थमित्यर्थः अश्रुताधिकारस्थले
पितृपपदस्य नामधेयत्वनियमाभावमाह हिरण्यमिति विश्वजिदादिवदित्यल डुलासंविज्ञावद्रु व्रीहिरा रात्रिसत्रादि
वदित्यर्थः दुर्वर्णोस्य भ्रातृव्य इत्यर्थवादतः फलकल्पनादिति इष्टव्यं अत्र चावृत्तिर्यद्यपि चरुश्वेतमिति द्रव्यगुणाश
ब्दाविति पूर्वमप्युक्तं तथापि नियोगविषयसमर्थकपदपरिशेषार्थं पूर्वमुक्तं इदानीं तु नामधेयत्वाभावायेत्यपुन
रुक्तिः पूर्वपक्षे द्रव्यस्यादृष्टार्थत्वान्न प्रतिनिधिः सिद्धान्ते तु भावार्थत्वेन दृष्टार्थत्वात्तद्द्रव्यापचारे प्रतिनिधिर्भवतीति भाष्ये

सोम० उक्तेन तदधिकारचोदनासद्भावोपपन्नत्वे सत्येव घटते नान्यथात्र्यतो भाष्यविरुद्धं चेदमित्याह भाष्ये तिपूर्वमभ्युपगत
७ मर्थं परित्यजति न चावश्यमिति कुतोऽपूर्वमिति किंविषयमपूर्वमित्यर्थः ननु व्रीहीनवहन्तीत्यादियुक्तिङादीनां प्रधाना
पूर्वानुवादकत्वदर्शनेन तद्वदेवोत्पत्तिवाक्यगतलिङादीनामाराद्उपकारकांगवाक्यगतलिङादीनां च किं प्रधानापूर्वा
नुवादकत्वमिति शंकया प्रथममपूर्वांतराप्रतीत्या कुतोऽपूर्वमिति विचारासंभवं त्वोदाहरणत्वमित्याशंक्य परिह
रति पयपीति पश्चादिति प्रयाजोदीचांगसाहित्यार्थं कल्प्यमानस्योत्पत्त्यपूर्वस्य क्षणिकस्य चांगस्य इतरांगसाहित्येनक
रणोपकारजनकत्वानुपपत्त्या कल्प्यमानस्यांगापूर्वस्य लिङा वाच्यतये व कल्पनाद्यश्चात्तावल्लिङापूर्वं प्रतिपद्य
त इति तत्रापि विचारो युक्त इत्यर्थः नन्वपूर्वे कल्प्यमाने कर्मण एवावांतरत्वेन कल्प्यते उपपदार्थस्य कर्मविशेषणतया
भिहितत्वेन तस्य स्वातंत्र्येण ग्राहकग्रहणाभावेन व्यापारकल्पनानवकाशादेवं कर्मविषयत्वेन निश्चितत्वान्न तत्र वि राम०
नावकाश इति शंकते नन्विति उपपदार्थस्य न स्वातंत्र्येण ग्राहकग्रहणं किं तु तद्विशिष्टकर्मण एवेत्यस्यार्थस्येन तदधि ७

करणाधीनत्वादितः एवमुपपदार्थस्यापि स्वातन्त्र्येण ग्राहकग्रहणसंभवादस्ति विचारावसर इति परिहरति स्यादेव
मिति उपपदार्थविशिष्टस्य कर्मणो ग्राहकग्रहणमित्यस्याभाष्यस्य एतदधिकरणाधीनत्वस्पष्टीकरणाय तन्मन्ते प्रति
पदाधिकरणविचार्यं भावार्थाधिकरणविचार्यं च दर्शयति। किं सर्वाणीति विषयीभवन्ति विषयसमर्पकीभवन्त्यन्य
र्थ४। तत्र प्रतिपदाधिकरणसिद्धान्तमाह तत्र क्रियेतो यथाविनियोगं नियोग इति क्रियाकारकसंबंधावगमानुसारेण ए
कस्मादेवापूर्वं नतु सर्वेभ्य इति प्रातिपदाधिकरणसिद्धान्त इत्यर्थः। भावार्थाधिकरणसिद्धान्तमाह। तत्रापीति क्रियाविशे
षितस्य द्रव्यादेर्न विषयत्वं द्रव्यादि४ क्रियां प्रत्युपसर्जनतयासिद्धतया च प्रतीतस्यापूर्वं विषयत्वानुपपत्तेर्धात्वर्थेरेकफला
वच्छिन्नानेकक्रियाक्षणनिचयवाचकत्वेन धातुनान्योत्पादनानुकूलत्वेनावगतस्य धात्वर्थस्य तदन्यथानुपपत्त्या साध्य
त्वेन प्रतीतस्ते रंगिकारेण तस्यैव विषयत्वायोग्यत्वाच्च अतो भावार्थस्यैव विषयत्वमिति भावार्थाधिकरणसिद्धान्त इत्य
र्थः। एवमेतदधिकरणार्थं प्रदर्श्य तदधीनत्वमुपपदार्थविशिष्टकर्मणो ग्राहकग्रहणस्याह स्थिते चेति एतदधिकरणान्त

सोम०
८

र्वेनु उपपदार्थस्यापि द्विष्ट्यकू आह कथं ग्रहणं संभवतीत्याह असतीति अस्मिन्न्याय इति सिद्धांतद्वयन्यायस्यापि ग्रहणं तत
स्त्र प्रातिपदाधिकरणसिद्धांताभावे उभयोर्ग्रहणं भावार्थाधिकरणसिद्धांताभावे दानोपसर्जनं हिरण्यस्येति विवेकः इदमु
पलक्षणं सोमो पसर्जनो यागो यागोपसर्जनस्सोमो वेत्यपि द्रष्टव्यं एवं चोपपदार्थस्यापि ग्राहकग्रहणविषयत्वे सति हि
रण्यं ददातीत्यादेरप्युदाहरणत्वमुपपन्नमित्याह ततश्चापवर्गमपीति किंभावशब्दे स्यात्स्यादपवर्गं भुत द्रव्यगुणशब्देभ्य इति
भावार्थाधिकरणप्रवृत्तेरेकस्मादपवर्गमिति निर्णयाधीनत्वान्न दुयोद्वीतत्तयां प्रातिपदाधिकहरणं प्रकर्त्तयान्तितत्रेति नन्वप
र्वस्यावाच्यत्वात्कथमयं विचार इत्यत आह यत्त्वेतितत्राकिं सर्वाणपवर्गं कल्पनासमर्थाभिधायकान्तिनैकमिति विचारार्थ इत्यर्थः
प्रधानेति फलस्य सर्वापेक्षयाप्राधान्यात्सर्वेषां प्रधानसंबंधलोभेन सर्वेषां फलसंबंध इत्यर्थः अवैरूप्यादीति वैरूप्यं विरुद्धरूप
वत्त्वं विरुद्धत्रिकद्वयमिति यावत्तदभावादित्यर्थः एकस्यैव फलसंबंधे तु वैरूप्यं स्यादित्याह अन्यथेति ननु मत्वर्थलक्षणा अपरो सोम०
न वैरूप्यमुपरिहरमित्याशंकायां तन्हिं सैव दोष इत्याशंक्याह मत्वर्थेति सर्वेषामिति अत्रेदमवधेयं सर्वेषां समुच्चितानां न फल ८

भावनाकरणत्वासर्वेषां परस्परं संबंधेन भावनान्वयित्वयाज्योतिष्टोमेनेत्यादिविभक्त्यानैरपेक्ष्यबोधनेन च समुच्च
यासंभवात्तत्रापि विकल्पेन द्रव्यादेः क्रियानुरागं क्रियायाश्च द्रव्यसाध्यत्वामंतरेण फलसाधनत्वानुपपत्त्या एकभावनायां करण
त्वेनान्वितानां क्रियाद्रव्यादीनां अरुणैकहायनीवत्परस्पराहित्यावश्यंभावादतः स्वहितानां साधनत्वाभावेपि साधनानां समुच्च
य इति नानेकेति समुच्चयांगीकारात्तत्परमापूर्वस्यैकत्वेपि सर्वेषां तत्तत्पूर्वभेदः पूर्वपक्षेत्र्यावश्यकः स्यात्तु स चायुक्तस्तस्मा
त्प्रधानसंबंधोऽप्रयोजक इति भावः श्येनादीनामिति तामतया परिहारः भावार्थाधिकरणसापेक्षः भावार्थस्य करणत्वे
विनातन्नामत्वासिद्धेः मत्वर्थलक्षणयापरिहारस्तु तदधिकरणानापेक्षते द्रव्यादपूर्वापि क्रियावत्ताद्रव्येणेति मत्वर्थल
क्षणावश्यंभावादिति विवेकः परं चेति लक्षणापाल्लोके दृष्टत्वादिति भावः इदानीं भावार्थाधिकरणं दर्शयति पदेकमिति
यदा एकमेव पदमपूर्वं प्रतिपादकं तत्पदाकिं द्रव्यादिपदेभ्यो पूर्वं प्रतिपाद्यते उत यागनुभ्य इति विचार्यत इत्यर्थः नन्विति
न च धात्वर्थस्य करणत्वसिध्यर्थं भावार्थादपूर्वमिति नियमस्यवक्तत्वादियं शंकानुपपन्नेति वाच्यं अविशेषेणेति भाष्य

सोम० ९

दर्शनात् अनियम इत्येव पूर्वपक्ष ॥ प्रवर्त्यतां ननु द्रव्यादिभ्य एवापूर्वमिति नियमपर्यंतः पूर्वपक्षः प्रवर्तयितव्य इत्येव
मपि प्रापकत्वेन शंकाया उपपन्नत्वे ॥ वचनव्यक्तीति । यागविशेषितद्रव्यादिना फलं कुर्यादिति द्रव्यादिविशेषितया
गेन फलं कुर्यादिति चार्थद्वयबोधने वाक्यभेदापत्तेरित्यर्थः । तस्मादिति तत्र अनियमेनैव पूर्वपक्षः प्रवर्तयितव्य
इत्यर्थः । केचित् प्राभाकरा इत्यर्थः ॥ ननु पत्रवाक्यार्थानध्यवसायेनुष्ठानस्याप्यनध्यवसायो भवतीति तत्रैवाप्रामाण्यं
तत्रानध्यवसायेऽनुष्ठानस्यैव निवृत्त्यानुष्ठानपर्यंतबोधजनकत्वाभावादित्युपपक्षद्वयेपि द्रव्येणाक्रियानिर्वर्त्यपित
व्येत्यनुष्ठानस्याध्यवसितत्वात् अप्रामाण्यमितिशंकते नन्विति किमर्थमिति अनुष्ठानविशेषफलकत्वात् मीमांसायाय
इति भावः । अनुष्ठानविशेषाभावोप्यसिद्ध इत्याह अपिचेति पूर्वपक्षे द्रव्यादिभ्यो पूर्वमिति पक्ष इत्यर्थः । यागम्यामिति पक्षे
श्येनस्यैवापूर्वजनकत्वात् गुणविधित्वं तथापि गुणत्वाविवक्षया विधेयमसमर्पकत्वमात्रे तात्पर्यं बोध्यं सिद्धांत
इति भावः शब्देभ्यो पूर्वमिति पक्ष इत्यर्थः । सोमेनेति अव्यक्तासत्तु सोमस्येत्यापेन सौमिकधर्मप्राप्तेरिति भावः । द्र

सोम० ९

त्यशब्देभ्योपूर्वसत्तिनामधेयत्वाभावेभाष्यसंमतिमाह यथाहितिरेवंच पक्षद्वयेपि अनुष्ठानविशेषसद्भावेऽनध्यवसायपू
र्वपक्षदृशायामनुष्ठानस्यैकरूपत्वाध्यवसानाभाविनानमुष्ठापकत्वलक्षणमप्रामाण्यंदुर्वारमिति भावः पदीत्यादि द्रव्यगुण
शब्दाश्चपूर्वं प्रतिपादयंतीतिपक्षस्तदाद्रव्यादीनामदृष्टार्थत्वाददृष्टार्थस्य प्रतिनिध्यभावात्प्रतिनिधि ४ पदानुभावशब्देभ्यो
पूर्वमितिपक्षस्तदाद्रव्यंगुणंवाप्रतिनिधायानुष्ठातव्यमित्यर्थः एवंचेहापि प्रतिनिधानाप्रतिनिधानरूपविशेषसद्भावेनानु
ष्ठानैकरूप्याभावेनानध्यवसायपक्षेऽप्रामाण्यंस्यादितिभाव ४ न च प्रतिनिधानाप्रतिनिधानेसंदेहे प्रतिनिधिनिवृत्तावपिमु
ख्यस्थलेद्रव्येणाक्रियानिर्वर्तयितव्यात्येवंरूपानुष्ठानस्यनिश्चितत्वेनप्रामाण्यमुपपद्यतइतिवाच्यंमुख्यप्रतिनिध्योस्साम्या
नविध्यस्यत्तीय्येवक्षमाणत्वेन प्रतिनिधिस्थलस्यापिमुख्यशास्त्रतात्पर्यविषयत्वेनतात्पर्यविषयेसर्वत्रानुष्ठानफलक
त्वाभावेनाप्रामाण्यापत्तेरवर्जनीयत्वादितिभावः इदानींनिर्धारणात्मकंस्वाभिमतंपूर्वपक्षमाह किंत्वितिद्रव्यादिभ्योपूर्व
मित्यत्रहेतुमाहतएवेतितदेवोपपादयतिफलंहीतिसिद्धसाध्यसमभिव्याहारेसिद्धंसाध्यायोपदिश्यतइतिन्यायादितिभावः

सोम०
१०

तथासिद्धरूपेतत्रजदेवफलसाधनत्वेनान्वयपोग्यमित्यर्थः नसाधनेनसाध्यानत्वेनान्वयपोग्यमित्यर्थः कारिकायांफ
लशब्देनेप्सितमात्रंविवक्षितमित्याशयेनाह सामिध इति नन्वेवंविशेषेण पूर्वपक्षकरणे कथंभाष्ये अविशेषेणोत्युक्तमि
त्यतआह पत्विति शब्दत इति द्रव्यभावार्थयोरुभयोरपि स्वर्गादिरूपफलापेक्षया पदार्थान्तरस्थत्वेन शब्दतो विशेषानवगमादि
त्यर्थः। न च फलस्य भावनाद्वारैव करणसंबंधो न साक्षाद्भावनायां च धात्वर्थस्य पदश्रुत्यान्वय इत्यस्ति विशेष इति वाच्यं द्रव्य
स्यापि श्येनेनेति विभक्तिश्रुत्या विनियोगेनोभयोरपि श्रुतिविनियोज्यत्वाविशेषादिति भावः। भावनैवेति। अपूर्वद्वयकल्प
नस्य फलतत्साधनयोस्साक्षात्संबंधेप्यविशेषाद्भावनाद्वारा संबंधकथने सांनिकर्षत इति द्वितीयहेतुपश्नादनाभिप्रापे
णेति ध्येयं न चकारकारणीति अपोग्यत्वादिति भावः ननु द्रव्यस्य सिद्धरूपस्य व्यापारानुप्रवेशमन्तरेण फलोद्देशप्रवृत्तकृतिव्या
प्यत्वरूपफलभावनाकरणत्वासंभवात् क्रियापाव्यापारपापाः द्रव्यग[illegible]तकरणत्वसंपादकत्वेन दृष्टद्वारैवोपयोगः गु
णकामेष्वखादिरं वीर्यकामस्य दध्नेन्द्रियकामस्य रूपं ततो नादृष्टद्वयकल्पनाप्रसक्तिरित्यस्वरसादाह सन्निकृष्टश्चेति त्वभ

राम०
१०

10

योरपिश्रुतिविनियोज्यत्वाविशेषं परिहरति द्रव्यादितिशेषेणेति न्यूनतायां तपदमवरोऽस्ति शेषेण ८ करणमित्येतावन्मात्रं प्रती
यतेन तु भावनारूपशेषिविशेषेपि ततो गम्यते पञ्चेतेति पदमवरोऽतु प्रकृत्यंशेन धात्वर्थः प्रत्ययेन भावना उभयसमभिव्या
हारेण तु यागो भावनायां करणमिति प्रतीयते तेन शब्दद्रव्यादेः भावनाकरणत्वं भावनावाचकपदान्तरसमभिव्याहारलभ्यं
धात्वर्थस्य तु करणत्वं पदान्तरसमभिव्याहारमनपेक्ष्य प्रकृतिप्रत्ययसमभिव्याहारमात्रेणैव लक्ष्यत इति न्यूनता या श्रुतिरिह द्र
व्यस्य पद श्रुतिस्तु प्रबलेत्यर्थः इदमेव चाभिसंधाय वस्तुतः श्रुतिविनियोगेपि वाक्येनेत्युक्तमनुसाध्यरूपस्य धात्वर्थस्य क
र्थं साधनत्वमित्यतआह साध्येति न हि वाक्यार्थज्ञानदशायामसिद्धत्वमेवोपेक्षितं किंतु फलनिष्पत्तिदशायां तत्र च यागोप्यव्याह
तमिति भावः॥ ॥ ननु अपर्वं भावनायां धात्वर्थः करणमित्ययुक्तं धात्वर्थातिरिक्ताया आख्यातवाच्याया भावनाया एवा
भावादिति वैयाकरणाः शंकते कः पुनरिति ननु पचति पाकं करोति यजति यागं करोतीति सर्वत्राख्यातस्य करोतिनी विवर
णात्करोतिसमानार्थकत्वं वक्तव्यं करोतिश्च सकर्मकः तच्च कर्म त्वन्यायाद्घमेव भवति॥ नित्यं न भवनं यस्य नित्यं चापि न भूततान

सोम० तस्यक्रियमाणत्वे खपुष्पाकाशयोरिवेति वाक्योक्तेः तत्र क्र्योत्पद्यमानस्य वस्तुन उत्पत्त्यनुकूलः उत्पादकव्यापारः क
११ करोतिशब्दवाच्य इति संपन्ने करोतिसमानार्थकश्च भावयतिशब्दः भवंतं प्रेरयति भावयतीति ण्यधातोस्तत्प्रयोजको हेतु
श्चेति णिचि व्युत्पन्नस्य भावयतिशब्दस्य भावितृप्रयोजकव्यापारवाचित्वादेवं च पाकं करोतीत्यस्य पाकं भावयतीत्यर्थः।
पाकशब्दार्थश्च विक्लित्तिः ४ तथा महाभाष्ये उक्तत्वात् तत्र च तंडुलरूपकर्मगतविक्लित्तिलक्षणा व्यापार ४ पचिधातुवा
च्यस्तत्प्रयोजको देवदत्तादिरूपकर्तृव्यापार ४ प्रत्ययवाच्यस्स एव च कर्तृव्यापारः भवितुः पाकस्य प्रयोजकव्यापारत्वाद्भा
वनेत्युच्यते एवं च सर्वत्रापि कर्तृव्यापार एव भावनेति शंकते कर्तृ कर्तृव्यापार इति न विक्लित्तिः पाकशब्दार्थः किं त्वधिश्रयणादि
व्यापारनिचय इतरेतरयाकृष्णत्वे तु विक्लित्त्यसंभवात्तद्घटनेऽप्यपपत्तीति कृष्णलानां पाकविधानमनुपपन्नं स्यादेवं च कर्तृव्यापा
रस्यैव धात्वर्थत्वात्तत्र तस्य प्रत्ययवाच्यभावनात्वमेव सर्वत्रापीत्यभिप्रेत्य परिहरति नन्विति अत्र धात्वर्थाद्इत्येव पाठो युक्तः न राम०
तु धात्वनर्थादिति धात्वनर्थस्य प्रत्ययवाच्यत्वेऽपि तत्र प्रकृतधात्वर्थस्य करणत्वोपपत्त्या प्रकृतासंगतत्वापत्तेः प्रपत्नादे ११

रपिधात्वंतरार्थत्वेनेतद्द्वयराग्रस्तस्यपुनरपिशंकिंतुमनर्हत्वेनाग्रिमग्रंथासामंजस्यप्रसंगाच्चेतिध्येयंननुत्त्यस्त्व
धिमन्त्रयत्नादेः पचत्यादिधात्वर्थत्वेतथापितदतिरिक्तःप्रयत्नाख्यःकर्तृव्यापारः।तत्त्वपदवाच्यभावनास्तितिशंकते
प्रयत्नइतिनयइतिनचलक्षणाशंकनीयादेवदत्तोगच्छतीत्याद्यपेक्षयाप्रतीतिवैलक्षण्याभावादितिभावःस्पंदइति
यद्यपिगतौचलनमितिप्रागुक्तत्वेनस्पंदस्यापिगमिधात्वर्थत्वेनधात्वर्थातिरिक्तत्वंनास्तितथापिगमेरुत्तरसंयोग
एवार्थइतिमतमाश्रित्येदमितिध्येयंउदासिनत्वेतिउदासिनत्वंनामाकुर्वद्रूपत्वंतद्विच्छेदःकुर्वद्रूपत्वमितियावत्श
ब्दादित्थितिनतत्रशब्दोभिदधातीत्यादिप्रयोगोनस्यादितिभावः नहीतियद्यपिउदासिनत्वविच्छेदशब्दार्थःकुर्वद्रु
पत्वंतत्त्वान्योत्पादनानुकूलत्वंनतत्रशब्दोभिदधातीत्यत्रशब्दगतार्थाभिधानशक्तेरर्थप्रतीतिलक्षणाभावोत्पा
दनानुकूलत्वेनाख्यातप्रतिपाद्यत्वसंभवान्नोक्तदोषावकाशः अन्यथासिद्धांतेप्यगतेस्तथापियस्मिन्सतिकर्तुरु
दासीनत्वविच्छेदव्यवहारोदृश्यतेतादृशोधर्मउदासीनत्वविच्छेदशब्दार्थस्तदेवचकुर्वद्रूपत्वंसचधर्मःक्रियाविभागा

सोम० न्यतरहेतुप्रयत्नस्यदान्यतरएवतद्धन्येवकुर्वद्रूपत्वव्यवहारदर्शनात्तन्न ४ एवंचोदासीनत्वस्यविच्छेदोपस्मात्सो
१२ यमुदासीनत्वविच्छेदइतिबहुव्रीहिमभिप्रेत्यशब्दादिष्वभावउक्तइतिध्येयंइष्टापत्तिशंकापामाचार्यवचनविरोधमा
हतत्रेति अभिधाशब्दस्यकर्त्तरिकरणेवाव्युत्पत्तौअभिधायाःशब्दस्यभावनेत्यर्थः भावेकर्मणिवाव्युत्पत्तौअभिधात्मि
12 काभावनेत्यर्थः अर्थात्मेति अर्थः पुरुषार्थआत्माभाव्यत्वेननिरूपकोयस्यसेत्यर्थः अभिधाशब्दस्यशब्दपरत्वमे
वाश्रित्यव्यापारव्यापारिणोरनतिभेदात्ऽभिधात्मिकाशब्दात्मिकाभावनाअभिधाभावनात्प्याजव्याहत्यर्थमुपात्तम
र्थात्मेतिविशेषणमित्यर्थःस्वरूपाभावनात्रअर्थात्मभावनेत्यप्याहुः अत्रसिद्धकर्तृक्रियावाचिन्याख्यातप्रत्ययेसतिसामा
नाधिकरण्येनकरोत्यर्थोवधार्यतइतिपचतियजतीत्यादिषुयत्रकर्तुस्सिद्धत्वंतत्रैवाख्यातेभावनावाकत्वमितितन्नया
अस्त्यादावपिकर्त्रंशभाव्येस्त्येवहिभावनाअन्यत्राशेषभावात्तुनतथासाप्रतीयतइत्यसिद्धकर्तृकेअस्तिभवतीत्यादा सोम०
वपिभावनास्तीतिपक्षद्वयमुक्तंतत्राद्येपक्षेसर्वशब्दस्यसिद्धकर्तृस्थलीयाख्यातमात्रेसंकोचोबोध्यःशब्दगतव्यापारस्य १२

भावनात्वानंगिकारे ऽपि धात्वर्थभावनामिति शब्दगतव्यापारस्य भावनात्वोक्तिः लिङादपश्चाहुरिति आख्यातप्रयोगः तत्रत्या-
ख्यातस्य भावनावाचकत्वाभावे ऽर्थभावनायास्सर्वाख्यातगम्या। त्वोक्तिश्चाविरुध्येतेत्यर्थः न च शब्दादिष्वर्थभावनानंगिका-
रे शब्दभावनोक्तिविरोधो न हि यत्नत्वेन वक्तुमुचितमिति वाच्यं लिङाविधनइत्याद्याख्यातप्रयोगे लिङादिगतार्थभावनाप्रती-
यते न च तत्रान्यार्थभावनासंभवतीति लिङादिगतशक्तिरूपा शब्दभावनैव तत्रार्थभावनात्वेन प्रतीयत इति वक्तुं युक्तेन
तदुक्तिविरोधस्य दोषत्वसंभवात् धात्वर्थव्यतिरेकेणोत्तिधात्वर्थभावनयोर्नात्यन्तभेदः किंतु सामान्यविशेषभावमात्रेणभेद
इत्यर्थः सर्वसामान्यरूपेणान्येत्युक्ते जातिव्यक्तिभावेनान्यत्वमसंभवाद्वर्त्तेपि जमाहविवृत्तं चेति धात्वर्थो धातुनापागत्वा ग-
त्वादिविशेषरूपेणाभिधीयते आख्यातेन तु आन्योन्त्पादानुकूलात्मनासामान्यरूपेणाभिधीयते एवं धात्वाख्याताभ्यां कु-
र्यमानात्सामान्यविशेषलक्षणरूपभेदात् धात्वर्थस्य द्वेधावाकार्यन्वयः तथा चान्योन्त्पादानुकूलात्माभावना किं कुतः
प्रद्युष्यते न कुत्रापीत्यर्थः [illegible] तत्ररूपभेदादिके विशेषशब्दपश्लोकद्वयं व्याचष्टे एतदुक्तमिति अ

सोम० क्रियात्मकं कारकान्वयायोग्यमित्यर्थः सिद्धस्वभावं अव्यापारात्मकमित्यर्थः सामान्यरूपत्वार्थं सर्वधात्वर्थानुयायीत्यु
१३ क्तं भावनात्वसिध्यर्थं करोतिप्रत्ययवेद्यमिति करोतीति यः प्रत्ययस्तद्वेद्यमित्यर्थः करोतेर्भावयति पर्यायत्वस्य पूर्वमेवोक्त
त्वात् करोतिप्रत्ययवेद्यत्वे भावनात्वसिद्धिरिष्टा व्याकरणादिकान्वययोग्यतासिध्यर्थं क्रियात्मकमित्युक्तं साध्यस्वरूपं
पूर्वापरीभूतानेकव्यापारसमुदायात्मकं अन्योत्पादनानुकूलात्मकमिति भावना शरीरमेवोक्तं तत्र करोतिप्रत्ययवे
द्यत्वे सर्वधात्वर्थानुयायित्वे चानुभवं प्रमाणयति तथा हीति प्रत्ययमनुभवन्तीति अपं करोतीति प्रत्ययस्य विषयी
भवन्तीत्यर्थः तथैव वक्ष्ये अनुभवतीत्युक्त्वा करोमीति तद्यथापि प्रत्ययः प्रमाणमिति सूचितं करोतिप्रत्ययवेद्यरूपस्य अ
न्योत्पादनानुकूलस्वभावत्वमपि अनुभवसिद्धमित्याह तच्चेति करोतेरुत्पादनार्थकस्य सकर्मकत्वादिति भावः। एतावता
भावना यां किमायातमित्यत आह तदेव चेति भवितुः भवनस्योत्पत्तेः कर्तुरुत्पत्तुः ओदनादेर्यः प्रयोजको देवदत्तादिस्तस्य यो रामं०
व्यापार ४ ओदनोत्पत्त्यनुकूलस्तत्वादित्यर्थः भवतेः ण्यन्तादुत्पन्नस्य भावनाशब्दस्य भवितुः प्रयोजकव्यापारवाचित्वादित्यर्थः १३

खा

एवंधात्वर्थातिरिक्तंभावनाख्यरूपंप्रसाध्यतस्याख्यातवाच्यत्वमाहतच्चेतिपाकादौपाकःस्यागइत्यादावित्यर्थःनस्वरूपेणेतिप
त्वादिनारूपेणप्रतिपादितस्यकर्मकांक्षाविरहेणप्रस्तुतविरोधित्वादितिभावःतत्स्वैर्तिनचकरोतिप्रत्ययवेद्यंभावनारूप
मितिपूर्वमुक्तत्वात्करोतेश्चपत्नवाचित्वेनतस्यैवभावनात्वमुचितंनसर्वधात्वर्थानामितिवाच्यंऽल्लंबकरिंव्रीहिरित्यादा
वचेतनेपिप्रयुज्यमानस्यकृञःपलार्थत्वानुपपत्तेःकिंचभावपतिकरोत्योःपर्यायत्वादपिनप्रयत्नःकरोत्यर्थस्त
थात्वेशब्दभावनायांभावपतिप्रयोगानुपपत्तेःअतएवयताप्रयत्नइतिवत्दुःकृञ्प्रयत्नइतिनस्यात्किंतुकरणा
इत्येवस्यात्तस्मात्करणप्रयत्नादन्यदेवकरोत्यर्थःएवंचउक्तरीत्याप्रयत्नमात्रस्यभावनात्वाभावेनरथादेःप्रय
त्नाभावेपिरथोगच्छतीत्यादिप्रयोगस्यस्वरसतएवोपपत्तेस्तन्निर्वाहायन्यायसुधाकारस्यदृश्याक्लेशानुभवइतिध्येयम
न्वस्तुधात्वर्थातिरिक्ताभावनातथापिलोकेपचतेपाकंकरोतीतिविवरणात्तत्रधात्वर्थस्यकर्मत्वमेवकरणत्वंतथाचकथ
मस्मिन्नधिकरणेधात्वर्थस्यकरणत्वंव्युत्पाद्यतइत्याशंकान्निरसितुंधात्वर्थस्यभावनायांद्वैधान्वयमुपपादयतितस्मिंश्चे

सोम° १४

त्ति पाकेनौदनमिति तत्तश्च द्वैविध्यमपि लोकसिद्धमेवेति भावः धात्वर्थस्य कर्मत्वे कीदृशव्यापारो भावनाकरणत्वे च कीदृश इत्या
कांक्षायां क्रमेणाह तद्यदेति यागं करोति यागं भावयतीत्येवं यागस्य भाव्यत्वेन प्रतीतेस्तन्निष्पादानुकूलव्यापारस्यैव भावना
त्वौचित्याद्यागोत्पत्त्यनुकूलः प्रयत्नसंकल्पादिरेव तत्र यागकर्मकभावनात्वेन प्रतीयत इत्यर्थः यागकृतिरित्येवंरूपे पोति
यागोत्पादनानुकूलव्यापारत्वलक्षणसामान्यरूपेणेत्यर्थः इदं च यागस्य कर्मत्वं यागानुवादेन गुणविधिषु द्रष्टव्यं विधि
वशादिति विधिः प्रवर्तनात्मकशब्दभावना तद्वशात्करणत्वेनान्वय इत्यर्थः। पुरुषाभिलषितफलस्य भाव्यत्वं विना पुरुषस्य
प्रवर्तयितुमशक्यत्वेन प्रवर्तनात्मकविधिसंबन्धवशादर्थभावनायां पुरुषार्थस्य स्वर्गादेर्भाव्यत्वे सति धात्वर्थस्य करणत्वमे
व परिशिष्यत इति भावः ननु स्वर्गस्य साक्षात्कृतिव्याप्यत्वाभावात्स्वर्गकृतिरपि यागजननानुकूलकृतिरेवेति यागस्यापि तत्
त्र कर्मत्वमेव न करणत्वमित्यत आह आह अत इति ततश्च यागोत्पत्त्यनुकूलकृत्यपेक्षया स्वर्गोत्पत्त्यनुकूलकृतेरन्यत्वा राम° १४
त्तत्र यागस्य करणत्वं संभवतीति भावः प्रमाणान्तरं च दृश्यमाणं प्रयाजादिशास्त्ररूपमर्थापत्तिरूपं च द्रष्टव्यं ननु यागस्य करणत्वे या

येनस्वर्गंकुर्यादित्यर्थोभवतितत्तावत्ताकथंफलसाधनावस्थयागस्योत्पादककृतिःस्वर्गकृतिरुच्यतेकथंवाविशेषरूपस्यास्पर्श
नमित्याकांक्षायामुपपादयतियागेनेतिफलसाधनावस्थयागसंपादनंविनायागात्स्वर्गासिद्धेर्यागेनस्वर्गंकुर्यादित्यस्य
यादृशव्यापारैर्येनप्रकारेणोपेतेयागेनुष्ठितेयागात्फलंभवतितथाजातादृशव्यापारोपेतयायागानुष्ठानमेवानर्थइत्यर्थः०
व्यापारेतिव्यापारविशेषाधीनोपकारात्मकोत्यर्थःअग्न्याधानेतिअत्रकोज्ञोव्यापारइत्यपेक्षितोव्यापारविशेषोग्न्
याधानादि४कथंव्यापारितव्यमित्यपेक्षितोव्यापारप्रकारस्तुअग्न्याधानादिजन्यदृष्टादृष्टोपकारसंपादनरूपइ
तिविवेकःननुयागस्वरूपोत्पत्त्यनुपयोगिनामवघातादीनांकथंस्वर्गकृतिरित्यनेनरूपेणाग्रहणमित्याशंकायांमाग
निष्पादनस्यैवस्वर्गकृत्यंतर्गतत्वात्तदर्थानामवघातादीनांस्वर्गकृतित्वंनानुपपन्नमित्याशयेनाहयागस्वरूपस्येतिप्र
पंचःसामान्यरूपेणस्वर्गोत्पादानुकूलात्मनाप्रतीतायाःफलभावनायाविशेषरूपीणीत्यर्थःनन्वेवंयागस्यकरणत्वंनस्या
न्नतथाहिनतावत्तद्यागस्वरूपोत्पत्त्यनुकूलव्यापारेयागस्यकरणत्वंसंभवतिस्वोत्पादकेस्वस्यकरणत्वासंभवान्नापिप्रयाजा

दिव्यापारेप्रयाजादिस्वरूपोत्पत्तौतदीयद्रव्यदेवतादेरेवकरणत्वान्नापिप्रयाजादिजन्योपकारेप्रयाजादेरेवकरणत्वेनयागस्य
करणत्वाभावादित्यतआहतेनचव्यापारेणेतिनहियागत्वेनयागस्यकरणत्वेनवातत्रव्यापाराणांप्रयाजत्वादिप्राति
स्विकरूपेणयागकरणान्वयःयेनोक्तदोषस्यात्किंतुफलसाधनत्वावच्छेदकत्वेनरूपेणयागस्यकरणत्वंस्वर्गकृतित्वरूपेण
चव्यापा[illegible]रनिचयस्ययागकरणकत्वान्वयःएवंचयागस्यस्वर्गसाधनत्वावच्छेदकसंपन्नावेवसाकृतिस्वर्गकृतिभां
वतिनान्यथेतियुक्तंयागस्यकरणत्वमितिभावःएवंचस्वर्गकृतोयागकरणमित्युक्तेविवक्षितविवेकेनसविशेषणोहीत्या
यात्स्वर्गनिष्पन्नोयागःकरणमितिसंपन्नमित्याहुःननुतेनैवव्यापारेणफलसाधनात्मनायदिसंपद्यतेतर्हितत्साध्यए
वस्यान्नतत्करणमित्याशंक्यएतादृशफलसाधनात्मनासाध्यत्वेनकरणत्वविरोधिकिंत्वनुकूलमेवेत्याशयेनाहएतदेवेति
फलसाधनात्मनानिष्पत्तेःकरणत्वविरोधित्वेपरशोरपिकरणत्वंनस्यादित्याशयेनदृष्टान्तमाहपरशोरितिअयंभावःप्रया
जत्वादितत्तद्रूपेणप्रयाजादिव्यापारनिचयैःफलसाधनात्मनासंपद्यमानस्ययागस्यनतत्तद्रूपविशिष्टव्यापारेषुकरण

चयेत्तोक्तविरोधस्यात्किंतु प्रातिस्विकरूपविशिष्टप्रयाजादिव्यापारनिचयेन फलसाधनात्मनासंपत्तिः न यासंपन्नस्य याग
स्य तत्स्यैव प्रयाजादिव्यापारनिचयस्य पतत्स्वर्गोत्पादनानुकूलत्वरूपं स्वर्गकत्तृत्वं तदुपपन्नेतस्मिंश्च व्यापारे करणत्व
मितिन काप्यनुपपत्तिरिति धात्वर्थसामान्यमेव भावनास्यादिति शंकितुः किं सर्वत्र धात्वर्थसामान्यस्यैकरूपत्वाद्ध्रुवमारोप
धात्वर्थभेदाद्भावनाभेदो नस्यादिति तात्पर्यं उत कथ्यमानाद्रूपभेदाद्विधा धात्वर्थसंग तिरित्यादिवाक्यस्वारस्याद्यजेनेत्या
दौ यागस्यैवान्योत्पादनानुकूलत्वात्मनाभावनात्वमुचितं तत्र त्वपाकिमिति प्रक्रान्त्यर्थ यागव्यतिरिक्तप्रयाजादिव्यापारस्य
भावनात्वमुच्यत इति अथ आह विलक्षणामिति कथं तर्हि धात्वर्थसामान्यरूपतोक्तिरित्यत आह भिन्नेष्विति अन्योत्पाद
नुकूलत्वरूपानुगतधर्ममादाय तत्र धात्वव्यवहार इति भावः द्वितीये आह अपं चेति यजेतेत्यत्र यागस्यैवान्योत्पादनानुकूल
त्मनाभावनात्वे यागानुवादेन गुणविधिषु यागस्य कर्मत्वं न स्यात् यागोत्पादनानुकूलव्यापारो हि यागकर्मको भवति न
च याग एव यागोत्पादनानुकूलव्यापारः तस्मान्न गुणविधिषु कर्मत्वसंभवः एवं तत्र यागस्य यागोत्पादनानुकूलत्वा

भावेन यागस्य करणत्वेस्थलेपि स्वर्गोत्पादनानुकूलकृतेर्वस्तुतो यागत्वैर्भेदाभावात् करणत्वं चमस्यादिति यजेतेत्य
त्र यागव्यतिरिक्तैव भावनास्वीकार्येति भावः एवं द्विधा धात्वर्थसंगतिरित्यस्यैकस्यैव धात्वर्थस्य यजेतेति प्रकृत्यर्थभ
तस्य यागात्मना भावनात्मना च प्रतीतिरिति नार्थः किं तु यजेतेत्यत्र प्रकृतिलक्षणधात्वर्थो यागो विशेषरूपेण संबंध्य
ते प्रयत्नसंकल्पादिधात्वंतरार्थस्तु प्रत्ययार्थः सामान्यरूपेण संबंध्यत इत्यर्थः तथा च धात्वंतरार्थस्य प्रकृतधात्वर्थस्य
च धात्वर्थत्वेनैकत्वमभिप्रेत्य द्विधा धात्वर्थसंगतिरित्युक्तमिति पयादनीय्यन्तत्वकृतौ तदर्थसंबंधिकृतिरूपेणोत्प
र्थः न यजिरे वेति नैव यजिरित्यर्थः नानिष्टमिति धात्वंताभिधेये प्रकृतधात्वर्थस्य कर्मकरणत्वसंभवेन धात्वंतरार्थत्वस्याविरोधित्वा
भावादिति भावः प्रसक्तानाधिकरणसिद्धांतमुपसंहरति नन्वेतिसन्नार्थस्तु भावार्थाः प्रत्ययेन भावनाप्रतिपादकाः प्रकृत्या कर्मव
चना येशब्दास्तेभ्योऽपूर्वं प्रतीयतेति पक्षाभावार्थाभावनाप्रयोजनकाः ये कर्मशब्दाः धात्वर्थास्तेभ्योऽपूर्वं प्रतीयते न एव यहि-
धात्वर्थः पदश्रुत्याभावनाकरणत्वेन विधीयत इति प्रयोजनं प्रतिनिधाना प्रतिनिधानादिरूपं प्रायग्रंथकारेणोवदर्शितं ननु

पूर्वपक्षेपिप्रक्रांतस्यकर्मणोसमाप्तिदोषपरिहारार्थमवश्यसमापनीयत्वेन प्रतिनिधानमावश्यकमितिप्रागुक्तंप्रयोज
नमनुपपन्नमितिचेन्नस्यंतथापिपूर्वपक्षेसदृशमसदृशंवायत्किंचिदुपादायकर्मसमापनीयंनतुसदृशमेवयेनकेनचि
त्समाप्तिसिद्धेः नचयत्किंचिद्द्रव्यप्रतिनिधिरितिवक्तुंशक्यंविसदृशत्वेनद्रव्यादेवापूर्वमितिपूर्वपक्षेमुख्यद्रव्यंफलार्थक
र्मसमाप्त्यर्थंउपादीयमानंयत्किंचिद्द्रव्यंतुतत्प्रक्रांतासमाप्तिदोषपरिहारमात्रार्थमितिफलभेदाच्चतस्मादुपपन्नंप्रयो
जनमिति॥ ॥चोदनापुनरारंभः॥ ॥पूर्वाक्षेपात्संगतिरित्यभिप्रेत्याह दर्शेतियागस्यस्वर्गसाधनत्वस्यश्रुतस्यान्यथा
नुपपत्त्यापूर्वकल्पनइतिश्रुतार्थापत्तिरपूर्वेमानमितिसिद्धांतीमन्यतेनदयुक्तंकल्प्यमानस्यापूर्वस्यसाधनत्वविरोधि
तयानुपपादकत्वासंभवादित्यभिप्रायेणश्लोकंव्याचष्टे वस्त्वंतरंहीतिस्वर्गयागयोरेवेतिएवकारेणामध्येवस्त्वंत
रंव्यवच्छिद्यतेतेनतत्स्वसाधनत्वबोधकशास्त्रेणाव्यवकस्याधानस्यैवबोधनान्मध्येवस्त्वंतरस्वीकारेतद्विरोधस्यादितिभावः
नन्वव्यवहितसाधनत्वासंभवाद्[illegible]स्त्वंतरव्यवधानमवश्यमंगीकार्यमित्याशयेनशंकतेकथमितिव्यवहितस्यकुलाल

पित्त्वदन्यथासिद्धत्वान्न साधनत्वमिति साधने सर्वमव्यवहितमेव वाच्यं तत्तश्चापूर्वकल्पने साधनत्वं व्याहन्येतैवेत्या
शयेन परिहरति प्रति ब्रूयादिति ननुक्त्वापूर्वस्य व्यवधायकत्वाभावान्नोक्तदोष इति शाकते यागस्यैवेति शक्तिरिति यागस्य
यास्वर्गजननानुकूला शक्तिः सैवापूर्वं तन्नत्र्याः शक्तेः स्वयं साधनत्वाभावेन यागसाधनताव्यवधायकत्वं नास्ति शक्तेः स
त्त्वा वा तत्र यागस्य साधनत्वमप्युपपद्यत इति भावः व्यापार इति नहि स्वांगस्य व्यवधायकमिति न्यायाद्व्यापारोपि न व्यवधा
यकमिति न्यायाद्व्यापारोपि न व्यवधायक इति भावः कथं न हि क्षणिकस्य स्वाधनत्वमित्यपेक्षायामाह तस्मादिति कृत
यागस्य पुरुषस्य स्वर्ग इति कल्पनया विनष्टस्यापि साधनत्वमुपपादनीयमिति भावः॥ स एव वेति स्वस्वरूपेणावस्था
नस्य वा अयोग्यत्वस्य वा कल्पनं नान्नानुपलब्धिर्बाध इति भावः। यदुक्तं शास्त्रप्रामाण्यादिति नष्टस्यापि फलजनकत्वं क्षणि
कस्यापि स्थायित्वं वा कल्प्यमिति तन्निरासपूर्वकं श्लोकं व्याचष्टे न देव हीति व्यापारद्वाराकार्यजनकपूर्वानुभव घटपाव
न कृष्यध्ययनादिष्वाचार्यपर्ये माहा ऽन्यारख्यावस्वन्तरस्येति कृत यागस्य न स्वर्गसंभव पुरुषे यागजनितविशेषं विना कृतया

गपुरुषस्याकृतयागपुरुषापेक्षयांगवैलक्षण्यापाभावादितिभावः। व्यवधिर्व्यवधानं ज्वालायाः प्रत्यक्षतयाशक्तित्वाशं
भवात्व्यापारमात्रदृष्टान्तत्वमित्याहुः कार्यानुमेयेति कार्यबलात्कल्प्यमाना शक्तिर्यया कार्यं निर्वहतीति न यागकल्पनाया इह च
शक्तेरात्मनिष्ठत्वयैव कार्यनिर्वाहत्वमित्यात्मनिष्ठैव यागस्य शक्तिः कल्प्यत इति न विरोध इत्यर्थः ॥ एतावदेवेति ननु व्यापारेणा
स्सत्वमप्यवान्तरव्यापारत्वे प्रयोजकमित्येवकारार्थः अंगानां चेति अनेनांगवाक्यान्यप्युदाहरणानीति सूचितं ननु फलसाध
नत्वनिर्वाहार्थमपूर्वकल्पनेत्युक्तं तद्यासति॰ एकेनैवापूर्वेण तन्निर्वाहोपपत्तेरुत्पत्त्यपूर्वादिरूपनानापूर्वकल्पनायास्त्वदभि
मतायाश्चासिद्धेरित्याशंकायां तत्र दपूर्वकल्पनाप्रकारमाह एषेति फलापूर्वात्मकपरमापूर्वकल्पनाप्रकारमुक्त्वात्र उत्पत्त्यपूर्व
कल्पनाप्रकारमाह कथमपूर्वमितीति अपूर्वकरणस्यालौकिकत्वेन कथमपूर्वा कर्त्तव्यमितीति तत्प्रकारजिज्ञासा भवतीति भावः वि
षयीकृतस्योपकृतस्य स्वरूपेणासाक्षात्विनश्वरस्य यागस्य स्वरूपेणोद्दीच्यांगोपकार्यत्वाभावादुत्पत्त्यपूर्वं परिकल्प्यत इत्य
र्थः न चोत्पत्त्यपूर्वमेव अंगोपकृतं स्वर्गसाधनमस्तु किं परमापूर्वेणेति। वाच्यं यागस्वर्गयोस्साध्यसाधनभावनिर्धारणानन्तर।

सोम०
१८
18

हिकथंभावाकांक्षाभवतिननुप्रथमंतन्निर्धारणाच्चयागस्यविनश्यत्वेनापूर्वकल्पनानंतरमेवनिवृत्तेर्भवतीतिप्रथमतःफलाप
र्वमेवकल्प्यमित्यपूर्वद्वयकल्पनावश्यंभावात् अतएवसप्तमाद्यतंत्ररत्नेप्यपूर्वकृतेरेवकथंभावाकांक्षानस्वर्गकृतेरित्येवम
पूर्वार्थत्वंधर्माणामुपपादितमुपपद्यतइतिध्येयं॥एवंत्वसाधारणेनपरमापूर्वोत्पत्त्यपूर्वकल्पनामुक्त्वादर्शपूर्णमासयोस
मुदायापूर्वद्वयस्याधिकस्यकल्पनामाहदर्शेतिदर्शपूर्णमासाभ्यांयजेतेतिदर्शपूर्णमासशब्देनसाहित्यबोधनात् परस्परसहि
तस्यसमुदायद्वयस्यपरमापूर्वजनकत्वंप्रतीयतेपक्षद्वयवर्तिनोश्चसमुदाययोःस्वतस्साहित्यासंभवान्निर्वाहार्थंसमुदाया
पूर्वद्वयंकल्पनीयमित्यर्थः।प्रतीयतेसचानुपपन्नःआग्नेयादिवाक्येषूत्पन्नानांफलाकांक्षायांदर्शपूर्णमासवाक्येनफलसंबं
धोबोध्यतेतत्रचाग्नेयादवयवस्समुदायिनएवोत्पन्नानांसमुदायइतिदर्शपूर्णमासवाक्येनसमुदायमुखेनसमुदायिनामेवफलज
नकत्वंबोध्यतइतिवक्तव्यत्वेनसमुदाययोस्तज्जनकत्वाभावात् पौर्णमास्यधिकरणवार्त्तिकेदर्शपूर्णमासशब्दयोस्समुदा रांम०
यिपरत्वस्यप्रपंचेनोपपादितत्वाच्चेतितस्मादन्यथावर्ण्यतेपौर्णमास्यायजेतामावास्यायाममावास्ययायजेतेतिपृथक्करणा १८

विभक्तिनिर्देशात्तत्परस्परान्निरपेक्षस्यैकैकस्य त्रिकस्य करणत्वमवगम्यते न च तत्फलापूर्वप्रतिबन्धं शक्यं तत्र परस्परसाहि
त्यावश्यंभावादतस्तन्निर्वाहार्थमेकैकत्रिकसाध्यसमुदायापूर्वद्वयमंगीकर्तव्यमिति तत्र तत्र च पक्षे द्वेषो दोषः कल्पित पौर्ण
मास्यमावास्यावाक्यद्वयेऽनिरपेक्षसाधनत्वेनावगतानां त्रिकाणां युगपत्फलापूर्वारम्भेऽनैरपेक्ष्यबाधप्रसंगेन तदा हाप
पक्षे द्वयवाक्यश्रुतकरणत्वनिर्वाहासंभवात्तदर्थं प्रतित्रिकमेकैकसमुदायापूर्वमंगीकर्तव्यमिति यं पार्थो बोध्यः॥ ननु
फलवाक्ये दर्शपूर्णमासशब्दस्य समुदायपरत्वमिति प्रागुक्तरीत्याक्षरणां यागानां। फलसंबन्धबोधनेन षण्णामपि साहि
त्यसिद्ध्यर्थं षडुत्पत्त्यपूर्वाण्येव प्रथमं कल्प्यन्तां ततश्च तैरेव फलसिद्धेः किं परमापूर्वेणेत्यत आह यदीति प्रथमतः फलाका
ङ्क्षायाः श्रौतत्वेऽप्यात्फलसाधनतानिर्वाहकत्वेनैवापूर्वकल्पनसाहित्यनिर्वाहार्थं तत्र च यदि प्रथममेव षडपूर्वाणि कल्प्यन्ते तत
र्हि तानि फलापूर्वाण्येव स्युः न तूत्पत्त्यपूर्वाणि च समप्राधान्येऽवश्यमायान्त्यायेन धर्माणामपूर्वार्थत्वात्प्रथमं कल्पितानि यान्य
पूर्वाणि तदर्थत्वमेव धर्माणां स्यात्ततश्चाङ्गोपकृतेभ्यो यागेभ्यो पूर्वसिध्यर्थं पुनरपि षडुत्पत्त्यपूर्वाणि कल्प्यानि यानीति गौर

सोम० १९ 19

वेत्याद्यित्यर्थः।तस्मादितित्रयाणामपियागानांतंत्राभिधानेनकल्प्यतइत्यर्थः अंगानामपूर्वमस्तीतिपूर्वसंक्षेपेणोक्तंविशदयति
तथेति१कादशेवक्ष्यमाणन्यायेनांगानांसर्वेषांयुगपत्प्रयोगवचनग्रहात्समुच्चित्यतत्तदुपकारजनकत्वनिश्चयेसतिक्षणिका
नांपरस्परसाहित्यस्वरूपेणासंभवात्प्रसंगमेकैकमपूर्वंकल्प्यतइत्यर्थः ननुप्रथाग्नेयादीनांप्रधानानांफलसाधनत्वानि
र्वाहार्थंप्रथमंफलापूर्वमेकंसर्वप्रधानसाध्यंकल्प्यतेपश्चाच्चांगसाहित्यसिध्यर्थंप्रातिस्विकान्युत्पत्त्यपूर्वाणिकल्प्यंतेत
थांगानामपिसर्वेषांकृततदुपकारजनकत्वनिर्वाहार्थंसर्वांगजन्यमेकंअपूर्वंकल्पनीयंपश्चाच्चपरस्परसाहित्यसिध्यर्थमे
वांतरव्यापाररूपाण्युत्पत्त्यपूर्वाणिकल्पनीयानीतिकथंसर्वांगजन्यमेकमपूर्वंअंगीकारेणोच्यतेअंगीकृतेचतथैवन्यायसु
धाकारैरितिचेदुच्यतेयथास्वर्गस्यकालांतरभावित्वंएवंअंगजन्यस्यकृततदुपकारस्यनकालांतरभावित्वंब्राह्मणसंतर्पणांतां
गानुष्ठानानंतरमेवतदुत्पत्तेःततश्चआग्नेयादिभिःकथंकालांतरभाविस्वर्गरूपफलंसाधनीयमितिसर्वसाध्यैकफलापू
र्वकल्पकजिज्ञासावदिहकथंसर्वैरंगैःकालांतरभाविकृततदुपकार४कर्तव्यइतिजिज्ञासायाअभावेननसर्वसाध्यमेकमपूर्वंकल्प्य सोम० १९

नेकिंतुक्षणिकानामेषांकथंसाहित्यमित्येवात्रजिज्ञासासाचप्रातिस्विकापूर्वकल्पनामात्रेणापिशाम्यतिप्रधानेषुतुफ
लाकांक्षायाउत्कटत्वात्तस्यचकालांतरभावित्वात्तन्निर्वाहकजिज्ञासैवप्रथममुदेतीतिसर्वेषांफलसाधनतानिर्वाहकंसर्वसा
ध्यमेवप्रथमंकल्प्यमितिवैषम्यंतदेतदभिप्रेत्यावांतरापूर्वैरेवकृतउपकारसिद्धिमुपपादयति॥ततइतिअंगजन्यःप्रधानस्यानु
ग्रहउद्यमननिपतनादिनापरशोरेवफलजननसामर्थ्याधानात्मानान्यस्सएवचपरमोपकारस्सचांगापूर्वैरेवपरंपरांस
हितैर्जन्यतइत्येतावदेवार्थःएवंचावघातप्रयाजादिजन्यदृष्टादृष्टवत्त्वासंपादनमेवावांतरोपकारइतिग्रंथकारस्याशयः
इमंचार्थंदशमाद्येस्पष्टमुपपादयिष्यामः॥ननुसर्वेषामंगानांकरणोपकारजनकत्वमित्युक्तंसन्निपत्योपकारकाणां
मवघातादीनामनुष्ठानसमयेप्रधानोत्पत्त्यपूर्वस्यैवासत्त्वेनतादुपकारकत्वासंभवान्नचप्रयाजादिवदपूर्वद्वारातत्संभ
वस्तेषामपूर्वाभावदित्यतआहतत्रेतियागस्वरूपस्येतिविशिष्टद्रव्यदेवतादिनाजायमानोयागःशक्त्यतिशयसंपन्नएव
जायतइत्यर्थःतद्वारेणेतितथाविधयागजन्योत्पत्त्यपूर्वस्यैवफलापूर्वकृतावतिदेशस्यान्नावघातादीनामित्यतआहएव

सोम० मितिकथंभावयेदिति स्तूपकारजननप्रकारमात्रमेवापेक्ष्यते न तु साक्षादुपकारजननप्रकार एवतत्त्वसत्त्वप्यवांतरविशेषे
२० सर्वैषामेवांगानां इत्थंभावेन संग्रहो नाराद् उपकारकाणामेवेत्यर्थः इत्थंभावेन परमोपकारजनकव्यापारत्वेनेति यावत् प्र
योजनं तु यावदिह शास्त्रे अपूर्वोपजीविभवति अंगानामपूर्वार्थत्वातिदेशो हि तदितरत्सर्वं बोध्यं सत्रार्थस्तु चोदनाऽपू
र्वं पुनरस्तियतः कर्मणा फलस्यारंभश्चोद्यत इति॥ ॥तानि द्वैधं गुणप्रधानभूतानि॥ ॥अपूर्वाधिकरणाधीनो भावार्था
धिकरस्यात्मलाभ इत्यपूर्वाधिकरणस्य भावार्थाधिकरणशेषतया प्राधान्येन भावार्थाधिकरणे नैवास्य संगतिमाह एवमि
त्यत्र चाख्यातशब्दो धातुपरः ४ पद्यपि भावार्थाधिकरणो धात्वर्थस्यापूर्वभावनाकरणत्वमेव व्युत्पाद्यं न तु धात्वर्थभेदानुसा
र्यपूर्वभेदानुसरणं कृत्वेत्याम्मितितत्तश्च भावार्थाधिकरणे पदुक्तं धातोरपूर्वभावनाकरणार्थकत्वं तस्यैवात्रापवादः क्रियप
तेनापूर्वभेदस्यापवादः तथापि धात्वर्थस्यापूर्वभावनाकरणत्वव्युत्पादने सति वक्ष्यमाणस्य धात्वर्थभेदानुसार्यपूर्वभे सोम०
दानुसरणस्य तथा धात्वर्थस्यापूर्वभावनाकरणत्वापवादे सत्यपूर्वभेदापवादस्य च सिद्धेः फलाभिप्रायेणायं योयोज्यः तद २०

20

र्थमिति यद्यवघातार्थो व्रीहयस्तदा व्रीहिसाधनकावघातस्य दृष्टप्रयोजनाभावादस्य पूर्वं यदि तु व्रीह्यर्थोऽवघातस्त
दा दृष्टवैतुष्यद्वारैव व्रीह्यर्थत्वादवघातस्य नास्य पूर्वमिति फलफलिभावः। नन्वग्निमाधिकारतो द्वितीस्यापास्य साध्यार्थ
कत्वयातत्त्वसाद्दिनविधिबलात् द्वितीयान्तार्थस्य शेषित्वस्य वक्ष्यमाणत्वात्तन्यायेनेहापि द्वितीयाश्रुत्या व्रीह्यर्थत्वमेवा
वघातस्येति कथं पूर्वपक्ष इत्यत आह तत्रेति दृष्टवैतुष्यार्थत्वे तस्य लोकत एव प्राप्ते विधिवैयर्थ्यापत्त्या तत्सफलस्याया
वश्यं प्रकृते अपूर्वकल्पनीयं तच्च यदि व्रीहिद्रव्यात्मकस्य तेन दावघातस्य व्रीह्यर्थत्वमदृष्टद्वारैव वाच्यं द्रव्याद्दृपूर्वमिति प
क्षे अवघातविशिष्टद्रव्यस्य विधेयत्वाद् दृष्टद्वारावघातस्य द्रव्यार्थत्वे द्रव्यविशेषणतया अवघातविधिवैयर्थ्यापत्तेरतो व्रीह्यर्थ
त्वेऽवघातस्यादृष्टद्वयकल्पनाप्रसंगाद्द्वितीयाश्रुत्यवगतमपि व्रीह्यर्थत्वं परित्यज्य सक्तुवद्द्वितीयायास्तृतीयार्थत्वस्वक
त्वा ॥ अत्र यतोऽनावघातार्थो व्रीहय इति युक्तः पूर्वः पक्ष इत्यर्थः। भवेदेवमदृष्टद्वयकल्पना यदि व्रीहिद्रव्यमवघातविशिष्टमि
ह विधीयत इति मया स्वीक्रियेत किं तु क्रत्वर्थं नयाप्राप्तान् व्रीहीनुद्दिश्य तादर्थ्येनावघातमात्रं विधीयते अतो न तावद्व्रीहि

इव्यादृष्टपूर्वकल्पनाप्रसक्तिः नाप्यवघातस्य व्रीह्यर्थतानिर्वाहाय पूर्वकल्पनादृष्टैवेतुष्यद्वारैवतदर्थत्वसंभवाद
त्तो नास्मत्पक्षे एकस्याप्यपूर्वस्य कल्पनेति सिद्धांतमाह स्यादेतद्दिति नन्वेवं वाक्यवैयर्थ्यं स्यादित्युच्चवमित्यत आह नि
यमेति ननु तर्हि तवापि नियमादृष्टस्य कल्पनीयत्वात्को विशेषः इत्यत आह तत्त्वेति व्रीहिसाधनकावघातविधिपक्षेऽपि स
र्वे द्व्यविधयो नियमविधय इति स्वतुर्थे वक्ष्यमाणन्यायेन विशेषणाभ्रज व्रीहिविधेर्नियमार्थतया तत्पक्षेऽपि नियमाद
ष्टमावश्यकं एवं च तत्र वैवापूर्वद्वयकल्पनामननुनियमादृष्टमात्रकल्पनानचैवानियमादृष्टरूपापूर्वस्य संज्ञाकान्त्रास्यपूर्वमि
ति कथमुच्यत इति वाच्यं नियमादृष्टस्य क्रियाफलानुनिष्पादित्वेन तस्य फलत्वव्यवहारायोग्यत्वादिति भावः प्रयोजनं व्रीहिसा
धनकावघातविधिरिति पूर्वपक्षेऽवघातस्य यागीयद्रव्यसंस्कारत्वाभावेन यवप्रयोगेऽपि गोपि व्रीह्यवघातो दृष्टार्थं कर्तव्यः सि
द्धांते तु यागीयद्रव्यसंस्कारार्थत्वाद्यवेष्वेवावघातः कर्तव्य इत्यादि द्रष्टव्यं सूत्रार्थस्तु तान्यारव्याता नि गुणकर्मप्रतिपाद
कानि प्रधानकर्माप्रतिपादकानीत्येवं द्वैधं द्विधेति॥ ॥धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः प्रयाजवत्॥ ॥पूर्वाधिकरणविष

याघ्घावर्ज्यतिनकिंचिदितिप्रयाजादिव्यावृत्त्यर्थमाहकर्मेतितदर्थमितिसाध्यवाचित्वेद्रव्यस्यप्राधान्यात्कर्मणोगुणत्व
साधनवाचित्वेतुद्रव्यस्यकर्मार्थत्वात्कर्मणःप्राधान्यमितिफलफलिभावःगुणकर्मत्वप्रधानकर्मत्वचिंतायांनप्रकृतसंगतिरिति
शंकनीययद्यपीतियैरितियैस्तुद्रव्यंचिकीर्ष्यतेगुणस्तत्रप्रतीयेततस्यद्रव्यप्रधानत्वादितिसूत्रेवैराख्यातार्थैःकर्मभिःद्रव्यस्व
रूपेणावैतुष्यादिधर्मविशिष्टतयावाकर्तुमिष्यतेतत्रगुणःप्रतीयेततेषुतदाख्यातार्थेषुकर्मसुगुणत्वंगुणकर्मत्वंप्रती
येतकुतस्तद्द्रव्यप्रधानत्वात्तस्यकर्मणःप्रत्यक्षतोद्रव्यप्रधानकत्वादित्यर्थःतथाचेतियैस्तुद्रव्यंनचिकीर्ष्यतेतानिप्रधान
भूतानिद्रव्यस्यगुणभूतत्वादितिसूत्रंतत्रप्रत्यक्षंद्रव्यस्यकर्मप्रतिगुणभूतत्वात्कर्मणएवतत्रप्राधान्यमित्यर्थः॥शंकाद्वयमि
तिननुपूर्वपक्षिणासंमार्गादेःप्रधानकर्मत्वस्यैवांगीकारात्कथंगुणकर्मलक्षणस्याव्याप्तिःशंकितुंशक्याकथंवाप्रधानक
र्मलक्षणस्यातिव्याप्तिस्तस्मादिदमनुपपन्नमितिचेन्नपूर्वाधिकरणोदृष्टोपकारित्वंगुणकर्मलक्षणमुक्तंतच्चसंमार्गादेःप्रधान
कर्मत्वएवघटतेअन्यथासंमार्गादिषुतस्याव्याप्त्यापत्तेःतथापूर्वाधिकरणोक्तंदृष्टोपकाराभावरूपंप्रधानकर्मलक्ष

णामपि संमार्गादीनां प्रधानाकर्मत्वस्यैवावक्तव्यत्वेऽन्यथा संमार्गादिषु प्रधानकर्मलक्षणस्यातिव्याप्त्यापत्तेरतः प्रागुक्तलक्ष
णाद्यपनिर्वाहार्थं संमार्गादीनां प्रधानकर्मत्वमेवांगीकर्तव्यं न गुणकर्मत्वमित्येवमव्याप्त्यतिव्याप्तिशंकाद्वयमवष्टभ्य प्रस
क्तं यत्संमार्गादेः प्रधानकर्मत्वं तन्निराकरणाय धर्मिमुद्दिश्यत इत्यत्र तात्पर्यादेवं चाव्याप्त्यादिशंकापूर्वकं पूर्वाधिकरणोक्त
लक्षणावत्वेनायातत्तः प्रसक्तं संमार्गादेः प्रधानकर्मत्वमपोद्यत इति संगतिरिति पूर्वग्रंथस्य तात्पर्यं बोध्यं निराकरणप्रका
रमाह द्वितीयेति गुणप्रधानकर्मलक्षणेन यापत्तीयमानस्य किमित्यपूर्वसद्सद्भावविषयतया न्यायानयनेऽकिं यत इत्य
तं आह तन्मात्रस्येति तत्तल्लक्षणापरत्वमनपेक्षितार्थत्वप्रसंगादयुक्तमिति भावः अपूर्वसद्सद्भावविषयत्वे तु नाव्या
प्त्यतिव्याप्त्यवकाशः संमार्जनादिष्वपूर्वसद्भावादित्याह संमार्जनादिष्विति द्वितीयेति प्रकृतोदाहरणाभिप्रायेण। साम
र्थ्यादिनापि संमादीनां संस्कारत्वस्यांगीकारादिति ध्येयं न नु व्याकरणस्मृत्यनुसाराद्द्वितीयापास्साध्यार्थकतया द्वितीयया
स्रुगादीनामेव प्राधान्यावगतेः कथं संमार्गादीनां प्रधानकर्मत्वापूर्वः पक्ष इत्यत आह अत्रेति द्वितीयायाः साध्याभिधा

यित्वेहिंसासमभिव्याहृतक्रियायाः पारार्थ्यंगमयंतीगुणकर्मत्वस्य लक्षणं स्यात् साध्याभिधायित्वमेव तु तस्यात्रासिद्धमित्या
ह व्यभिचारादिति न केवलं द्वितीयायाः साध्यार्थकत्वाभावाद्गुणकर्मलक्षणत्वाभावः किंतु तस्याः साधनत्वार्थकतया तद्बलादेव प्र
धानकर्मत्वमपि सिध्यतीत्याह साधनत्वमिति बल्बजास्तरणविशेषाः शिखंडकान् शिखंडकाकारानित्यर्थः बल्बजानामसिद्धत्व
या साध्यत्वाभावाद्व्यभिचार इति भावः सक्तूनीति सक्तूनां स्वरूपेणातिशयविशिष्टत्वाकारेण वा होमसाध्यत्वाभावादिति भावः
ननु कटं करोतीत्यादौ कटस्यासिद्धस्य साधनत्वासंभवात्साधनत्वार्थकत्वेपि व्यभिचारस्तुल्य इत्यत आह कटमिति एवमाका
रः कटः कर्तव्य इति बुद्ध्या बुद्धेरव्यानंतरमेव तत्र कटोत्पत्तेः बुद्धिस्थत्वेन कटस्यापि साधनत्वं संभवतीति भावः द्वितीयाबला
त्प्रधानकर्मत्वं उत्तरार्धतात्पर्यविषयं विवृणोति तत्रश्चेति ननु द्वितीयाबलात् प्रधानकर्मत्वांगीकारेऽवहननादावपि तथा
त्वं स्यादित्यत आह दृष्टेति ननु साध्यवाचिनी द्वितीयेति व्याकरणस्मृतेरभावात्कथं सक्तूनां साध्याभिधायित्वं द्वितीयाया इत्य
त आह कर्तुरिति नन्वस्य त्वाचारापेक्षया स्मृतेर्बलवत्त्वेपि व्याकरणस्मृतेः प्रयोगरूपाचारमूलत्वान्न तदपेक्षया बलवत्त्वमि

सोमं०
२३
23

स्यत आह प्रयोगोपीति तत्तत्श्च केवलप्रयोगाये क्षया व्याकरणानुगृहीतप्रयोगस्य प्रबलत्वात्तदनुसारेण साधुत्वमेवा
र्थ इति भावः व्याकरणस्मृतिबलात्साधुत्वं द्वितीयार्थ इत्युपपादयितुं तथायुक्तं चानीप्सितमिति सूत्रार्थवदन्यकर्मसंज्ञा
विषयत्वं निष्कर्षति यद्येति नन्वेतावतापि कथं साधुत्वस्य द्वितीयार्थत्वसिद्धिरित्यत आह ईप्सितेति न त्वेवं साध्यं कर्मत्वेव
स्तत्वं कर्तृत्वं स्यात्तन्तु ईप्सितानीप्सितयोः भेदेन संज्ञाकरणमिति चेत्तमेवं तथा सति यवेभ्यो गां वारयतीत्यत्र अग्नेर्माणवकं वारय
तीत्यादौ वारणार्थानामीप्सित इत्यपादानसंज्ञापाय वाय्वादीनां कर्मसंज्ञाबाधस्यावश्यवाच्यतया तद्वदेव ग्रामं वकादीना
मप्यपादानत्वं मा भूदित्येवमर्थं कर्तुरीप्सिततमं कर्मेति ईप्सिततमस्य पृथक्कर्मसंज्ञापावत्वे सति द्वेष्यादेः कर्मसंग्र
हार्थं तथा युक्तं चानीप्सितमितीदमप्यावश्यकमिति पृथक्संज्ञाकरणस्यैव युक्तत्वादेवं च भेदेन सूत्रणादीप्सिततमस्यैव
द्वितीयार्थः अनीप्सिते तु लक्षणेति न्यायसुधाकारैरुक्तमयुक्तमिति द्रष्टव्यं न च साधुत्वमर्थ इति पक्षेऽपि द्विविधः कर्म च तत्र अधिशी रामं०
ङ्स्थासां कर्मेत्यादिषु लक्षणावश्यंभावादनीप्सितेऽपि लक्षणैवास्त्विति वाच्यं तत्साधारणप्रवृत्तिनिमित्तस्यैकेनापि वक्तुमशक्य २३

त्तयात्तत्रागत्यालक्षणास्वीकारेपिसंभवन्मात्रविषयानुगमस्यात्यन्तमनुचितत्वादितिभावः कटमितिबुद्धिस्थत्वंबुद्धौ
विषयत्वमात्रंननुवस्तुतस्सद्भावइतिसाध्यत्वमेवकटस्येतिभावः व्रीहीन्निवैतुष्यविशिष्टत्वेनव्रीहीणांसाध्यत्वमितिभावः
स्वाभिमतंसाध्यत्वमेवसाधनेविशेषइतिपरमुखेनवाचयितुंदूषयति किंचः पुनरितिनचैवमपिस्रुगादीनांशेषित्वप्रत्या
पकाभावेनसंमार्गादीनांगुणकर्मत्वंनसिध्यतीतिशंकतेनन्वितिईप्सितंहीतिपद्वियेनरूपेणपुरुषस्यसमीहितंभ
वतितेनरूपेणतद्वस्तुनस्समीहानिमित्तपुरुषव्यापारगोचरीभूतत्वेनयेनवस्तुनासाध्यतेतत्तस्योपागमित्युच्यतेइद
मेवचपरोद्देशप्रवृत्तकृतिव्याप्यत्वरूपत्वात्पारार्थ्यमित्युच्यतेततश्चईप्सितंक्रिययाआप्तुमिष्टतमंक्रियोद्देश्यमिति
यावत्तत्तद्वशेषिभवतीत्यर्थः नहिशेषित्वंद्वितीयायाः साक्षात्प्रतियाद्यंयेनोक्तदोषःस्यात्किंतुतद्धिगम्यंतत्
त्रतुद्वितीयायास्साहाय्यकमात्रंतच्चसाध्यत्वाभिधायित्वेपिसंभवतीतिपरिहरतिसत्यमितिविधिवशेनेतिप्रवर्त्तना
त्मकशब्दभावनाविधिः प्रवृत्तिहेतुव्यापारश्चप्रवर्त्तनानचसमीहितसाधनादन्यत्रचेतनःप्रवर्त्तयितुंशक्यइतिविधिः

स्वस्य प्रवर्त्तनात्वसिध्यर्थं स्वभाव्यापाभावनायास्समीहितभाव्यकत्वं गमयन् भावनाकरणस्य समीहितोद्देशप्रवृत्तव्यापा
सोम° २४ रगोचरत्वं गमयतीत्यर्थः विधिबलादेव तद्वगमे गमे स्रुगादिपदांतरवैयर्थ्यमित्यत आह तद्विशेष इति एतेनापि कथं
द्वितीयायाः सहायत्वमित्यत आह तत्रैतिसमीहितत्वं साध्यत्वं चेति द्वयं शेषित्वबोधेऽपेक्षितं तत्र द्वितीयया साध्य
त्वं विधिबलाच्च समीहितत्वमिति द्वितीयया सध्रीचीनविधितः शेषित्वबोधस्संभवतीत्यर्थः उक्तं च न्यायरत्नमालायां क्रतुस
मीहितं येन सिध्यत्यंगं तदुच्यते। प्रमाणं च विधिस्तत्र श्रुतिलिंगादिसंयुत इति ननु विधिनालमीहितत्वे बोध्यत इत्ययुक्तं स्रु
गादीनां क्रतुसाधनत्वादेव समीहितत्वसिद्धेरिदं समीहितमित्येवंरूपेण बोधने विधेरसामर्थ्याच्चेति समीहीत शब्दस्येच्छा
विषयमात्रमर्थ इति मन्यमानः शंकते नन्विति नहीदं समीहितमित्येवं विधिबलादवगम्यत इत्युच्यते किंतु यद्रूपकत्वसमीहि
तं स्रुगादि तस्य संमार्जनादिक्रियया ईप्सितत्वं आपडमिष्टं मंत्वं तदुद्देशेन यायाः प्रवृत्तिः क्रियाप्रत्युद्देश्यत्वमिति यावत्त सोम°
देव विधिना बोध्यते एवं च क्रतुसाधनत्वेनेच्छाविषयस्यापि स्रुगादेरुद्देश्यत्वं विना परोद्देशप्रवृत्तकृतिव्याप्यत्वलक्षणं पा २४

रार्थ्यं संमार्गादीनां न संभवतीति तत्सिध्यर्थं विधिगम्यं समीहितत्वं उद्देश्यत्वपर्यन्तं न तु इच्छाविषयत्वमात्रमिति न कार्यानुपपत्ति
रिति परिहरति को नामेति पत्रसाध्यत्ववाचि द्वितीयादिकं नास्ति तत्र साध्यत्वमुद्देश्यत्वं च द्वयमपि विधितः स्वर्गादेरवगम्यत इति ध्ये
यं कथं तर्हि सक्तूनिति द्वितीयानिति द्वितीयानिर्वाह इत्यत आह सक्तूनामिति यत्र विधिव्यापारं विनैव पुरुषस्याभिलषितं तस्य
विधीयमानसाधनं प्रत्युद्देश्यत्वमात्रं विधिगम्यमिति पूर्वोक्तप्रकारेण सक्तूनामपि प्रमाणान्तरेणाभिलषितत्वे सति विधित उद्दे
श्यत्वसिद्धिमाश्रित्य मुख्यार्थत्वमुपपादयति तु शब्दस्तेन न च तद्वदिति सक्तूनां भूतोपयोगित्वेन प्राप्तिपाघतयावाभाव्युपयोगित्वे
न क्रतुसाधनभावेन वा अभिलषितत्वाभावात् भाव्यत्वेनान्वयासंभवेन साधनत्वेन लक्षणा स्वीक्रियत इत्यर्थः ४ स्रुगादी
नां त्वस्ति सक्तुवैषम्यमित्याह स्रुगादीनीति न तु स्रुगादीनां साध्यत्वमप्यनुपपन्नं तद्भिन्नस्वरूपेणासंभवति नाप्युपका
रविशिष्टत्वेन अवहननादिजन्यवैतुष्यरूपोपकारवद् हि उपकारानुपलब्धेरित्यत आह तत्रेति प्रयोजनं संमार्गस्य प्रधा
नकर्मत्वे प्रसुचानुर्मास्यादि स्रुक्स्रुग्ग्रहणावपि कपिञ्जलाधिकरणन्यायेन त्रिस्त्रिरेव संमार्गः यथा व्रीहीन्प्रोक्षतीत्यादौ य

वप्रयोगेपि व्रीहिभिरेव प्रोक्षणमित्यादिसिद्धांतेनुविपरीतं मितिमित्तार्थस्तु दृष्टोपकाररहितेनं धर्ममात्रे श्रुते प्रापाज्यव
त्कर्मप्रधानकर्मस्यात् दृष्टस्योपकारस्यानिर्दिष्टत्वे गुणकर्मत्वासंभवादिति॥ ॥स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्दे
वताभिधायित्वात्॥ ॥ननु स्तोत्रशस्त्रयोरुक्तिस्त्वेनैवात्र कं यंभेदेन निर्देशाद् इत्यत आह प्रगीतेतितदर्थं किं देवतां प्रतिगुण
भूतान्युत देवतां प्रति प्रधानभूतानीत्येवं तदर्थं संशयः तत्प्रकाशनार्थानि उत दृष्टार्थानीति च गुणकर्मत्वप्रधानकर्मत्वयोः फल
निर्देशपरं एवं च किमिमानि देवताप्रकाशनार्थान्युतादृष्टार्थानीत्येवं संशये प्रथमं प्रदर्शनीयेपि पूर्वाधिकरणस्यनानिद्वैधा
धिकरणोक्तप्रधानकर्मत्वापवादकतयातेन संगतिर्विदस्य गुणकर्मत्वापवादकतया तेन संगतिरिति सूचनाय गुणकर्मत्वप्र
धानकर्मत्वकोटिकस्संशयः प्राधान्येन प्रदर्शितइति ध्येयं अत्र आग्निमारुतादौ विनियुक्तस्य मंडूकाख्यस्तत्रादेः देवताप्र
काशनार्थत्वाभावाद्देवताग्रहणं स्तुत्यमात्रोपलक्षणार्थं इष्टव्यं ननु देवताप्रकाशनार्थत्वे स्तोत्रि रूपत्वे विहन्येतेति
शंकां निराकुर्वन् अभ्यो कंप्याच्छगुणोति आग्निमारुतादिवद्रूपादि पुरोनुवाक्यायाज्यादिष्ठस्यापि गुणसंबंध प्रकाशनेनतत्र न

तात्पर्यं किंतु गुणिप्रकाशन एव तात्पर्यं एवमिहापि गुणप्रकाशनमतंत्रीकृत्य तन्मुखेन गुणिप्रकाशन एव तात्पर्यं दृष्टा
र्थत्वामाप्नुयेयं गुणसंबंधकीर्तनमात्रेणास्तुतित्वंचोपपद्यत इति भावः अनेन पूर्ववदिहापि गुणकर्मत्वमिति प्राप्तवस्थाना
संगतिरिति सूचितं परार्थगुणसंबंधबोधनमात्रेणान स्तुतित्वं किंतु गुणसंबंधबोधनेपर्यवसितत्वेनातो गुणिप्रकाशनार्थ
त्वे स्तुतिरूपस्य श्रौतस्य बाधप्रसंगादिह दृष्टार्थत्वमपि परीत्यज्यमित्याह सत्यामिति जनेनेत्यर्थ तेन स्तुतेरदृष्टार्थत्वेपि गुणिनि
ष्ठगुणाभिधानेक्रियमाणो गुणपभिधानम प्यानुषंगिकं भवतीति तदंशे देवतासंस्कारत्वमपिकिं न स्यादत्र च स्तोत्रशस्त्रमंत्रैर्गु
णानामिति नैव देवताप्रकाश्यत्वेन हविर्भागित्वेप्रनप्रधानदेवतानु हविर्भागित्वाकारेणेति तद्रूपप्रकाशनाभावान्न देवतासं
स्कारत्वसंभव इति वाच्यं हविर्भागित्वाकारेण देवताप्रकाशनं कर्तव्यमित्यत्र मानाभावादग्निमीळे इत्यादिमंत्रेषु प्रकाशनार्थेषु
हविर्भागित्वाकारद्योतकशब्दाभावेन तेषामग्निप्रकाशनमात्रेणादेवताप्रकाशनार्थत्वस्य वक्तव्यत्वाच्च एवं चतत्र देवतात्रापिह
विर्भागित्वाकाराप्रतिपादनेपिआनुषंगिकगुणपभिधानत्पात्रेणादेवतास्मरणार्थत्वसंभवत्येव तत्र ब्राश्रिष्टकृदुत्तमप्रयाजा

सोम० २६ 26

द्विवेदुभयार्थत्वमेव स्तोत्रशस्त्राणां किमस्यादितिशंकानिरस्तात्रानुषंगिकत्तयापिगुणिपरत्वस्याकारे स्तुतित्वहानापत्ते र्लोके केवलगुण
संबंधपरत्वस्यैव स्तुतित्वव्यवहारदर्शनादतो गुणाभिधानमानुषंगिकतयापिनतत्परं किंतु केवलागुणसंबंधार्थमेवस्विष्टकृदादौ त्वेवं
श्रौतार्थहानिरूपबाधकाभावात्तत्रभयार्थत्वमुपपन्नमितिवैषम्यमितिभावः श्रुतिवच्छादितिप्रयाजशेषेणाहवींष्यभिघारय
तीत्यादौनदृष्टार्थत्वलोभमात्रेणात्ततीयायालक्षणा किंतु शेषशब्दस्यारस्यबलेनेतिनद्वादिह दृष्टार्थत्वाय स्तोतिशंसत्योर्लक्ष-
णास्त्वितिशंकायानावकाश इतिभावः ऐंद्र्यास्तुतिरितिअभित्वाशूरनोनुमइत्यादिप्रगाथेन क्रियमाणा इतिशेषः ननु इंद्रमहेंद्रयो
रभेदादिंद्रप्रकाशनेनापिमहेंद्रसंस्कारसंभवान्नोत्कर्षइत्यतआह इतरथेतिश्रुत्याचतुर्थ्यंतशब्देन समवायिनिकर्मान्वयिनी
त्यर्थः देवतायाः किंचिद्देनानिगमेष्वनतिदेश्यपा किंतु विधिवाक्यस्थशब्देनैवेतिदाशमिकन्यायेन वस्तुतइंद्राभिन्नस्यैव दपिमहें
द्रोमहेंद्रशब्देनैव देवताप्रकाशनार्थंमुनिगमेष्वकर्त्तव्य इतिइंद्रस्तुत्यापमहेंद्रसंस्कारोनसंभवतीत्यर्थः मनोतेतिअग्निषोमी सोम० २६
यपशोत्वंह्यग्नेप्रथमोमनोतेतिमनोतामंत्रेश्रुतोग्निशब्दोलक्षणयापयाग्निषोमौप्रतियादयनितयाइंद्रशब्दोपिलक्षणयाम

हंद्रप्रकाशपेदित्यर्थः न चैवं पक्षानुमंत्राणां मंत्रस्यापि लक्षणया यादर्शपौर्णमासिकाग्न्यादिदेवताप्रकाशकत्वसंभवेनउत्कर्षो
न स्यादिति चेन्न लक्षणादित्तीत्पर्याधीना पक्षानुमंत्राणां मंत्रस्य वचनाग्न्यादिप्रकाशने तात्पर्यग्राहकं प्रमाणमस्ति येन लक्षणा स्या
त्प्रकरणं तु लिंगापेक्षया दुर्बलत्वान्न लिंगबाधने क्षमं तस्मान्न लक्षणानुपपत्तेस्तत्रोत्कर्षस्य युक्तत्वात् प्रकृते च न केवलं प्रकरणा
म्नानेन लक्षणा किंतु अभित्वा शूर नोनुम इति प्रगाथस्य मा हेंद्र इत्यह पञ्चाभ्यासक्रमेणोत्तराग्रे पपठितत्वादुत्तराग्रे पाठस्यैक्त्वार्थ
त यानन्नुलादेव इंद्रशब्दस्य महेंद्रे तात्पर्यग्रहासंभवतिलक्षणेति वैषम्यं द्रंद च वैषम्यं मनोतापां तु वचनादित्यत्र दशमे सम्यग्व्युत्पा
मः अनेनैव पर्वोत्तरपक्षयोरुत्कर्षानुत्कर्षरूपं प्रयोजनमित्यपि सूचितं॥ ॥विधिमंत्रयोरैकार्थ्यमैकशब्द्यात्॥ ॥अभिधायक
त्वं अनुवादकत्वमित्यर्थः देवान्निति याभिः गोभिर्देवा उपजन्ते याश्च दद्दातीत्यर्थः अत्र यच्छब्दस्याननातानशांतिनदमातिस्करोनेना
अभित्रो व्याधिरादधर्षतीति पर्वत्रविद्यमानेनान्योगितामिस्सच ते गोपतिस्सहेत्युत्तरत्र विद्यमानेन च तच्छब्देनान्वयो बोध्यस्तत्रेमं
त्रग्रहणान्मंत्रगतानामेवाख्यातानामुदाहरणीयत्वात्कथं ब्राह्मणगतान्यपि यस्योभयमित्यादीन्युदाहृ मंत इत्यत आह तानि

सोम० मंत्रेष्वेवेतिप्रापेणेतिशेषः ननुयथास्त्रंमंत्रगतनमात्रविषयमेवेदमस्तु एवंसतितन्मात्रोदाहरणे प्रवृत्तंभाष्यमपिसंगच्छत इ
२१ त्यतआह नत्वितिअयंचार्थोवार्त्तिकेप्रपंचितइतिभावः अभ्यासादितिशब्दांतरादेरप्युपलक्षणंपदच्छेदबलात्तिद्धत्वाव
गमेनविधिशक्तिर्विहन्यतइत्याशयेनाह नहीतिवेदैवेति। ननुवक्तुरभावेपिआख्यातस्यविधायकत्वेनानुपपन्नमित्यपं
ग्रंथोनुपपन्नस्तथात्वेनस्वस्यविधातुमशक्यत्वेपिआख्यातस्यविधायकत्वसंभवात्पूर्वग्रंथोप्यनुपपन्नइतिचेन्नमैवं
आख्यातस्यविधायकत्वंहिप्रेरणाबोधकत्वंनान्यत्। यजेतस्वर्गकामइत्यादौचप्रेरणाश्रयत्वयोग्यस्यान्यस्यानुपलंभा
च्छब्दगतैवप्रेरणास्वीक्रियतेमारणावकसंध्यामुपासीतेत्यामंत्रणविभक्तिस्थलेलोकेप्रेरणायावक्तृगतत्वदर्शनादिहापिआ
मंत्रणविभक्तिस्थलेप्रेरणास्वीकारेसावक्तृगतैववाच्यानचवेदेवक्तास्तीत्यभिप्रायेणास्यग्रंथस्योपपत्तेः नयावत्तमपुरुषस्थ
लेपिअस्मदर्थस्यप्रतीयमानत्वात्तद्गताप्रेरणावाच्यासाचनसंभवतिस्वेनैवस्वस्यप्रेरयितुमशक्यत्वादित्येवंपूर्वग्रंथस्या सोम०
प्युपपत्तेरेवंचपूर्वग्रंथेविधातुमित्यस्यप्रेरयितुमित्यर्थोबोध्यः ननुयतएववेदेवक्तुरभावः अतएवाख्यातगताप्रेरणास्वी २१

क्रियमाणमितिविधायकत्वमात्रंत्रगणादिस्थलेप्युपपन्नमित्यतआहविधेरितिआमंत्रणविभक्तेरभिमुखार्थप्रत्यायकत्वेनसर्व
पुरुषसाधारणविधिप्रत्ययविरोधित्वादामंत्रणविभक्तिस्थलेविधिर्नसंभवतीत्यर्थः ४ अनेनैवन्यायेनोत्तमपुरुषस्यापिविधि
विरोधित्वंद्रष्टव्यंस्ववंचविधायकत्वाभावेसतिमंत्राधिकरणप्रवृत्त्यात्तन्यायेनस्मारकत्वमेवैषामित्युपसंहरतितस्मादिति
स्मारकत्वेअध्वर्य्वादिनाआमंत्रणविभक्तिर्निर्वाह्यइत्याशयेनाहप्रयोगेतिसूत्रार्थस्तुविधिगतानांमंत्रागतानांव्याख्यातानांचवि
धायकत्वेपैकार्थ्यएकजानाप्यशब्दत्वादिति॥ ॥तत्रोदकेषुमंत्राख्या॥ ॥अत्रभाष्यकारेणमंत्रस्वरूपापरिज्ञानेमं
त्रगतानांव्याख्यातानामभिधायकत्वंव्युत्पादयितुनशक्यमितिइदंअर्थतःविधिमंत्राधिकरणान्यवेंइष्टव्यमित्युक्तंतदयुक्तं
तदयुक्तंविधिमंत्राधिकरणेमंत्रत्वस्यन्यायानुपयुक्तत्वादित्याचार्यैर्दूषयित्वाप्रासंगिकमिदमित्युक्तंतत्रयदिमंत्र
स्यन्यायोपयोगस्तर्हिकथंप्रसंगादपिमंत्रलक्षणाकथनमित्यपेक्षायांप्रसंगिकत्वमुपपादयतिन्यायेतिननुवेदा
र्थनिर्णयार्थंप्रवृत्तायांमीमांसायां२लक्षणाकथनमयुक्तमित्यतआहअहेबुध्येतिआवसथ्यस्याग्रेशिदंसंबोधनेन

नुवसंज्ञायकपिंजलानालभन्त इत्यादीनां मंत्रत्वेप्यप्राप्तार्थकत्वेन विधायकत्तयानुष्ठेयार्थस्मारकत्वाभावाद्व्याप्तिस्तयाजप
मंत्रादिष्वप्यव्याप्तिरित्यत आह प्रापकमितिप्रयोजनेन लघुनोपायेन लक्ष्यावगमराव तदुक्तं भाष्ये लघीयसी प्रतिपत्तिर्लक्ष
णेनेतितथा चाहुः आक्षेपेष्वपवादेषु प्राप्त्यां लक्षणाकर्मणि प्रयोजनं नवक्तव्यं यत्त्वकृत्वा प्रवर्तत इति स चार्थस्तत्तदभि
धाने चोदकं प्रयोजकं येषां तेषु मंत्राख्येति ॥ ॥ शेषे ब्राह्मणशब्दः ॥ ॥ अवशिष्टमिति अत्र वेदत्वे सतीति विशेषणा
त्कल्पसूत्रादिषु नातिव्याप्तिः मंत्रलक्षणोक्तेतरदतिरिक्तस्य ब्राह्मणत्वे अर्थसिद्धे पिस्त्रीमप्रकारनिरासार्थमिदं सूत्रमि
तिध्येयं ॥ ॥ अनाम्नातेष्वमंत्रत्वमाम्नातेषु हि विभागः स्यात् ॥ ॥ तच्चोदकस्त्रादापाततः प्रसक्तं मंत्रत्वमयोध्यत इति
संगतिः ऊहेति अग्नये जुष्टं निर्वापामीत्यादिमंत्रस्य सौर्यादिविकृतिषु सूर्याय जुष्टमित्येवं प्रक्षिप्यमाणं सूर्यादिपदमिह ऊह
शब्देन विवक्षितं तथा अग्निर्देवो होतेति मंत्रे भुवनाश्ववदं बरीषनदं गिरोवदिति नाम प्रक्षिप्यमाणं यजमानार्षेयप्रवर ४ सुब्र रांम०
ह्मण्यानिगदेस्मरभद्रशर्मणः पुत्रोपजन्ते सोमसाध्ययज्ञशर्मणः पौत्रोयजन्ते स्मरेभ्यरयज्ञशर्मणोन प्तायजन्ते गोरमदायाः पुत्रो २८

यजन्त इत्येवं प्रक्षिप्यमाणानि यजमानपित्रादीनां नामधेयानि नामधेयशब्देन विवक्षितानि न त्वाशास्तेयं यजमानोऽसावित्यसर्व
नामयुक्तेऽसूक्तवाकादिषु निर्दिश्यमानानि सोमशर्मा यज्ञशर्मेत्यादि नामधेयानि सूक्तवाकादिषु सर्वनाम निर्दिश्यते तत्र नामा
नपर्यवसितत्वात्तेषां मंत्रत्वात्तस्मात्सर्वनामरहितेषु मंत्रेषु यजमानस्य तन्मध्ये यामपरे यां च नामग्रहणानीति विध्यंतरबलात्
निक्षिप्यमाणानामधेयानि इहोदाहरणमिति द्रष्टव्यं मंत्रेति अत्र मंत्रैकवाक्यत्वमेको हेतुर्मंत्रकार्यकरत्वं चापरो हेतुर्मंत्रम
ध्ये निवेशादिरूपतन्तु मंत्रेण सह कार्यप्रतिपादकत्वरूपमंत्रैकवाक्यत्वसिद्ध्यर्थमुक्तं अत एव सिद्धो तेन तयोरेव हेत्वोः परिहा
रोवक्ष्यत इति ध्येयं मंत्रैकवाक्यत्वं मंत्रभक्तेन जुष्टमित्यादिना सह विशिष्टेकार्यप्रतिपादकत्वं मंत्रकार्यकरत्वं च मन्त्रभजस्या
ग्निपदस्य पलकार्यमपर्वण्यदेवताप्रकाशनं तत्करत्वमित्यनयोर्भेदो बोध्यः रथेनि महाव्रते रथघोषेण माहेंद्रस्य स्तोत्रमुपा
करोतीति रथघोषस्यामंत्रस्यैव सतो असर्वे सजीनि मंत्रकार्यस्तोत्रोपाकरणाकरत्वावगमादिति भावः आदिशब्देन दुंदुभिघो
षादेः अहतां नतत्कारणमिति इषेत्वादावध्याद्विपप्राणाच्छिन धृपादिपदे व्यभिचारादिति भावः अधीमहे इति एवंप्रकारामंत्र

सो०म०
२९

धोरिति पर्वैरासंबंधः समाम्नायेति इरापदयत्रिपदादेर्मंत्रसमाम्नायेयाठाभावे पिरौरं क्रैत्वोहेयं पप्रीति श्रूपादित्तिवेदेनै
वमंत्रमध्यगतत्वावगतेर्मंत्रत्वमितिभावः प्रयोजनं पर्वपक्षे ऊहमंत्रेषेर्मंत्रत्वैर्यप्राप्यक्षित्तेसिद्धांतेतु ननस्याप्यक्षित्तमि
तिसूत्रार्थस्तु अनाम्नातेषूहादिष्वमंत्रत्वं यत आम्नातेष्वेवमंत्रब्राह्मणविभाग इति अपं च हेतुः ब्राह्मणलक्षणाकथना
नंतरमेव वक्तुं शक्यते नननः पर्वमितिनिबोदकस्य चापवादस्याप्यस्य ब्राह्मणलक्षणानंतर्यं बोध्यं न्यायसुधायांतु ऊ
हादेरनुमानगम्यस्य वेदत्वमभ्युपगम्य पद्यमानवेदविषयत्वं द्वैराश्यनियमस्य वक्तुमेत्रधिकरणमित्युक्तं तदयुक्तं नया
सत्यनुमानादिगम्यवेदस्य ब्राह्मणत्वाभावादेतद्ब्राह्मणान्येव पंचहवींषीत्यादौ लिंगाद्यनुमितस्य वेदस्य ब्राह्मणत्वाभा
वेनातिदेशाभावप्रसंगात् ऊहादेरनुमानगम्यस्य वेदत्वांगिकारे ३ बेत्वेत्यादौ छिन्नमीत्यादिपदाध्याहारस्याप्यनुमा
नादिगम्यत्वेन तस्यापि वेदत्वप्रसंगात् तस्मादर्थाद्याकल्पनैकदेशत्वादिति न्यायेन कल्प्यमानस्य शब्दस्य न वेदत्वं
किंतु तदर्थस्य वेदतात्पर्यविषयत्वमात्रेण तत्र तत्र ग्रंथकाराणां वेदत्वव्यवहारः ४ एवंच लिंगादिकल्प्यस्य ब्राह्म

सो०म०
२९

29

रागत्वावशंभावादस्मान्ने पुष्टिविभागस्यादितिसौत्रोहेतुः प्रापिकामिप्रायो द्रष्टव्यः॥ ॥तेषामृग्यत्रार्थवशेनपादव्यवस्था
॥ ॥मंत्रप्रसंगादृगादिलक्षणस्यसंगतिरित्याशयेनाह वेदेति वेदप्रसिद्धिमेवाह अहे बुध्न्येति प्रत्येति ऋचस्सर्वस्याः विशिष्टैका
र्थप्रतिपादकत्वेपि प्रतिपाद्यमवान्तरार्थभेदसंभवादर्थवशेनेत्युक्तं इदं च पादव्यवस्थाहेतुत्वं नाहृत्तवशादीनामुपलक्षणं तद
न्तलक्षणाशरारप्रविष्टं पादव्यवस्थामात्रस्यैवलक्षणत्वसंभवादिति द्रष्टव्यं मन्त्रेनेषां मंत्राणां मध्ये इत्यर्थः अनेन पादव्य
वस्थारूपलक्षणेमंत्रत्वेसतीतिविशेषणं सूचितं तेन लौकिकश्लोके नातिव्याप्तिरिति द्रष्टव्यं॥ ॥गीतिषुसामाख्या॥ ॥
ननुसामान्यधीमह इति गीतिविशिष्टे मंत्रेऽभियुक्तानां सामशब्दप्रयोगान्न केवलं गीतिः सामशब्दार्थः इति शंकते यद्य
पीति कवतीष्विति रथंतरादिशब्दस्य गीतिविशिष्टमंत्रवचनत्वे कशब्दयुक्तासु कयानश्चित्र इत्यादिषु कवतीषु रथंतरश
ब्दाभिधेयगानविशिष्टाममित्वाशूरनोनुम इत्येताममिवर्ती कुर्यादित्येवं कवतीषु रथंतरं गायतीत्यस्यातिदेशवाक्यस्या
र्थः स्यान्न च तथा संभवति ऋचाम गंतराधारत्वासंभवादतोतिदिशोपपत्यर्थं रथंतरादिशब्दानां सामविशेषवाचकानां गा

सोम० नमात्रवाचकत्वावश्यंभावात्सामशब्दस्यापि गीतिमात्रवाचकत्वमित्यर्थः ननु तर्हि तेनैव गतत्वात्किमर्थमिदमित्यत
३० आह २हेति विभागायेति ऋगपेक्षया विवेकायेत्यर्थः ८ ननु भाष्याद्युक्तिस्वत्वार्थं तत्पैव किं न स्यादित्यत आह भाष्य इति ॥
॥ ॥शेषे यजुः शब्दः प्राप्नोतीति स्वरूपकथनपरं ब्राह्मणव्याख्येत्यर्थमाह मंत्रज्ञानमिति ॥ निगदो वा चतुर्थं स्याद्धर्मविशेषा
30 त्॥ ॥आक्षेपेणेति आक्षेपश्च निगदेष्वपि ध्याप्त्नापत्येति भावः संज्ञेति नितरां गद्यंत इति व्युत्पत्त्या यजुष्वेव संज्ञा उपपादयि
तुं न शक्यते ऋक्ष्वपि प्रसंगादिति भावः तत्वेति ननु यजुष्ट्वस्यैवोपक्रमाधिकरणे यजुर्वेदविहितकर्मधर्मत्वोक्तेरिह कथं मंत्रध
र्मत्वव्यवहारः न च तदधिकरणोदाहृतवाक्यादिदं वाक्यांतरमेव यजुः शब्दस्य लक्षणयावेदपरत्वे हेतो रूपक्रमविरोधस्यात्राभा
वादिति कल्पनं युक्तं। भाष्यकारेण प्रक्रान्तानुपयुक्ततया उपक्रमगतवाक्यस्यानुदाहरणमात्रेणात्र तद्विरोधाभावकल्पनाप
वाक्यांतरत्वस्वीकारस्यायुक्तत्वादिति चेत्सत्यं तदधिकरणपूर्वपक्षे स्थित्वा इह मंत्रधर्मत्वव्यवहारः अत एवाथ मध्युच्चैर्यो राम०
हेतुरित्याह ८ संज्ञा तावदिति निगदत्वेऽर्धजोगर्धमित्यादौ पादबंधरहितप्रश्लिष्टपठिते प्रसिद्धे ८ पादबंधवर्जीयेष्वृक्षु नातिप्रसं ३०

गइतिभावः सत्यपीति नचउयांप्रभुत्वेन परप्रत्यापनाशक्तौ प्रैषार्थत्वसंभवेपि प्राप्तकालतायां लोड्विध्यतीतिक
यमर्थवशाद्वुद्धेस्त्व प्राप्तिरितिवाच्यं आग्नीधादेरग्निविहरणाद्यनुष्ठानापत्तेस्तत्स्मरणमपेक्षितमितिप्रैषार्थत्वेपेक्षि
तार्थत्वंदृष्टार्थत्वंचलभ्यते प्राप्तकालत्वार्थकत्वेतुअनपेक्षिताद्यर्थानवाधसंभवइतिशंकतेनन्वितियद्युयांप्रभुत्वस्यनिर
वकाशत्वंस्यात्तदाअानर्थक्यप्रतिहतानीविपरिणतेबलामिति + त्वमदृष्टार्थत्वंचेस्यादितितत्परिहारार्थंप्रैषार्थत्वस्यै
वयुक्तत्वादितिभावः ननुलिंगप्राप्तौद्वेस्त्ववचनप्राप्तौपांप्रभुत्वस्य + न्यायेनदुर्बलमस्युपांप्रभुत्वमनुरोध्यंस्यान्नचा
त्रनिरवकाशत्वमित्याशयेनाहनचेतिअनेनैवलिंगस्यनिरवकाशत्वादनर्थक्यप्रतिघातन्यायेनापितस्यप्राबल्यंस
चितेएवमुपांप्रभुत्वस्यसंकोचान्मकोबाधउक्तः वस्तुतस्तुसोपिनास्तीत्याह अपिचेतिमतत्रास्येतितत्रभ्वनिगदविषयत
याउयांप्रभुत्वस्याप्रासेनेनतस्यानिगदेतरविषयतयासंकोचइतिभावः ननुपदिकार्यतउच्चैस्त्वप्राप्तिस्तर्हिउच्चैर्निगदेनेति
वचनेनकिमर्थमित्यनआहएवंचेतिअनुवादमात्रनिगदस्यकार्यार्थमुच्चैस्त्वेपिनयजुरंतरेउपांप्रभुत्वमेवयुक्तमित्येवमो

सोम० ३१ चित्येन त्र्यंपांशुपञ्चयेति विधिस्तत्पर्य इति भावः अर्थेनेति यजुःशब्दस्य प्राश्लिष्टपठितत्वमात्रपरत्वमादाय निगदस्यापि
यजुःशब्देनैव निर्देशस्वीकारेण स्वरोवदोष इति भावः ॥ प्रयोजनैकत्वं यजुष्ट्वं यजुर्मात्रे प्रायश्चित्तं सर्वाणि यजूंषीति वाचस्तो
मे पारिप्लवशंसने विनियोगाच्च यजुर्भेदनुन्नत्वमुभयमिति तत्रार्थत्वं निगदश्च यजुर्यन्मंत्रजातं स्यादेवोच्चैस्त्वरूपधर्मविशेषादिति
31 शेषादिति ॥ ॥ अर्थैकत्वादेकं वाक्यं ॥ ॥ अधुनेति ऋचः सामानि यजूंषीति मंत्रगतऋगादिप्रातिपदिकार्थज्ञानानंत
रं बहुवचनावगतऋगादिभेदनिरूपणस्य प्राप्तावसरत्वादिति भावः ॥ यद्येवं ऋक्सामयोरपि अवांतरभेदो वक्तव्यः स्या
दित्यत आह तत्रेति । एकप्रयोजनमिति अर्थशब्दो अत्र नाभिधेयवाची किंतु प्रयोजनवचन इति वार्त्तिके प्रपंचितमिति भा
वः एकप्रयोजनत्वमात्रे कृते भगो वां विभजत्वर्यमा वां विभजत्वित्यादीनां पुरोडाशविभागप्रकाशनरूपैकप्रयोजनत्वा
देकयजुष्ट्वं स्यात्तद्व्यावृत्त्यर्थं विभागे सति साकांक्षत्वमिति तिनां वस्तुतः स्योनं ते सदनं करोमीत्यस्य च स्तस्य एकयजुष्ट्वं स्यात्त सोम०
स्मिन्सीदेति तच्छब्दबलेन विभागे साकांक्षत्वादत एकप्रयोजनत्वमिति तत्र पूर्वभागस्य सदनकरणप्रकाशनं उत्तरभाग ३१

स्य प्रतिष्ठापन प्रज्ञानं प्रयोजनमिति नातिप्रसंगः ननु यजुः परिमाणविचारे एकवाक्यलक्षणमसंगतमित्याशंक्य नाना
त्रैलोकक वाक्यसाधारणेन एवं वाक्यलक्षणमुच्यते किं तु तावदेकं यजुरित्येकयजुष्ट्व एवेत्याशयेन सूत्रे वाक्यशब्द
स्य यजुः परत्वं यजुःशब्दवाक्यशब्दयोरेकार्थत्वप्रदर्शनेनाह यागेति वक्तव्यत्वादिति यागप्रयोगे उच्चारणाप्यत्वा
दित्यर्थः ततश्चेदं यदपि यागसाधनत्वे पर्यवसितमिति भावः वक्तव्यत्वादित्यनेनैव यावदेकं यजुस्तावत्प्रयोक्तव्यं ननु
तदेकदेश इति प्रयोजनमपि सूचितं एवं च तत्प्रयोजनसूचनायैव सूत्रे यजुःशब्दे प्रयोक्तव्येऽपि वाक्यशब्दप्रयोग इति
नाकोशपत्तेः सूत्रकारस्येति द्रष्टव्यं ननु एतावतापि कथं यजुर्भेदावगतिरित्यत आह तस्मादिति वाक्यान्तरमित्यस्य वि
वरणं यजुरन्तरमिति एकयजुश्छेदे उक्ते ततोऽन्यद्यजुरन्तरमिति चार्थादुक्तमित्यर्थः ननु अश्विनोर्बाहुभ्यामित्यादेर्निर्वा
पे असमर्थत्वात्तत्र कथमेकप्रयोजकनवत्त्वमित्यत आह तत्र हीति अश्विनोरित्यादेरपि सत्त्वात् निर्वापार्थत्वं नवमे
वक्ष्यत इति भावः ॥ ॥समेषु वाक्यभेदः स्यात्॥ ॥ननु इषे त्वा ऊर्जे त्वेत्यनयोः परस्परनिरपेक्षार्थकत्वेन भिन्नार्थप्रकाश

सोम० ३२ नप्रयोजनकयोः पर्वन्यायेनैव यजुर्भेदस्य सुज्ञानत्वात्किमर्थमिदमधिकरणमित्याशंक्याह एकेति एवं च लैंगिकविनियोगा-
भावस्थले परस्परमैरपेक्ष्यसद्भावेपि न भेदज्ञानापक्षमते किंतु तत्र भेदाभेदयोस्साधारणमेवेत्याशयेन तदेव धर्मितावच्छेद-
कत्वेनाह वाचनिक इत्यादिना एवं च पर्ववदिह यजुर्भेदकाभावान्नात्र तद्भेद इति प्रत्यवस्थानात्संगतिर्बोध्या दृष्टार्थेति
वाप्यवस्थेत्यस्य वा युवतश्शीघ्रगामिनो भवथेत्येवं वत्सानां मातृसकाशादपाकरणात् पार्थप्रकाशनार्थत्वेन दृष्टार्थत्वा-
न्नन्नतः प्रागित्यर्थः एकार्थमिति तत्र साकांक्षाइति स्तोत्रशस्त्रादौ विनियुक्तानां नु प्रसिद्धो भेद इति तत्र सत्यप्यदृष्टे केचन
मंत्रैकमिति धोयं न नु विनियोगभेदाददृष्टमपि भिन्नमेव कल्प्यमित्यत आह निश्चित इति विनियोगभेदाघदृष्टं तदाभि-
घेत यदि विनियोज्यमंत्रस्य भेदः स्यादिह तु विनियोज्यस्य एकमंत्रत्वमेवादृष्टद्वयकल्पनाभीत्या निश्चितमिति पदचतुष्ट-
यस्यापि क्वचिदादि प्रतिकग्रहणेन क्वचिदन्त्यप्रतिकग्रहणेन चेत्येवमुभयत्र विनियोगादेकमेवादृष्टं कार्यद्वयेऽप्युपयोक्ष्य सोम०
त इति भावः आवर्त्तिष्यत इति यद्यप्यावृत्तिबलादेवादृष्टमपि भिद्यत एवं तथापि व्यक्तिभेदमात्रमदृष्टस्य न तु वैजात्यमित्य ३२

न्तात्पर्यं स्पष्टम् इति विनियोज्यस्वरूपाज्ञाने विनियोगस्यैवासंभवात् प्रथमं विनियोज्यमंत्रस्वरूपे पर्यालोच्यमाने परस्परनिरपेक्षत्व
यामेदस्यैव प्रतीतेस्तदनुसारेण परस्परनिरपेक्षत्वयैवादृष्टं कल्प्यमिति तदपि भेदेनैव कल्प्यमित्यर्थः एवं च पत्रमंत्रे कालिंगवशेना
वगतेतत्रैवांसप्रतीकग्रहणेन विनियोगो यथाग्नानः प्राण एतु परावत अंतरिक्षाद्दिवस्परि आयुः पृथिव्या अध्यमृतमसि प्रा
णाय त्वेति मंत्रस्याग्नात मसि प्राणाय त्वेति हिरण्यमभिव्यानितीति अंशस्य प्रतीकग्रहणेन विनियोगो न तु सर्वत्रेति भावः न च मंत्रा
णामित्यित्र तत एव धृष्टप्रागा हि यत्प्रमुपनिष्टतद्रसुपस्थानेकरणत्वेन विनियोगबलाद्रोणवृत्त्या प्रयोगमुक्तवाक प्रतिपाद्या
नामायुरादीनां फलत्वमग्न्यादीनां च देवतात्वे च कल्प्यत इति भावः तत्र पावत्तेति अध्याहारेणापि प्रकाशनार्थत्वसंभवेन तदे
वाग्नापितु पुत्रं न तु ध्वन्यात्मकरथघोषादिवत्तयाकथंचित्क्लेशेन करणत्वमुपपादयितुं पुत्रमन्यथा रौघादेगौणत्वमपिन
स्यादिति भावः ननु छेदनं पदं च तुष्टयेन प्रकाशयतामेवमनुमार्जनमपीति दृष्टार्थत्वेपि न मंत्रभेद इत्यत आह तत्रेति प्रथमावग
तनैरपेक्ष्यानुसारेण पृथगेव छेदनादिना दिप्रकाशकत्वं कल्प्यमिति भावः क्लृप्तिं बद्ध्रुत्वं वचनस्येति क्लृप्तीर्वा च यतीत्यत्र क्लृप्तिश

सोम० ३३ द्वेनमंत्रपरस्तत्रैवस्मरणपत्तेः किंतु क्लृप्त्यर्थपरएवतत्रश्रुतक्लृप्त्यर्थंबहुधावदंत्तंयजमानप्रयोजपतोध्वर्योर्व्यापारोविहितो
र्यधिजमानकर्तृकक्लृप्तिबहुत्ववचनविधिंकल्पयतीतिकल्पितेनविधिनायजमानकर्तृकक्लृप्त्यर्थबहुत्ववचनस्यविहितत्वा
33 त्तन्निर्वाहार्थंश्रापुर्यत्नेनकल्पनामित्यादेरायुरादिविशिष्टक्लृप्तिप्रकाशनपरत्वमेवनत्नुभगोवांविभजंत्वित्यादेर्विभागसा
मान्यप्रकाशनार्थत्वमिवक्लृप्तिसामान्यप्रकाशनमात्रार्थत्वमितिप्रकाशयमानायुरादिविशिष्टक्लृप्तिविशेषरूपार्थंभे
देनतत्रापिमंत्रभेदआवश्यकइत्यर्थः प्रयोजनंपर्ववदेकैकत्रक्लृप्त्यस्मप्रयोगाप्रयोगलक्षणांक्लृप्युदाहरणेनप्राणाय
त्तेनकल्पनामित्यादौमंत्रेषैकत्वस्यावृत्तिः पर्वपक्षेसिद्धांतेतुपत्स्यैवमंत्रेषसत्वमात्रस्येवावृत्तिर्मंत्रभेदादितिमंत्रार्थस्त्रस
मेषपरस्परानिरपेक्षत्वपानुल्येषुपत्नुर्भेदस्यादिति॥ ॥अनुषंगोवाक्यसमाप्तिःसर्वेषुतुल्ययोगित्वात्॥ ॥नन्वध्याहारा
नुषंगचिंतायाःकथमत्रसंगतिरित्यतआहआत्रापीतिपरिपूरणोतिआकांक्षापूरणसमर्थइत्यर्थः सर्वेषामर्थेनेतिइदंचसि सोम०
द्धांतयुक्तिरूपंनकोष्ठांतर्गतमितिध्येयंअस्याश्चिंतायाःपत्नुःपरिमाणचिंतापर्यवसायित्वमाहअध्याहारइति।अस्तीतिअत्ने ३३

नैव पूर्वपक्षे मंत्रमात्रे एषणायाश्चिन्तामावस्सिद्धांते तु तत्सद्भावः यद्वा अध्याहृतस्यामंत्रत्वात् पूर्वपक्षे उच्चारणां प्रयोगका
लेनानुष्ठेया बुद्धौ प्रतिसंधानमात्रेणाप्यर्थप्रत्यायकत्वसंभवात् एवमेषैत्वेत्यादौ छिन्धीत्यादिकं प्रयोयदं प्रयोगका
लेयाज्ञिकैर्नानुष्ठीयते अनुषंगे तु मंत्रत्वात्प्रयोगकाले उच्चारणमपि कर्तव्यमिति प्रयोजनमपि सूचितं अध्याहृतस्याप्यु
च्चारणमस्त्येव याज्ञिकानां तत्त्वनास्थयेत्याहु ४ न च स्वप्रतिग्रहे व्याधिकरणान्यायेन वैदिकाकांक्षापरिपूरणार्थत्वस्य
न्याय्यत्वात्कथं पूर्वः पक्ष इत्यत आह तन्नेति यदि हि प्रकारांतरेणाकांक्षापरिपूरणं स्यात्तदा गत्यंतराभावान्निबद्धस्यापि वै
दिकस्यानुषंगआश्रीयेत संभवति च लौकिकेनापि तत्परिपूरणं तस्माल्लौकिकसंभवे निबद्धस्य वैदिकस्यान्यत्रनयनं न यु
क्तमिति स्फोरयितुं श्लोके व्युत्क्रमेणाव्याचष्टे लौकिकेति नन्वाकांक्षापरिपूरणार्थं कल्प्यमानउपस्थितत्वात्तत्पूर्वं
र्विहित्यादिरेव कल्प्यः ननु प्रमाणप्रवृद्धतरास्मान् पात्वित्यादिर्यु ४ कश्चिच्छेषस्तस्यानुपस्थितत्वादेवं च बलाद्वैदिकस्यैव
नयनमापततीत्यमित्यत आह मानीयमानो वेति यथा न सुच्चारणतो हितस्य वैदिकत्वानन्तु द्वे देतन्न श्रोपास्थितस्य कल्पनेपि

स्था

सोम०
३४
34

तस्यवैदिकसादृश्यमात्रंननुवैदिकत्वमित्यर्थः॥ननुवैदिकमाम्नानंयदभिप्रायंतदनुसारेणानयनेवैदिकत्वंनहीयतेअ
तस्यवसन्तवाकादौअसावितिसर्वनामाम्नानस्ययजमाननामधेयाम्नानाभिप्रायकत्वेनैवासमाम्नातस्यापियजमानना
मधेयस्यवैदिकत्वमिष्यतइत्यतआहनचसर्वेतिसकृदितिसकृदर्थप्रत्यायकत्वमात्रेणवाक्यशेषनैराकांक्ष्यात्सर्वार्थ
त्वेप्रमाणाभावादितिभावः आनंतर्येणोत्पन्नेनतत्तीयव्यावृत्तिंदेशभेदेनोत्पन्नेनद्वितीयव्यावृत्तिंचाहप्रथमस्येतिनमस्या
दितितश्चसत्यथानंतर्येद्वितीयेनयघनन्वयस्तदाआनंतर्यमचोदनेतिन्यायेनतत्तीयान्वयोदूरापेतइतिभावःस्यादे
वंयदिवैदिकस्याचयायोग्यतादिहतुसर्वैरपितस्यान्वययोग्यत्वेतिवैदिकस्यैवान्वयइत्याशयेनाहयथेतिसर्वार्थत्वेतत्तदं
तेपुनःपुनःपाठस्यादितिशंकामपाकरोतिसर्वानंतरमितिबुद्धिविपरिवृत्तिमात्रेणवक्ष्यमाणाकांक्षादित्रयेणसर्वैरन्वयासि
द्धेस्सर्वांतेप्रत्येकमसकृत्पाठोनर्थकइत्यर्थः एवंचसत्यग्रग्रह्यमाणविशेषत्वात्सर्वार्थमेवाम्नानमित्याहपुनरितिएवंचवै रा॰म॰
दिकलाभेत्यतिनलौकिकंग्रहणमभ्यप्रतिग्रहवदितिश्लोकंव्याचष्टेएतावतेतिप्रागुक्तविशेषग्रहणंनिराचिकीर्षुराहशब्दो ३४

त्ति चेत्तितेनापीति द्वितीय्य: स्वापेक्षितदेशेऽपठितमपि बुद्धिसन्निधानमात्रेण परिवृत्यापुरस्तात्परिठितं ग्रहणीत्यर्थः एवं
च द्वितीय्यसंबंधे सति तस्याप्यन्यवधायकत्वादानंतर्यं कृतविशेषण्य हरणमसि द्वमित्याह तत्संबंधादिति तनुपाठत आ
नंतर्यस्य ग्रहणासंन्निधानस्यान्वयबोधप्रयोजकत्वात्पूर्वव्यवहितेनान्वयेइत्याशंक्य तदेवासि द्वमित्याह तस्माद्इति एवं
चैकत्रनिबंधनेनेतरान्वयप्रतिकूलमित्याशयेनोपसंहरति तस्मादिति ॥ ॥ अथवा ॥ ॥भाष्येऽप्यवेत्यादिनाऽन्य
स्यैव वर्णकांतरं कृतं पर्व वर्णके विषयाद्भेदं दर्शयन्नत दाह एवमिति ननु सर्वेषां यजमानपवनार्थत्वे विकल्पस्यादि
त्युक्त आह सत्यपीति षभिः पावयतीति वचनात्समुच्चयः यथा चतुर्भिरभ्रिमादत्त इत्यत्रेति भावः पर्वत्र हि शेषिणां सा
कांक्षत्वानुसारेण सवार्थत्वं वाक्यशेषाम्नानस्येत्यनुषंगोप्युक्त इह तु नैवमिति पर्व वैषम्ये पत्राण्यवस्थानात्संग
तिरिति स्तु च यन्न पर्व प्रसमाह तत्रेति क्रियेत्यादनुषंगे च चित्यत्यादिपदानामपि सर्वत्रानुषंगस्यात्तथाप्रकरणा
तरगतपवनक्रियासंबंधोपि स्यादिति भावः सत्यं शेषिणां निराकांक्षात्स्यापि शेषस्तावत्साकांक्षस्तस्य तत्करणा

सोम० ३५
35

कानुष्ठेयपवनक्रियाप्रकाशनद्वाराप्रकरणोन्निवेशो वक्तव्यः सा च क्रियात्रिष्वपि मंत्रेष्वेकैव क्लृप्तोर्यजमानेवाच्य
पतीत्यादिवत्क्रियाभेदे प्रमाणाभावाच्चित्पत्यादिपदानानुकर्त्रादिवाचकानां प्रतिमंत्रं कर्तृघंतराम्नानान्नानुषं
गः न चात्रापि सन्निहितकर्तृविशेषविशिष्टपवनक्रियपैवान्वयोस्तु तत्तश्च नानुषंग इति युक्तं करणप्रकाशकमंत्र
स्य क्रियां विना साकांक्षत्वात्प्रकरणोन्निवेशासंभवेन तन्निर्वाहार्थं क्रियास्वरूपमात्रमेवापेक्षितं न तु कर्तृविशेषवि
शिष्टत्वमपीति कर्तृविशेषविशिष्टत्वानादरेण पवनक्रियासामान्यरूपेणैव वाक्यशेषान्वये सति प्रधानान्नत्या
गुणावृत्तेर्न्यायप्राप्तत्वादनुषंगोत्रावर्जनीय इत्याह पुनानु शब्देति प्रकरणात्ज्योतिष्टोमापूर्वसंबंधिपवक्रि
यान्वयान्नातिप्रसंग इति भावः प्रयोजनं त्वाह तन्नप्रयोगात्प्रयोगरूपं स्तन्त्रार्थं स्तु अनुषज्यत इत्यनुषंगः सवा
क्यसमाप्तिः वाक्यपरिसमाप्तिः वाक्यपरिसमापकः सर्वेषु शेषिषु वाक्यशेषस्य योगपद्येनान्वयादिति॥ ॥न्य
वायान्नानुषज्येत॥ ॥अनुषंगापवादात्संगतिः पर्वोत्तरपक्षकथनेनैव संशयस्सुगम इति तमुपेक्ष्य पूर्वपक्ष

राम० ३५

माहगच्छतामितित्तिथाचसकृ ऊच्छतामित्याम्नानस्यस्वयोग्यपावदर्थत्वकल्पनादिहाप्यस्यनुषंगइतिभावः पुगप
त्सर्वान्वयेप्यनुषंगोभवतिप्रकृ तेचासंबंधिपदव्यवधानेसति सन्निहितमात्रेणैवान्वयोनगच्छतामात्रेणांतराबु
द्धिविच्छेदादित्याह पर्वत्रेत्ति संयजत्रैरंगानीत्यत्रेत्यर्थः नचसंयजत्रैरंगानीत्यत्रगच्छतामित्यस्य वचनस्यासंबं
धेपिधानतोस्संबंधसंभवात्तन्मात्रस्यसर्वत्रानुषंगोस्त्विति युक्तं प्रकृतिप्रपयोः परस्परान्वितयोरेवपदांतरेणासं
बंधइतितयोरेकस्यासंबंधेसत्यपरस्याप्यसंबंधनियमेनधातुमात्रस्यानुषंगायोगादितिभावः प्रयोजनंपूर्वा
धिकरणप्रथमवर्णकवद्द्रष्टव्यं॥ ॥ ॥इतिश्रीनिदलकुलतिलकमल्लरूभट्टमहोपाध्यायतनूभवस्यवै
कदाद्वियज्वगुरुचरणानुजस्यसोमनाथसर्वतोमुखयाजिनः कृतौ शास्त्रदिपिकाव्याख्यायांमयूखमालि
काख्यायांद्वितीयस्याध्यायस्यप्रथमः पादः॥ ॥ ॥अंशशब्दांतरेकर्मभेदः कृतानुबंधत्वात्॥ ॥पाद
भेदमानेनपंचसप्तघपित्तुवृत्तवर्त्तिष्यमाणोकीर्तयतिगतमितित्रयीच्छतोधात्वर्थकरणत्वेतत्त्वस्ततशास्त्रा

सोम० धिकरणांतैरधिकरणैरस्य परिकरविचारितेन तत्प्रसक्तं मंत्रगतत्वाविधायकत्वं तदनुप्रसक्ते मंत्रलक्षणादीति विवेकः इ
३६ दानीमिति प्राप्तावसरत्वादिति भावः कर्मभेदः क्रियाभेदो भावनाभेद इति पादवत्तलक्षणार्थ इदानीं व्युत्पाद्यत इत्युक्त्वा
36 अस्मिन्नेव पादे प्राधान्येन कर्मभेदो व्युत्पाद्यत इति सूचयति तत्र प्रत्युपोद्घातः पूर्वस्य पादस्यार्थ ४ अस्य तु कर्मभेद
इति पादभेदो द्रष्टव्यः प्रथममिति शब्दांतरस्थले धात्वर्थभेदस्य स्पष्टत्वेन तन्नेदनिबंधनभावनाभेदस्य सुखेनोपपा
दयितुं शक्यत्वादिति भावः॥ प्रकरणांतरविषयाद्यवच्छेदायाह एकप्रकरणगतानि जिवस्कतनस्तययाएकप्रकरणा
गतेषु सोमेन यजेत हिरण्यमात्रेयाय ददाति दाक्षिणानि जुहोति प्रउगं शंसति आज्यैः स्तुवत इत्यादिषु वक्ष्यमाणला
घवप्रत्ययैक्याभ्यां भावनायाएकत्वे एवं दर्शपूर्णमाससोमाग्निहोत्रादिवाक्येषु सर्वेष्वप्येकाभावनेति तन्नाभ्यामेवला राम०
घवप्रत्ययैक्याभ्यां कर्तुं शक्यत्वेन सर्वत्र एकस्याएव भावनायाः प्रत्यभिज्ञाने सति असंन्निधानलक्षणप्रकरणानरस्या ३६
भावात्तत्र तत्र भावनाभेदशंकावकाशः एवं चैकप्रकरणगते धात्वाख्यातेषु भावनैक्यव्युत्पादितेन तत्समानन्यायतया

न्यत्रापि भावनैकत्वं वयमेव ज्ञास्यन्तीत्याशयेन मंदबुद्धीनां सुबोधाय एकप्रकरणगतानीत्युक्तमिति ध्येयं ननु
प्रत्ययस्यैकत्वात्कथं शब्दान्तरत्वमित्यत आह तत्र सत्यपीति एवं च यजघपिपपाप धातुनिष्पन्नाख्यातेष्वपि स्वरूप
तः पदभेदोऽस्ति तथापि तत्र भावनाभेदः प्रयोजकधात्वर्थभेदाभावात् छागाहृत्तपेक्ष पर्यापधातुनिष्पन्नानीति विशे
षितमिति ध्येयं ननु केवलस्य प्रत्ययस्य क्कापि वाक्ये अश्रवणादुत्पत्ति। ०शिष्टैकधात्वर्थावरुद्धायां धात्वंतरार्थान्वया
संभवात्कथं भावनैक्यं न च फलवाक्ये धात्वर्थाविवक्षया केवलभावनाविधिरन्यत्र तु गुणविधिरिति युक्तं विनिगम
नाविरहात् पदस्यैकप्रसरत्वेन फलवाक्यव्यतिरिक्तवाक्येषु फलवाक्योत्पन्नभावनाप्रत्ययेनानूद्य प्रक्रान्यात
त्रे धात्वर्थः करणत्वेन विधीयत इति कल्पनाया अत्यंतायुक्तत्वाच्च तस्माद्भावनैक्यकोटेरनुमेयत्वात्संशयपरावा
नुपपन्न इत्याशंक्य सर्वेषां वाक्यानामेकवाक्यत्वाभ्युपगमेन सर्वविशिष्टभावनाविधिसंभवात् भावनैक्यको
टेरन्वेषः संभवतीत्याशयेन संशयमाह तत्रेति ननु भावनाभेदेऽप्यपूर्वैक्यमस्त्वत आह एवं भाष्यकारेण भावनाभेदमंगी

सोम० ३७ त्यापूर्वैकोयेन पूर्वपक्षी विवर्णितः तत्तस्यैकरूपमनेकापूर्वकल्पनाप्रसक्तिरित्युत श्लोकं व्याचष्टे यत्लेति भाष्यं च यथाश्रुतं वार्त्तिके दू
षितमितिभावः ननु शब्दान्तराद्भावनाभेदसिद्धावनेकापूर्वकल्पनागौरवमपि प्रामाणिकत्वान्न दुष्यतीत्याशंकायां शब्दान्तरस्य भेद
कत्वमेवानुपपन्नं प्रत्ययैक्येन भावनैकस्यैव प्रतीतेरित्याह किं चेति त्र्यक्षशंकोत्तरत्वेन पूर्वार्धं व्याचष्टे यद्यपीति ननु भावना
याश्च पूर्वं प्रतिगुणत्वेपि तद्भेदाद्यथा पूर्वं भेद एवं गुणभूत धात्वर्थभेदादपि भावनाभेदः किं न स्यादित्यत उत्तरार्धं व्याचष्टे यदी
हीति धात्वर्थो त्वतिगुणभूताधात्वर्थभेदाद्दपि भावनाभेदः किं न स्यादित्यत उत्तरार्धं व्याचष्टे यदी हीति धात्वर्थोत्प्रतिगुणभूता
धात्वर्थफलकेत्यर्थः भावनाप्रधानत्वादिति क्वाप्याख्यातेन भावनायाः क्रियात्वेन प्रतिपादनात्तत्र कारकत्वमेव धात्वर्थस्य नत्वप्र
र्वत्वस्फुत्वत्वेमित्यर्थः स्तत्रश्चफलापवर्गित्वात्क्रियाणां क्रियाभेदे फलभेद आवश्यकः ननु कारकभेदे क्रियाभेद इति भावः भे
वे देवं पादिसर्वविशिष्टभावनाविधानेसंभाव्येत उक्ते ते च प्रत्ययस्यैकत्वेपि तस्यैकेवलस्याप्रयोगात् यज्ञिपरस्मुपामाराः प्रत्ययो सोम० ३७
यागविशिष्टां भावनां प्रतिपादयन्तीति यागविशिष्टतयोत्पन्नायां भावनायां दानादेरन्वयानुपपत्यातत्रापि दानादिविशि

ष्टभावनांतरमेवविधेयमितिसर्वधात्वर्थविशिष्टैकभावनाविध्यासंभवाच्छब्दांतरेभावनाभेदइत्यावश्यकइत्याह प्रत्ययेति
शाइतितत्तदर्थानुरागेणोत्पन्नेनयथाज्ञानस्यज्ञेयरूपानुरंजकभेदे४१वमिहापिभावनायाअनुरंजकधात्वर्थाधान
६३ निरूपणानयातद्भेदोत्स्यादिदृष्टमितिदर्शयतिननुयथासम्यक्प्रालंबनस्यानेकविषयानुरक्तस्यापिनभेद४१वमिहिकिंनस्या
दित्याशंकायांतत्रसर्वेषांयुगपत्त्रिद्रियसंनिकर्षासंभवत्येकज्ञानानुरागःइहतुनयुगपत्नानाधात्वर्थानामेक
भावनानुरागस्संभवतीतितस्मात्संभवीविरहदित्यांतव्यतिरेकमुखेनाहनिष्पाद्येनेतिसः अन्यमार्थोधातुभिर्धात्वर्थैः ननु न
याबेवाकथंयुगपत्संबंधइत्यपेक्षायांयथाक्रमेपदश्रुतिलक्षणप्रमाणस्यवाक्यलक्षणप्रमाणस्यचविशेषादित्याशयेनक्षि
पत्यद्रव्यानीयश्लोकोव्याचष्टेनहीति॥ प्रकृतेनान्भयव्यतिरेकाभ्यांयुगपत्संबंधइत्याहप्रत्येकमितिननुप्रत्येकंप्रत्ययश्रवणेपि
युगपदन्वय४किंनस्यादित्यप्रयोजकत्वशंकायांप्रबलदुर्बलप्रमाणोपस्थितत्वान्नेहयुगपदन्वयस्संभवतीत्युपपादय
तितयाहीतिसोमेनयजेतदाक्षिणानिजुहोतीत्यत्रयो४स्पष्टमेकवाक्यत्वाप्रतीतेरपरितोषादाहप्रकरणेनेतिसन्निधानमेने

सोम० ३८

त्यर्थः ननु सत्यपि दौर्बल्ये एकस्य करणत्वेनैतरस्यांगत्वेन निवेशे विरोधाभावान्न बाध इत्यत आह करणांशे तिसर्वेषामेक
भावनान्वये विनिगमनाविरहात्सर्वेषामपि करणत्वमेव स्यान्न त्वेकस्य करणत्वमितरस्यांगत्वमित्येकांशोपनिपाता
दस्ति विरोध इत्यर्थः अनेनैव सर्वेषामेकभावनान्वयपक्षे यागदानहोमादीनां समप्राधान्ये भावनाभेदे त्वंगांगिभाव इ
त्यधिकरणप्रयोजनमपि सूचितं ननु समुच्चयसंभवान्न विरोध इत्यत आह समुच्चय इति समर्थः पदविधिरिति प्रकृ
ति प्रत्ययात्मकपदविधिस्सामर्थ्यापेक्षस्य चासमर्थत्वात्सामर्थ्यबलादेव नैरपेक्ष्यमवगतं तत्समुच्चयेत्पत्ति विरुध्येते
त्यर्थः नच यथाग्नेयेदात्र इत्यादि पृथक् विभक्तिश्रवणेपि दात्रत्वविशिष्टाग्निलक्षणादेवताकारकमेकं लब्धं तद्वदिह किं न स्या
दिति वाच्यं दात्र शब्दात्परस्या विभक्तेर्विशेषणविभक्तित्वेन साधुत्वार्थतया तत्र सत्यपि पृथक् प्रत्ययश्रवणे विशिष्टैककारक
विधिस्संभवति प्रकृते तु विशेषणविशेष्यभावाभावान्नोभयं विशिष्टविधिरिति वैषम्यादिति भावः एवं च विशिष्टविध्यसंभवाद
नुरंजकधात्वर्थभेदाद्भावनाभेद आवश्यक इति प्रथमश्लोकं व्याचष्टे नेनेति सत्वार्थकत्व शब्दांतरे अयपर्यायधातुभेदे कर्मभेदो भा

सोम० ३८

वनाभेदः धात्वर्थेन भावनायाश्च संबंधस्याविशेषेऽस्य कृतत्वादिति ॥ ॥ एकस्यैवं पुनश्श्रुतिः ॥ ॥ इदानीमिति ॥ यथाशब्दा
न्तरस्य पदश्रुत्या प्रतीयमानार्थमात्रमवलंब्य भेदकत्वं एवमभ्यासस्यापीत्यनेन सादृश्येनाभ्यासस्यैवेदानीं भेदकत्वमुत्पाद
नं युक्तं ननु संख्यासंज्ञादीनां तेषां विधिपदस्थत्वाभावेन वाक्यगम्यसंबंधमपेक्ष्य भेदकत्वादिति भावः ननु अभ्यासो नाम विधिपु
नः श्रवणं तत्र श्रवणान्तरस्य शब्दान्तराद्धि विकृतं पश्याम इत्यत आह विधेरिति तत्र धात्वर्थभेदेन विशेषितत्वान्नातिप्रसंग इति भा
वः ननु पूर्वत्र यथा प्रत्ययैकत्वेपि तद्धर्मभेद एवमिहापि किं न स्यादित्याशंकां निराकुर्वन् संगतिं च सूचयन् श्लोकं व्याचष्टे
प्रत्ययांशस्येतीति टस्थः शंकते नन्विति भवेदेवं यदि कर्मभेदावगमात् प्राक्सामित्तनूनपादादिशब्दानां संज्ञात्वमवगतं स्या
त्तत्र यद्यपि कर्मभेदावगमाभावेपि समिष्टस्य संज्ञात्वावगतो लितयापि तनूनपादादीनां संज्ञात्वावगमः कर्मभेदावग
माधान इत्यन्वयव्यतिरेकाभ्यामुपपादयन्न संज्ञयाभेद इति परिहरति नेति देवतामिति कर्मभेदावगमाभावे संज्ञात्वानु
पपत्तेर्नैवमदशमयोर्वक्ष्यमाणसंज्ञात्वासंभवात्तदा यद्यपूर्वपक्षो करीत्यादेवताविधिरेवावतिष्ठत इति भावः यागावगमादिति या

सोम० ३९ 39 गमेदावगमाहित्यर्थः ४ अव्येषज्योतिरितिवाक्ये यागशब्दाभावात्त यागभेदावगमे विनासंज्ञात्वात्वावगमः स्पष्टः उद्भिदायजेतेत्या
दावपिधानात् यागार्थ्यविप्रकृष्टविधादिदोषप्रसंगाद् गुणविध्यसंभवादेव संज्ञात्वनिश्चय इति तत्रापि यागभेदावगमं विनैव संज्ञात्वा
वगम इति भावः तेनेति उपपदानां भेदज्ञानानौपयिकत्वेनेत्यर्थः अपोद्यत्य अतं त्रीहीत्यननुन यद्यभ्यासेन कर्मभेदस्ताहि विधिपुनः
श्रुतेरानर्थक्यं स्यादिति शंकायां गुणविधानार्थत्वान्नानर्थक्यमिति परिहारं वक्ष्यन् गुणविधित्वमुपपादयतीति तत्रेति नन्वेवमपिगु
णादेव भेदः स्यादिति तत्र दस्यैव शंकां निराकरोति न चेति दध्यादिनेति अग्निहोत्रं जुहोतीति इत्यास्य युक्तत्वयोत्पन्नकमानुवा
देन दध्ना जुहोतीत्यादिभिर्विधीयमानदध्यादयः प्रसक्तिवदित्यर्थः ४ ननु मंत्रवर्णादेवतन्न्यूनपादादिप्राप्तेर्गुणविधिरनर्थक इ
त्यत आह सत्यपीति मन्त्रवध्ययनशेन प्रयोजनवदर्थपरत्वावगमादानर्थक्यमयुक्तमित्यत आह न हीति ४ एकस्यैव यागस्य मं
त्रवर्णिकानेकदेवतालंबनेन सत्त्व इत्यर्थः तया पुनः श्रवणोपपत्तेर्नाप्रमाणप्रसक्तिः किंतु प्रवृत्तिविशेषकरत्वाभावात् स्तुत्य सोम० ३९
र्थक्यमात्रं तत्र च प्रत्यभिज्ञाबलान्न्याय प्राप्तत्वेन न दोषावहं न हि प्रमाणस्वरसात् प्रतीयमानं प्रयोजनानुसारेण परित्य

त्कुं शक्यमित्यर्थः ४९ एवं चास्मिन्नपूर्वपक्षे चतुर्दशपौर्णमास्यामाहुतयो हूयंत इति संख्यादर्शनं वैकल्पिकदेवताभेदमादायो
पपादनीयमित्याशयः तदेकत्वादिति धात्वर्थैकत्वेपि दध्नेंद्रियकामस्येत्यादौ यथा भावनापूर्वयोर्भेदस्तद्वदिह भावनाभे
दप्रयोजकाभावादिति भावः यदुक्तमानर्थक्यमप्यंगीकृत्यपक्षेन्यार्थत्वं स्वीकार्यमिति तन्निराकरणपरत्वेन पूर्वार्धं व्याचष्टे
पत्रावदिति । नन्वेवं विद्वद्वाक्यान्वेच नुवादकत्वं न स्यादित्यत आह तच्चेति तत्र बलवद्बाधकं रूपालाभ इति भावः नन्विहापि प्रत्य
भिज्ञैव बाधिकेति शंकानिराकरणमनसि निधायाह यत्वित्यादिना पुनरिति तन्वच्छब्दाद्यभावादिति भावः गुणविधाननिराकरण
र्थत्वेनोत्तरार्धं व्याचष्टे यदुक्तमिति पदलक्षणापेक्षेत्येतद्धात्वर्थमात्रान्वयाभावनायाः प्रत्ययलक्षणमुक्त्वा विधेयत्वावग
मादिति ध्येयं ननु दध्नाजुहोतीत्यादौ संनिधिकृतप्रत्यभिज्ञाबलादेव धात्वर्थभावनयोधिं बाधित्वा पदांतरार्थस्य दध्ना
देर्विधेयत्वमंगीकृतं तद्वदिह किं न स्यादित्याशंक्य वैषम्यमाह यदि हीति दधिविशिष्टकर्मांतरविधिनाप्युत्पत्त्यनुग्रहमाशंक्या
ह अनेकेति सत्वार्थस्त्वेक एकस्य पुनश्श्रुतिरप्येवं शब्दांतरवद्भेदिकाद्यविशेषान्न दध्यादिवद्विधेयविशेषाभावादन्यथा हि वा

सोम० ४० क्यमेवानर्थकं स्यादिति॥ ॥प्रशंसानुपौर्णमास्यांरूपावचनात्॥ ॥तावब्रूतामितिइदंवाक्यंउपांशुयाजस्यकालविधायके
40 मितिदशमोयांत्येऽस्य पकारोवक्ष्यतिएवंचास्यवाक्यस्याग्नेयादिवाक्यवत्कर्मोत्पत्तिपरत्वाभावेपिरात्तद्वाक्यबलेनोपांशुयाज
स्यविधद्वाक्यगतपौर्णमासीयदेनफलवाक्यगतपौर्णमासयदेनचपरामर्शात्फलसंबंधसिद्धिरितिदुपयोगितयास्योदाहरणात्व
मितिध्येयंयथाचतावब्रूस्तावब्रूतामितिवाक्यबलादुपांशुयाजस्यफलसंबंधसिद्धिस्तथादशमएववक्ष्यामः राजसूयेतियथा
स्वाराज्यकामोराजसूयेनयजेतेतिवाक्यस्थपजिनासन्निहिताइष्टिपशुसोमयागास्सर्वेफलंप्रतिविधीयंतेतद्वदित्यर्थः सम
प्रधानाइतिप्रधानशब्दोभावपरः तत्रश्चसमंप्राधान्यंयेषामितिबहुव्रीहिः तेनपुलिंगोपपत्तिः यद्वासमंप्रधानंफलंयेषामि
तिबहुव्रीहिर्बोध्यः तन्निमित्तेतिकालयोगनिमित्तेत्यर्थः एवंसंज्ञकयोरितिपौर्णमास्यमावास्यासंज्ञयोरित्यर्थः तत्रइतिसा
र्वविभक्तिकस्तसिल्तदर्थमित्यर्थः वार्त्रघ्नीइत्यत्रहननप्रकाशकपदयुक्तेऽग्निर्वृत्राणित्वंसोमेत्येतेऋचौएवपञ्चत्योवृद्धि सोम० ४०
प्रकाशकपदयुक्तेऋग्भिः प्रत्नेनसोमगीर्भिरित्येतेऋचौविधातुमितिवृधन्वतीमित्यर्थः वार्त्रघ्नइत्यादिनारूपलाभयस्येरूप

शब्दो देवतामात्रपरः यदि वार्त्रघ्नादिनाग्नेयादिवाक्यैर्वी रूपं लभ्यते तदा विद्वद्वाक्यद्वयस्य विधायकत्वे फलवाक्यस्य
यजिनासर्वेषां परामर्शात्कालसंयुक्तानामकालसंयुक्तानां च सर्वेषां प्राधान्यं यदि च न लभ्यते तदा विद्वद्वाक्यद्वयस्य
विधायकत्वासंभवात्कालसंयुक्तकर्मानुवादकत्वे सति तद्बलेन कालसंयुक्तानामेव फलसंबंधात्प्राधान्यं इतरेषां तु फ
लवद् फलन्यायेन तदंगत्वमिति फलफलिभावो बोध्यः इयांस्तु विशेषः आग्नेयादिवाक्यै रूपलाभपक्षे आग्नेयादिवा
क्यानां कर्मविधायकत्वाभावात् विद्वद्वाक्यविहितकर्मणोः प्रयाजादीनां च समप्राधान्यं वार्त्रघ्नापौर्णमास्याविव्यादिवा
क्याद्रूपलाभे तु आग्नेयादिक्यानां कर्मविधायकत्वात् विद्वद्वाक्यविहितकर्मणोराग्नेयादिकर्मणां प्रयाजादीनां च स
मप्राधान्यमिति तत्राग्नेयादिवाक्यै रूपं विधानुं शक्यं तेनेत्येतन्मात्रार्थत्वेन संशयो न रमाहन्तरमाहततोपीति न नु सम
प्राधान्यं गांगिभावविचारो भेदलक्षणे न संगतस्तत एवाग्नेयादिवावाक्यानामुदाहरणत्वेनोपन्यासोप्ययुक्त इ
त्यभ्राह अत्र चेति तत्र प्रथमं वार्त्रघ्नापौर्णमास्याविति पादिमंत्रविधिबलाद्देवतालाभ इति पक्षावलंबनेन पूर्वपक्ष

सोम॰ ८१ माहतत्रेति विधिपुनश्श्रुतेरानर्थक्यायत्पापर्वाधिकरणन्यायेन विद्धाक्यद्वयस्य विधायकत्वे सत्यभ्यासात्कर्मान्तर
त्वमित्यर्थः ननु सर्वस्मैवा इति वाक्यस्य वैशब्दोपबंधेन विधायकत्वासंभवाद्यात्र घ्नीपौर्णमास्यामिति वाक्यस्याज्यभाग
योरनुवाक्याव्यवस्थार्थत्वस्यापि पश्चानर्थसंबंध इति न्यायेनैवस्य मारणत्वाच्च न द्रव्यदेवतालाभ इति पष्ठ इति किं पुनरि
तिश्रसंयुक्तेति प्रयोजनविशेषेणोत्तिशेषः लिंगसामर्थ्येन वचनांतरक्रियापोगाद्वृत्तेवाक्योपकल्पितात्गुणद्रव्यक
र्थभावे हि तिप्रकृताः क्रियाइत्युक्तेः कथं ध्रौवाज्यस्य प्रकरणविनियोज्यत्वं लिंगं च स्वतो न प्रमाणमिति वाच्यं चतु
र्ध्रुवायां गृह्णातीति ग्रहणक्रियायाः प्रकरणग्रहणांतत्वंस्का यद्द्रव्यस्य प्रकरणपंगत्वं विनानुपपन्नमिति न तु एवं
द्रव्यस्यापि प्रकरणविनियोज्यत्वस्य प्रकृते अवश्यं वाच्यत्वादितिभावः अन्यथादृशमेवस्यमारणमुपांशुयाजार्थत्व
मपि न स्यादित्याशयेन दृष्टांतमाह उपांश्विति यद्वा द्रव्यस्य प्रकरणग्राह्यत्वानुपपत्तेरेवास्वरसादाह वचनाद्धेति रामं॰ ८१
इदं च वचनं स्पष्टतादर्थ्यं चतुर्ध्रुवे लद्विधायकमेव वैशब्दश्रवणात्तेप इत्याहौन्यघवद्वन्नविधिप्रत्ति बंधक इति भा

व॥ नचैवंवचनमश्रुतद्रव्येष्वाज्यप्रापकमेवनभवतितस्यलिंगप्रकरणाभ्यामेवप्राप्तेः किंतुयागरूपा[illegible]राग
मिवायागारूपाराणामपिद्रव्याकांक्षाविशेषात्सदनकरणादिष्वपितत्प्राप्तौतत्परिसंख्यार्थमितिवाच्यंकेषांचि
द्ध्रौवाज्यस्यलिंगप्रकरणाविनियोज्यत्वसंभवेपितदपेक्षयावचनस्पर्शीघृतवृत्तिकत्वादिवंचसदनकरणादि
षुध्रौवपरिसंख्यार्थिकैवेतिनकाप्यनुपपत्तिः देवतापिचैतन्नीयेहिश्चाग्नेयादिकर्मसुवाक्येनवार्त्रघ्नादिमं
त्रविधिर्नसंभवतितेषांस्वक्रमाम्नातमंत्रांतरावरुद्धत्वादाग्नेयादिषुकेवलस्यसोमस्यदेवतात्वाभावेनसोमदे
वता॥ कानुवाक्यायुगलस्यतेषुविध्यसंभवाच्चततः प्रबलेवाक्येनाग्नेयाघर्येतयाविध्यसंभवाद्दुर्बलेनापिसंनि
धिनाज्यभागांगत्वमंगीकृत्यवचनेनमनुवाक्यायुगलद्वयस्यव्यवस्थार्थमितिवक्ष्यते॥ विदग्धाक्यविहितकर्मार्थ
तयामंत्रविधिरितिपक्षेतादृशबाधकाभावाद्दुर्बलेनसंनिधिनाज्यभागार्थत्वमंगीकृत्यव्यवस्थार्थत्वेनकल्प
नीयंकिंतुपौर्णमास्यमावास्यासंज्ञाभ्यांविदग्धाक्यविहितकर्मणोः प्रभिज्ञापमानत्वात्तत्रैवमंत्रविधिस्तदाधिक

सोम० ४२

42

ररणापर्वपक्षोक्तरीत्यास्वीकार्यः एवं च वाघ्नी पौर्णमास्यामिति पौर्णमासीसंज्ञके कर्मणि कार्त्रेघ्नेमंत्रद्वयस्य वि
धिबलादेकसंत्रोनुवाक्याऽअपरस्तुयाज्याऽअनूच्यते इत्यस्यानुवादत्वाद्याज्यायामपि प्रैषपक्षाद्भावमाश्रित्यानु
शाब्दत्रपपादनीयः एवं वृधन्वती आमामावास्यायामित्यत्रापि॥ आज्यभागयोस्तत्तो हो चतुरग्निषोमावित्यु
पक्रम्याम्नातेन यस्यैचिद्देवतापै हविर्निर्वपन्नाज्यस्यैव नैौ पुरस्ताद्यजन्नित्यनेनाग्निषोमयोर्देवतयोर्लाभः य
थानुषाणो प्रथिराज्यस्यवेनुजुषाणाः सोमश्राज्यस्य हविषो वेत्वित्यनयोराज्यभागाभ्यामन्यत्र विधानाभावेन
तयोस्सन्निधिप्राप्ताज्यभागंगत्वानपापात्ततएवाज्यभागयोर्देवताप्राग्निरनुवाक्याद्वयं च तयोरग्निसोमदे
वताकं द्वाशनपीभ्यआगमयितव्यामिति भावः अन्यथेति अनुवादे हि पौर्णमास्यमावास्याशब्दयोस्संज्ञात्वसिद्धिस्स
मुद्दायद्वयसिद्धिर्वा भवतीति तद्द्वारा कालसंयुक्तानामेव फलसंबंधसिद्धिप्रयोजनं वाच्यं न च तत्तं भवति पौर्णा सोम० ४२
मास्यमावास्याशब्दयोस्संज्ञात्वेपि फलवाक्यगतदर्शपूर्णमासशब्दयोस्संज्ञात्वासिद्ध्या कालसंयुक्तानामेव

फलसंबंधस्यासिद्धिस्तथा फलवाक्ये दर्शपौर्णमासशब्दयोर्न समुदायपरत्वं यजिसामानाधिकरण्यात्समुदा
यस्य च यागत्वाभावात् किंतु समुदायिपरत्वमिति समुदायद्वयस्यापि कालसंयुक्तानां फलसंबंधासिद्धेरनेनानुवा
दकत्वेऽप्यानर्थक्यं स्यादित्यर्थः उपपदार्थविधायकत्वेनापि सार्थक्यं विधिपुनःश्रवणस्य न संभवतीति समस्तश
ब्दं प्रयुंजानस्याभावः विहितत्वादिति न च सहप्रयोगार्थमाग्नेयादिष्वेव कालविधिरिति युक्तं यदिष्ट्या पशुना सोमेन
वा यजेत सोमावास्यायां पौर्णमास्यां वा यजेतेति कालविधौ सत्यपि सर्वासामिष्टीनां सर्वेषां सोमयागानां सर्वेषां
च पशुबंधानामयनानां सहप्रयोग एवमिहापि सत्यपि कालविधौ सहप्रयोगासिद्धिरिति भावः तयोरिति नन्वेवं
पौर्णमास्यमावास्याशब्दयोः संज्ञात्वे सति ताभ्यां विद्धाक्यविहितकर्मानुवादेन कालविधिः कालविधौ च नयो
स्तत्र स्वन्यायेन नामत्वमिति परस्पराश्रयः न च यदिष्ट्यादिवाक्येन प्राप्तकालसंबंधमादाय पौर्णमास्यमावा
स्याशब्दयोर्नामत्वसंभवान्नान्योन्याश्रय इति वाच्यं यदिष्ट्यादिवाक्येन विद्धाक्यविहितकर्मद्वयेऽपि कालद्वयस

सोम० ४२ मावेशान्नाम्नोरव्यवस्थापत्तेः यद्या दिवाकीर्त्येन विद्धद्वाक्यविविहितकर्मपगेः कालप्राप्त्यमुपगमे पौर्णमास्यां पौर्णमास्येत्या
दिवाकीर्त्यद्वपानर्थक्यस्यापरिहार्यत्वापत्तेः अतस्तस्मात्पौर्णमास्यादिवाकीर्त्येनैव कालप्राप्तिरूपमात्तनञ्चान्योन्याश्रयो दुष्परिहर
इति चेन्नपदवृत्तिनिमित्तानिश्चयेपि सामानाधिकरण्यमात्रेणा ये यन्योत्पत्तिरित्यादिवत्संज्ञात्वनिश्चयसंभवेनान्योन्याश्रयानव
काशादितिभावः विद्धद्वाक्यद्वयस्यकर्मान्तरविधायकत्वमुपपाद्यतत्स्पष्टत्वेसर्वेषांप्राधान्यमुपपादयति अमसिद्धेति प्रसिद्धार्थ
त्वेहि चतुर्थ्योयांत्याधिकरणान्यायेननाम्न आख्यातावच्छेदकत्वेसति सर्वेषांप्राधान्यंनस्यात्नचेदं प्रसिद्धार्थमित्यर्थः अनेन
चतुर्थे दर्शपूर्णमासपदस्यप्रसिद्धार्थत्वमंगीकृत्य प्रसिद्धार्थत्वेपिननाम्ना आख्यातावच्छेदसंभवति आख्यातस्यप्राधा
न्येननाम्नातस्यसंकोचायोगात् इतः प्रयाजाग्नेयादीनांसर्वेषामेवप्राधान्यमित्याशंकायां प्रसिद्धार्थेननाम्नाकांस्यभोजिन्या
मेनाख्यातावच्छेदसंभवतीत्येवंअनुत्पाद्य इह तु विद्धद्वाक्यद्वयस्यकर्मान्तरविधायकत्वात् प्रसिद्धार्थत्वमेवनास्तीति सर्वेषां रांम०
समप्राधान्यशंकानिराक्रियत इत्यपुनरुक्तिः सचिंतानानुदर्शपूर्णमासशब्दस्यकालयोगेषु प्रसिद्धत्वात्कथमप्रसिद्धार्थत्वम ४२

४३

तत्राह कालनिमित्तमिति न नु कालाद्योगिपुसमुदायद्वयाभिप्रायेणाद्विवचनमुपपद्यत इत्यत आह न चेति अत्रैव समुदायसंप
त्तिसंभवेपि न प्रकृतोपयोग इत्याह तत्रैवेति ॥ ननु फलवाक्ये यत्र्यभिधानप्रयुक्तसमुदायद्वयासिद्धावपि दर्शपूर्णमासपदद्वयाभि
धाननिबंधनसमुदायद्वयासिद्धिरस्त्वित्यत आह न च दर्शेतितयोरिति समुदायद्वयासिद्धेः पर्वं तयोरप्रसिद्धार्थत्वादिति भावः ननु
सिद्धांत इव समुदायद्वयमाख्यातेन तंत्रेणोपादीयतामित्यत आह न च समुदायद्वयमिति असिद्धत्वादिति इदं च वक्ष्यकथनमात्रेस
मुन्नयद्वयासिद्धावपि तद्भिप्रायदर्शपूर्णमासपदेन भवति समुदायस्य यागरूपत्वाभावेन यजिसमानाधिकरणस्य तस्य समुदायपिप
रत्वावश्यंभावेन समुदायपरत्वासंभवादित्येव पूर्वपक्षे वक्तव्यं अन्यथा विद्वद्वाक्यद्वयस्यानुवादत्वेपि समुदायद्वयसिद्ध्यार्थवत्त्वसं
भवेन प्रागुक्तस्य समभ्यानुवादानर्थक्यस्य प्रत्युद्धारप्रसंगादिति ध्येयं तस्मात्प्रजिनासमुदायद्वयस्य तंत्रेणाभिधानासंभवाद त्रैवस
मुदायकल्पनायामेक एव समुदायः स्यादित्याह तददिदमिति इत्यविशेषादिति न च विद्वद्वाक्यविहितकर्मणोर्द्वित्वात्तयोरेव दर्शपू
र्णमासपदे वर्त्तेतामिति वाच्यं तयोर्हि वर्त्तमानं कालयोगादेव वर्त्तेत ननु प्रकारांतरेण कालयोगश्चाग्नेयादीनामप्यविशिष्ट इति के

सोम०
४४
५५

र्थंतयोरेवदर्शपूर्णमासपदस्यवृत्तिःविद्वद्वाक्येप्रत्येकमेकैकस्यैवकर्मणोविधानेनतयोरपिकर्मणोरुत्पत्तौसिद्धत्वानवगमाद्विशेषा
त्। यद्येवंआग्नेयवाक्यविहिताग्नेयकर्मद्वयपरत्वमस्तुतयोरेकस्मिन्वाक्येविधीयमानतयोरुत्पत्तौसिद्धत्वावगमसंभवादितिचेन्म
त्। तथापिफलवाक्यगतदर्शपूर्णमासशब्दयोस्तत्परत्वंतन्नामत्वेमानाभावात्कालयोगनिमित्तलक्षणयावाच्यलक्षणायाश्चता
त्पर्यग्रहणाधीनानचफलवाक्यगतदर्शपूर्णमासपदयोराग्नेयवाक्यविहिताग्नेयकर्मद्वयेतात्पर्यग्राहकंतत्सामानाधि
करण्यादिकंकिंचिदिहास्तीतिभावः। एतेनाग्नेयादिवाक्यैर्विद्वद्वाक्यविहितकर्मणोरूपविधिरितिपक्षेविद्वद्वाक्यद्वयविहितकर्मणो
रेवकालयोगेनत्वन्येषामितिकालयोगिकर्मणोर्द्वित्वात्तयोरेवदर्शपूर्णमासशब्देननिर्देशःसुकरइतितयोरेवप्राधान्यंकिंनस्या
दितिभवदेवशंकानिरस्ता। विद्वद्वाक्यविहितकर्मणोःपौर्णमास्यमावास्यासंज्ञकत्वेनफलवाक्येपौर्णमास्यमावास्याशब्दयोरभावे
नतयोरप्रत्यभिज्ञानात्प्रस्तुतदर्शपूर्णमासशब्दांतरस्त्रवणेसस्पर्धांतरबुद्धिरेवस्वरसतोजायमानत्वादुक्तरीत्यालक्षणायाअप्र राम०
माणाभावात्। आग्नेयादिवाक्यैर्गुणविधिरितिपक्षेप्युपांशुयाजवाक्येविद्वद्वाक्यप्रत्यभिज्ञापकपौर्णमास्यादिशब्दाभावेनतत्र ४४

गुणविध्यसंभवान्न तस्य कर्मान्तरविधित्वमावश्यकमिति कालयोगिकर्मणां चित्त्वेन द्विवचनानुपपत्तिस्तादवस्थ्याच्च एतेनैव द
र्शपूर्णमासप्रातिपदिकस्य कालयोगिषु सिद्धत्वाद्द्विवचनस्य च व्यासयेनाप्युपपत्तेर व्युत्पन्नद्विवचनप्रातिरूपकत्वकल्पमपेक्ष्य या
व्यत्ययकल्पनस्यैवन्याय्यत्वात्कालयोगिनामेव प्राधान्यं किं न स्यादित्यपि निरस्तं तात्पर्यग्राहकप्रमाणाभावेन प्रातिपदिकस्य का
लयोगिपरत्वाभावादिति ननु सर्वेषां प्राधान्येपि राजसूयवद्घटितानां तत्राभिधानं कृतं समुदायमादायैकवचनमेव स्यात्तत्रश्च
तत्रापि द्विवचनानुपपत्तिस्तुल्येत्यत आह नामधेयमपीति॥ कथंचिदित्यनेन वैशब्दवर्त्तमाननिर्देशनिराकरणं कृतं शंसत्वप
त्तिन्ननुवचनाद्वार्त्रघ्नी एष धन्वन्तरी मंत्राणां विद्धवाक्यविहितकर्मांगत्वमित्युक्तमत आह वचनं चेति आज्यभागयोर्मंत्रव्यवस्था
मात्रविधानेहि विधेर्न मंत्रप्राप्त्यंशे व्यापारः किंतु नियमांश इत्यप्राप्तांशपरिपूरणस्य विधेर्व्यापाराल्लाघवं लिंगक्रमाबाधश्चेत्या
भ्यां हेतुभ्यां व्यवस्थार्थमेव वचनमित्यर्थः॥ ननु किमत्र पौर्णमास्यमावास्याशब्दयोः कालपरत्वमंगीकृत्य पौर्णमास्यां काले यावाज्य
भागौ तयोर्वार्त्रघ्नौ अमावास्यायां काले यावाज्यभागौ तयोर्वृधन्वत्यावित्येवं व्यवस्थाविधिरिष्यते उत तयोः कर्मपरत्वमा

तैव व्याख्यातारो योगिनामेव मा भाव्यं नित्यादि स्यापि विरलांना पर्वमाह वाक्य मारणाभावेन
पौर्णमास्यमावास्याकालकर्त्तव्यकर्मांगत्वाभावेन तादृशाज्यभागयोर्व्यवस्थाभानियदिकस्यकाल
विध्यनुपपत्तेः ननम्श्ववचनस्यव्यवस्थार्थ २

सोम० ४५ श्रित्य पौर्णमासीकालकर्त्तव्यकर्मणि यावाज्यभागौ तयोर्वार्त्रघ्नौ पौअमास्याकालकर्त्तव्यकर्मणि यावाज्यभागौ तयोर्वृधन्वन्त्या
वित्येवं व्यवस्थाविधिः नाघः आज्यभागयोराग्नेयादिवदुत्पत्तौ कालसंयोगाभावेन तत्पर्यौः पौर्णमास्यमावास्याकालकर्त्तव्य
त्वस्यैवाभावेन कालसंबंध्याभागयोर्व्यवस्थाविध्यनुपपत्तेः नद्वितीयः समप्राधान्यमिति पर्वपक्षदशायांत्वाज्यभागयोः
45 त्वे सति मात्रेवर्णिकदेवताताभावेनारूपत्वात्कालयुक्तानुवादे सति तेषामेव प्राधान्यं कालयुक्तानां प्राधान्ये चत्वत्या
ज्यभागयोरकालयुक्तयोरंगत्वात्पौर्णमास्यमावास्याकालकर्त्तव्यकर्मांगभूताज्यभागानुवादेन व्यवस्थाविधिरितिपरस्पर
श्रय इति चेन्मैवं आज्यभागयोः प्राधान्येपि य इष्ट्यादिवाक्येन पौर्णमास्यमावास्यालप्राप्तिसंभवेन कालमुखेनैव व्यवस्था
विध्युपपत्तेः फलवाक्येन युगपदेकफले चोदितानां असति बाधके एकप्रयोगत्व प्राप्तौ सत्यां कांस्यभोजिन्यायेनाग्नेयादिषु
श्रुतपौर्णमास्यादिकालमेव सर्वप्रधानसाधारणेन प्रयोगवचनेनानुमन्यत इति तद्बलादपि पौर्णमास्यमावास्ययोराज्यभा राम० ४५
गसद्भावेन व्यवस्थाविधौ बाधकाभावाच्च न च कालमुखेन व्यवस्थाविध्यंगीकारे अग्नीषोमीयविकाराणां अमावास्यायामनुष्ठा

नैवात्रप्रमेत्रप्राप्तिस्साम्नाय्यविकाराणांपौर्णमास्यनुष्ठानेवृधन्वतीप्राप्तिश्चनस्यादितिवाच्यंनहिसिद्धान्तिनाकालमुखेनव्य
वस्थापरमार्थत्वेनाङ्गीक्रियतेयेनोक्तदोषःस्यात्किंतुपौर्णमासीशब्दस्यकालद्वाराग्नेयादित्रिकपरत्वमङ्गीकृत्यतदङ्गयो
राज्यभागयोर्वार्त्रघ्नावित्येवंव्यवस्थैवपरमार्थत्वेनाङ्गीक्रियतेएवममावास्यावाक्येपीदानींत्वेतावन्मात्रमुच्यतेआज्यभा
गयोरङ्गत्वाभावात्पौर्णमास्याकर्तव्याग्नेयाद्यङ्गभूतयोराज्यभागयोर्वार्त्रघ्नावित्यादिरूपव्यवस्थाविधिर्नसंभवतितस्माद्विद्वा
क्यविहितकर्मणोरेवात्रघ्नादिमन्त्रविधिःस्वीकर्तव्यइतिवदन्तंपूर्वपक्षिणंप्रतिअङ्गत्वाभावेपिकालमुखेनव्यवस्थाविधि
संभवान्नत्वदभिमतविद्वद्वाक्यविहितकर्मणोर्मन्त्रविधिस्संभवतीतितस्माद्व्यवस्थाविधौनकाप्यनुपपत्तिःवस्तुतस्तुकालमु
खेनव्यवस्थायामपियथापौर्णमासविकारेषुवार्त्रघ्नौमन्त्रौदर्शविकारेषुचवृधन्वन्तौतथाद्वादशोविप्रतिषिद्धधर्माणांसम
वायेभ्यःयसंस्यात्सधर्मत्वमित्यधिकरणोवक्ष्यामःननुयागस्यदेवतयाविनानुपपत्त्यादेवताकल्प्यतामित्यतआहनन्वेतिया
गस्यदेवतयाविनानुपपत्त्याअस्तिकाचिदिहदेवतेत्येतावन्मात्रसिद्धावपिइयमस्यदेवतेतिविधिंविनाविशेषानवगमादित्य

सोम० ४६ र्थः समस्तानुवादीन र्थक्यमुद्धरंस्तत्कालयुक्तानामेव प्राधान्यसिद्धिं फलमुपपादयतीत्येतिय एवं विद्वान् पौर्णमासीं यजत
इति वाक्ये यजिना पौर्णमासीमित्युपपदवशात् पौर्णमासीकालयुक्ताः यागास्तंत्रेणानुघ्यंते तदनुवादरूपमेकमभिधानमवलंब्य
न्ते यामेकस्समुदायोनिष्पद्यते स एव समुदायः पौर्णमासीमित्युपपदेनाप्यभिधापते धातुनातंत्राभिधानलब्धसमुदाय
स्योपपदेनाभिधानादुपपदस्यैकवचनांतत्वमप्युपपन्नं एवं चानुवादस्य समुदायसिद्धिः प्रयोजनमित्यर्थः तदेकत्वात्पौर्ण
र्णमासीमित्येकवचनमित्यनेनैव यजिकृतं तंत्राभिधानलवपक्षमुदायस्य पौर्णमासीपदेनानुवादात्पौर्णमासीनामसिद्धिर
पि अनुवादस्य प्रयोजनं वैश्वदेवेन यजेतेत्यत्रैवेति स्पष्टितं ननु फलवाक्यस्थस्य द्विवचनांतनाम्नः षड्भिर्वा विदुद्वाक्य
स्थयोरेकवचनांतनाम्नोरपि त्रिषु त्रिष्वनन्वितार्थत्वेनाप्रसिद्धार्थत्वाविशेषात्कथमुपपदानुसारेण विदुद्वाक्यस्थयजत्योः का
लयुक्तमात्रानुवादकत्वं तत्तश्च विदुद्वाक्यस्थानाम्नोरेव यजिपरतंत्रत्वादवश्यंभावेन यजेश्चसन्निहितसर्वयागानुवादस्वर सोम० ४६
सत्त्वात्तदनुसारेण तयोरपि सर्वप्रकृतयागनामत्वमेवस्यादिति चेत्सत्यमैवं य एवं विद्वान् पौर्णमासीं यजते यावदुनो पाप्नोति

46

तावदुपाप्नोति य एवं विद्वानमावास्यां यजते यावदतिरात्रेणोपाप्नोति तावदुपाप्नोतीति विद्वद्वाक्यस्थ पौर्णमास्यमावा
स्याशब्दितयोर्व्यवस्थितफलार्थवादः अत एतस्य च पौर्णमास्यमावास्याशब्दद्वयस्य व्यवस्थितार्थत्वेन घटते नान्यथेति
तदुपपत्त्यर्थं तयोर्न सर्वत्र रूढनामत्वं किंतु कतिपयनामत्वमेव कतिपयनामत्वे च तत्तत्कालयुक्तकर्मनामत्वमेव न्याय
मिति तदनुसारेण तत्कालयोगिष्वेव विद्वद्वाक्यस्थ यजिरिष्टिरवशब्दवाच्यत्वात् वैश्वदेववाक्ये त्व्युपपदवशात् पर्यायवैश्वदेया
सिद्धा यागमात्रस्यनामनुवादप्रसक्तिस्तथा वैश्वदेवाधिकरणे एवोक्तं एवं च समुदायद्वयसिद्धौ तत्रोपपदस्य प्रसिद्धार्थवत्त्वा
त्तदनुसारेण कांस्यभोजिन्यायेन यजेः कालयोगिष्वेव वृत्तेस्तेषामेव प्राधान्येन च समुदायद्वयसिद्धावपि फलवाक्यगतदर्श
पूर्णमासशब्दस्य न समुदायपरत्वं तस्य यजिसामानाधिकरण्यात् समुदायस्य च यागत्वाभावादिति वाच्यं समुदायस्य यागत्वा
भावेपि समुदायद्वारा लक्षणया समुदायिषु वृत्तिसंभवेन यजिसामानाधिकरण्योपपत्तेः एवं पक्षे च कालवाचकदर्शपूर्ण
मासशब्दस्य तात्पर्यग्राहकाभावान्न कालद्वारा कालयोगिषु वृत्तिः सिद्धांते तु विद्वद्वाक्येन समुदायकरणस्यानर्थक्यापत्त्या तद्व

सोम०
४७
47

लादेवफलवाक्यगतद्विवचनांतदर्शपूर्णमासशब्दस्यसमुदायद्वारासमुदायिपर्यवसितात्पर्यनिश्चयइतिवैषम्यं॥ एवंविद्धद्वाक्याभ्यां
पौर्णमास्यमावास्यारूपसंज्ञाकरणबलात्तद्बलेनकालयुक्तानामेवप्राप्त्यभिज्ञयासंज्ञाबलेनापिकालयुक्तानामेवफलसंबं
धः।यथाचविद्वद्वाक्यगतपौर्णमास्यमावास्याशब्दयोःफलवाक्यगतदर्शपूर्णमासशब्दयोःपर्यायत्वंतथाचतुर्थेग्रंथ
कारेणैवव्यक्तमेतत्तस्माद्विद्वद्वाक्येनपौर्णमास्यमावास्याशब्दयोस्संज्ञात्वसिद्धावपिफलवाक्यगतदर्शपूर्णमासशब्दयो
स्संज्ञात्वाभावात्कथंसंज्ञाबलात्कालयोगिनामेवफलसंबंधसिद्धिरितिशंकायाअनवकाशइतिभावः।तथैकादशइतिय
इष्ट्यादिवाक्यवैषम्यंतत्रैवव्यक्तम्इतिभावः।इदानीमाग्नेयादिवाक्येरूपलाभइतिपूर्वपक्षप्रकारमुत्थापयतिइदानीमि
तिननुप्रथमपूर्वपक्षप्रकारेपिसर्ववाक्यानिविधायकानिभवंतीत्याशंक्यतत्रतोपिविशेषमाह यागइतिनचप्राप्तकर्मानुवा
देनानेकगुणविधानेविध्यावृत्त्यावाक्यभेदप्रसंगः॥गुणानांसिद्धरूपत्वात्स्वतोविधेयत्वाभावाद्गुणविशिष्टभावनायाएव रामं०
विधिसंबंधेनकेवलंगुणस्यतत्रप्राप्तकर्मानुवादेनसाक्षादनेकगुणविध्यभावादनेकगुणविशिष्टभावनाविधौचविशि ४७

एकर्मविधाविवविधेस्सकृदेवव्यापारइतिविध्यावृत्त्यभावादितिभावः श्रेयानितियद्यपिप्रथमपर्वपक्षासिद्धांतद्विती
य्यपर्वपक्षरूपपक्षत्रयमध्ये अस्यपक्षस्यातिशयाप्रतिपादनादीयसुन्प्रत्ययोनुपपन्नः तथापिप्रथमपर्वपक्षाद्वि
तीय्यपर्वपक्षयोःविद्याद्वाक्यस्यविधायकत्वसिध्याप्रशस्तयोर्मध्येद्वितीय्यपर्वपक्षोतिशयितइतितथासिद्धांतद्वि
तीय्यपर्वपक्षयोरष्टमागकल्पनाभावात् प्रशस्तयोर्द्वितीय्यपर्वपक्षोतिशयितइत्येवंद्वौद्वावेकीकृत्यतन्मध्येप्र
कर्षविवक्षयाईयसुन्प्रत्ययप्रयोगः असकृच्छ्रुतेः विधिप्रत्ययस्यासकृच्छ्रुतिप्रसंगाद्विध्यावृत्तिप्रसंगादिति
यावत् ततश्चवाक्यभेदःस्यादितिभावः ननुविशिष्टभावनाविधानान्नवाक्यभेदइत्युक्तमतआह भावेनेतिस्वरस
तःशब्दभावनात्मकविधेरर्थभावनागोचरतयातावद्गुणविशिष्टभावनागोचरतयाप्रथमंप्रतीयमानोपिवि
धिःभावनायाःप्राप्ततयातत्सरलाभावाद्विशेषणीभूतगुणपरस्सन्तत्रपर्यवस्यतिपत्रत्वविधेःपर्यवसानंस
विधेयस्ततश्चानेकगुणविधिस्वीकारेसर्वत्रविधेस्तात्पर्यात्सर्वेनपर्यावसानंवाच्यंनचसकृच्छ्रुतस्यविधेरनेकत्र

सोम०
५८
५8

पर्यवसानंसंभवतीतिविध्यावृत्तिरवर्जनीयेत्यर्थःननुविधितात्पर्याभावेपिविध्यन्विततयाप्रतीयमानभावनान्वित
त्वमात्रेणप्राप्तस्यापिविधेयत्वंकिंनस्यादित्यतआहनान्यइतितद्देशमात्रस्यविधेर्देशएवदेशोयस्यसततयाविधिसमाप्ति
व्याहतोविधिनासहयथाकथंचिदन्विततयाप्रतीयपर्वपक्षयोरिष्टपागकल्पनाभावात्प्रशस्तयोर्द्धितीयपर्व
वशोऽनिशापितुइत्येवंद्वौद्वावेकीकृत्यतत्तन्माध्येप्रकर्षविवक्षयाऽइयमुक्तप्रत्ययद्वयप्रयोगःअसङ्कुचितैःविधिप्रत्यय
स्यासङ्कुचितिप्रसंगाद्विध्यावृत्तिप्रसंगादितिभावस्तत्तत्रवाक्यभेदस्यादितिभावःननुविशिष्टभावनावनाविधानान्नवा
स्वरूपानभिधायित्वात्संज्ञाशब्दांतरात् पृथगिति स्वत्रार्थस्तु संज्ञापि भेदिका पृथक्त्वनिवेशित्वात् पूर्वपक्षेपि ज्योतिरित्यादिश सोम०
ब्दा यद्यपि संज्ञास्तथापि उत्पन्नकर्मगोचरत्वेनोत्पत्तिसंयोगाभावात् न तासां भेदकत्वं सिद्धांते तु उत्पत्तिसंयोगाद्भेदकत्वमित्या ७२

शयेनोक्तमुत्पत्तिसंयोगादिति॥ ॥गुणश्रुत्यापूर्वसंयोगेवा[क्य]योस्समत्वात्॥ ॥संज्ञानंतरंसंनिहितात्कर्मणोभेदकत्वसा
मान्यात्गुणस्यैवव्युत्पादनंयुक्तंनत्वसंनिहितात्कर्मणोभेदकस्यप्रकरणांतरस्येत्याशयेनाहइदानीमितिननुपौर्णमास्य
धिकरणएवप्राप्तकर्मणएनेकगुणविधानासंभवेनगुणनिमित्तकभेदोव्युत्पादितइतिइहपुनर्व्युत्पादनंव्यर्थमित्याशंक्यप्रब
लगुणावरुद्धेकर्मणिप्रकरणांतरस्यनिवेशासंभवेनभेदकत्वव्युत्पादनार्थत्वादस्यनवैयर्थ्यमित्याशयेनाहद्विधेत्यादिननुत
र्हिवाजिभ्योवाजिभ्योवाजिनमित्यत्रवाजिलक्षणादेवतायावाजिनलक्षणद्रव्यस्यचवैश्वदेवयागेविधिरस्त्वितिशंकानिकाक
रणार्थत्वेनानेकगुणनिमित्तभेदोप्यत्रै[illegible]वकुतोनव्युत्पाद्यतइत्यतआहतत्रानेकेतितत्रेतिवाजिनवाक्यइत्यर्थःप्रथमसंश
यहेतुमुक्तमेवसंशयांतरमाहतत्रचेतिइदंचप्रकृतोदाहरणाभिप्रायेणमत्रोभयत्रतद्धितश्रुत्यावापत्रचान्तरीयादिना
उत्पत्युत्पन्नशिष्टयोःकरणाधिकरणत्वादिनाश्रवणंतत्रापिगुणात्भेदस्यएतदधिकरणएवव्युत्पाद्यतयातत्रोक्तसंशयस्य
तदर्थसंशयत्वासंभादितिद्रष्टव्यंननुवाजिनवाक्येप्रकृतामिक्षायागानुवादकशब्दाभावात्तत्रगुणविधिरितिकथंपूर्वपक्षइ

सोम०
७३

त्यत आह तत्रेति वाजोऽन्नमदनीयमामिक्षारूपं येषामित्येवमामिक्षायागसंबंधिनो विश्वान् देवाननूद्य तत्र वाजिनलक्ष
णा गुणविधिः संभवतीत्यर्थः प्रकृतानिति तदस्यास्तीति सर्वनामर्थे तद्धितश्रुतेः विधानादनुवादस्य सन्निसंभवे संन्निहित
गामित्वाच्च संन्निहितान् विश्वान् देवानेवानुवदति न वाजसंबंधिमात्रमिति नातिप्रसक्तिरिति भावः वाजिशब्दस्याश्वे रूढत्वा
न्न विश्वदेवपरत्वे रूढिरूढिपूर्वकलक्षणास्यान्न तु यौगिकत्वमितीमं लक्षणादोषं वारयितुं श्रुत्येत्युक्तं नात्र रूढिपूर्वकल
क्षणासंभवति अश्वे वाजिशब्दस्य रूढत्वेपि विश्वेषां देवानां मुख्यार्थसंबंधाभावादिति भावः ननु वाजिशब्दस्य विश्वदेवप
रत्वेपि न विश्वदेवत्वेन तेषां देवतात्वं किंतु वाजित्वेन ततश्चैंद्रमहेंद्रन्यायेन देवताभेदान्न पूर्वकर्मसमवाय इत्यत आह
तेहीति संप्रदानरूपेणेति देवतारूपेणेत्यर्थः तेनैवेति पूर्वकर्मणि देवतात्वप्रयोजकविश्वदेवत्वरूपेणैवेत्यर्थः एवं च विश्वे
देवत्वरूपेणैव वाजिनसंबंधो न वाजित्वरूपेणेति भावः ननु विश्वदेवत्वेन रूपेण तेषां वाजिनसंबंधविधानेपि कथं प्रकृतक सोम०
र्मणि गुणविधिसिद्धिरित्यत आह तथेति विश्वेषां देवानां वाजिनस्य च यागं विना प्रतीयमानसंबंधानिर्वाहाद्यागापेक्षायां ७३

प्रकृतयागीयद्रव्यरूपामिक्षापरवाजशब्दमहिम्नात्रपस्थितप्रकृतामिक्षायागस्यैवतन्निर्वाहकत्वकल्पनावश्यं
भावादावश्यके प्रकृतयागएववाजिभ्योविश्वेभ्योदेवेभ्योयजेतेतियत्तद्वाजिनमित्यवेवंवाजिशब्दोपस्थापितदेवता
मुखेनवाजिनंविहितंभवतीत्यर्थः नन्वस्मिन्पक्षेवाजिशब्दस्यान्वयेक्तप्ररूढिपरित्यागएवदोषइत्यतआहएवंचेतिप्रधा
नस्यविधेर्गुणमात्रविधानलाघवलब्धत्वात्तदनुसारेणप्रकृतकर्महान्यादिदोषप्रसंगेनचरूढिपरित्यागोनदोषइ
तिभावः आकांक्षाविरहादेवान्वयार्हतापिनास्तीत्याहयोग्यतावेतियद्यामिक्षाद्रव्यस्यैवकृत्स्नयागव्याप्तेर्योग्यता
पिनास्तीत्याहयोग्यतावेतिततश्चैत्यत्रश्लिष्टोदुर्बलइतिभावः निरूक्तव्येति आमिक्षावाक्येद्रव्यदेवतासंबंधबलात् आ
मिक्षयायजेतेत्येवंयजेतेतिपदंकल्पितंतदेवपदमस्मिन्वाक्येकर्मानुवादकंस्वीक्रियतइतितेनयजेतेतिकेवलपदेन
कर्ममात्रंआमिक्षारूपगुणसंबंधाद्विशेष्यान्यत्तइत्यर्थः ननुकेवलेनयजेतेत्यनेनस्वरूपमात्रानुवादसंभवेपिव
क्तत्तस्यकर्मणोगुणांतरावरुद्धत्वान्नवाजिनान्वसंभवइत्यतआहअभिधानेतिनवास्त्वितिइतरथाद्वादशकपाला

सोम॰ देस्वरूपमात्रेणाभिधानन्तस्य चोपवापाद्यन्वयोनस्यादिति भावः नन्वेवं यजतिर्ददातीत्यादौ यागान्विताया अपि
७४ भावनायाः निष्कृष्टस्वरूपेणाभिधानाद्दानाद्यन्वयभवादेकधात्वर्थान्विताया भावनाया न धात्वर्थान्तरसंबंध
74 इति शब्दान्तराधिकरणोक्तविरोधस्यादित्यत आह शब्दान्तर इति भावनाया न केवलेन प्रत्ययेनानुवादः शक्यः कर्त्तुं
किंतु प्रकृतियुक्तेन स च प्रकृत्यर्थानुरक्तामेवानुपदेष्टुं प्रभुत्वमिति [illegible] तत्र स्वरूपमात्रानुवादासंभव
इति भावः श्रौतत्वादिति सास्य देवतेति तद्धितस्य देवताविशिष्टद्रव्याभिधायित्वादिति भावः वाजिनसंबंधात् ॥ वाजि
नस्य देवतासंबंधादित्यर्थः नाहीति तद्धितेन द्रव्यं सामान्यरूपेणैवाभिधीयते नामिक्षात्वेन त्वभिधानं पदान्तरेणैवे
त्यामिक्षासंबंधोपि वाक्यगम्य इत्यर्थः विकल्प इति वाजयोगस्य देवताविशेषणत्वे समुच्चयः उपलक्षणत्वे तु विक
ल्प इति भावः वाजिशब्देन विश्वदेवानां तेनैव रूपेणोपस्थापनस्य प्रागुक्तत्वादामिक्षासंबंधान्निष्कृष्टस्वरूपेणाभिहिते सोम॰
प्रकृतकर्मणो वाजिनविधिरित्यंगिकाराच्च समुच्चयपक्षो दुर्बल इति ध्येयं ॥ आमिक्षाया इति आमिक्षायाः कर्मो ७४

त्यन्निसमयराव चोदितत्वान्न श्रुतिचोदितत्वाच्च बलीयस्त्वं वाजिनं तत्त्यन्नेकार्मणि चोद्यते वाक्याच्चेति दु दुर्बलमित्यर्थः तत्पा
पीः अनुवादस्य पुरोवादसापेक्षत्वान्न पुरोवादपर्यालोचनयैवान्मलाभ इत्यनुवादत्वनिर्वाहार्थं पुरोवादपर्यालोचनस्यावश्य
कत्वात्तस्मिन् पर्यालोच्यमाने गुणयुक्तस्यैव कर्मणो बुद्धौ विपरिवृत्तेः तद्दशायां निष्कृष्याभिहितस्यापि कर्मणो न गुणांतराकांक्षा
संभवति एकगुणयुक्ते तया बुद्धौ विपरिवृत्ते गुणांतराकांक्षाप्रतिबंधकः त्वात् पुरोडाशकपा[illegible]लादौ त्वगत्याकथंचिन्निष्कृष्या
भिधानेनाकांक्षोत्थाप्यते न त्विहागतिकत्वं विशिष्टकर्मान्तरविधिसंभवादिति भावः तद्धितस्येति सर्वनामार्थे विहितस्य तद्धित
स्य पदांतरसंन्निधानेन तु पस्थाप्यविशेष एव पर्यवसानात्सर्वनामार्थतद्धिते नैवामिक्षाद्रव्यस्याप्युपस्थितेरामिक्षादेवतासं
बंधः श्रौत इत्यर्थः वस्तुतस्तु तद्धितस्य द्रव्यविशेषवाचित्वाभावेपि चतुर्थ्यपेक्षया बलवत्वं संभवति द्रव्यस्य सामान्यरूपेणा
पि प्रतीत्या द्रव्यस्य सामान्यरूपेणापि प्रतीत्या द्रव्यस्य देवतापास्संबंधस्य च तद्धितादेवावगतेश्चतुर्थ्या द्रव्यसामान्यस्याप्य
प्रतीते द्रव्यदेवतासंबंधस्य सुतराम प्रतीतेश्चेत्यापघमिसंधायाह प्रपंचितमिति एतेन आमिक्षावाक्ये यागः प्रत्यक्षेणश्च

सोम० ७५
75

यत्ते किंतु कल्पस्य चकल्प्यमानो लाघवादामिक्षावाजिनयोरुभयोरपि देवतासंबंधनिर्वाहकत्वेन एक एव कल्पयितुं युक्तो
इत्यामिक्षा वाजिनोभयविशिष्टयागस्यैव कल्पितेन यजिना विधानादुभयोरप्युत्पत्तिशिष्टत्वमिति शंकापि निरस्ता आमिक्षा दे
वतासंबंधस्य श्रौतत्वेन झटित्युपस्थित्यामिक्षावाक्ये प्रथममेव यागस्य कल्पनीयतयोभयोभयोरुत्पत्तिशिष्टत्वाभावा
दिति अन्य इतितद्धितस्य देवतावाचकत्वं चतुर्थ्यास्तुतत्त्वस्य कतमित्यादय इत्यर्थः सूत्रार्थस्तु अपूर्वसंयोगे पूर्वकर्मवि
वेशाभावे गुणोपि भेदकः पूर्वकर्मनिवेशाभावश्चोभयोरपि वाक्ययोस्समत्वात्मिथोनपेक्षत्वादनुवादकत्वयैकस्य वाक्यस्ये
तरापेक्षायां पूर्वकर्मनिवेशस्यान्नात्वि हेतिभावः॥ ॥अगुणे तु कर्मशब्दे गुणास्तत्र प्रतीयेतेति सूत्रं भाष्यकारेण द्वेधा
व्याख्यातं तत्र प्रथमं दर्शयति अगुणा इति अग्निहोत्रं जुहोतीति गुणरहिते कर्मण्युत्पन्ने दध्नादिवाक्ये गुणविधिस्संभवति ननु सोम० ७५
सगुणाश्रुतावामिक्षावाक्ये इति इदं सूत्रं प्रत्युदाहरणार्थमित्यर्थः द्वितीयमाह अथ वेति वस्तुतस्तु पूर्वन्यायान्निवेश एव न संभ
वतीत्याह अन्यतरेति एकैकस्माद्वाक्यादेकैकस्य गुणस्योपस्थित्या सर्वेषां युगपदन्वयासंभवाद्यस्य प्रथममन्वयस्तद्देव

रुद्धेपर्वन्यायेन्यान्येनान्यान्वयासंभवात्कर्मान्तरत्वंअत एव संगतिरपीति भावः गुणविध्यर्थानुवादसिध्यर्थं कर्मोत्पत्ति
त्वश्रणपरोवादमात्रंपर्यालोचनं तु गुणान्तरविधिरपि कर्मोत्पत्तिवाक्यात्रागुणोवतत्त अतएकस्यैव प्रथममन्वयेपि गुणान्तरवि
धिसिध्यर्थं प्रथमान्वितगुणविशिष्टतया कर्मणोनालोचनीयत्वान्नात्रपर्णाधिकरणन्यायप्रवृत्तिरित्यर्थः तथा हि सर्वेषा
मिति पौर्वापर्ये ति एकान्वयानन्तरं अपनरान्वयनियमोप्यसिद्धः सर्वेषां युगपदुपस्थितौ युगपदन्वयस्यापि संभवादि
त्यर्थः प्रयोजनं पर्वपक्षे दध्यादिविशिष्टानां कर्मणां सर्वेषामनुष्ठानं सिद्धान्ते त्वेकस्यैव विकल्पितदध्यादिद्रव्यकस्या
नुष्ठानमिति अघाराग्निहोत्राधिकरणोक्तगुणकर्मसन्निधाने गुणश्रुतिर्गुणविधानार्थेत्युक्तत्वादिदमधिकरणमन
र्थकं न च यत्र निर्गुणसन्निधाएकमेव सगुणवाक्यं तत्राघाराग्निहोत्राधिकरणोक्तिस्सावकाशात्र तु सगुणवाक्या
नां बहुत्वात्सर्वेषामेककर्मान्वये विकल्पपत्त्या कर्मान्तरत्वशंकायां तन्निराकरणार्थत्वान्नवैयर्थ्यमितिवाच्यं निर्गु
णसंन्निधौ अज्ञातानां बहूनामपि सगुणवाक्यानां गुणमात्रविधायकत्वस्य तत्रैव वक्तव्यत्वादन्यथाघाराग्निहोत्रवा

सोम० ७६

76

कयोस्समुदायानुवादपूर्वपक्षस्यनिराकर्त्तुमशक्यत्वात् तस्मात्पूर्वव्याख्यानमेवसम्यगिति॥ ॥फलश्रुयत्ते
स्त्कर्मस्यात्फलस्यकर्मयोगित्वात्॥ ॥तत्रैवेतितद्राश्रित्येत्यर्थः ननुकर्मणः फलंगुणाद्वेतिसंदेहस्यकथंभेदा
भेदसंशयहेतुत्वमित्यपेक्षायांगुणफलात्मकानेकार्थोपादानस्यपूर्वकर्मणपसंभवेभेदावश्यंभावात्तत्संभवेभेदाभा
वाच्चसंभवासंभवसंशयद्वाराभेदाभेदसंशयहेतुत्वमित्याशयेनसंभवासंभवासंभवद्वाराफलिभावमुपपादय
तियदीतितन्नेति उक्तरीत्यासंभवासंभवद्वमाहेतुत्वेनेत्यर्थः ननुसिद्धांतेपिगुणफलयोस्साक्षादन्वयानुपपत्या
भावनाद्वारासंबंधस्यवक्तव्यत्वात् प्राप्तभावनायांचगुणफलोभयसंबंधविध्यनुपपत्तेरन्यतरानर्थक्यपरिहा
र्थंभावनांतरविधेरवश्यंवाच्यत्वेनभाव्यकरणभेदेनचभावनाभेदस्यावश्यकत्वान्नास्याश्रितायात्रअध्यायसंग
तिरित्यतआहसत्यपीतिभावनाभेदहेतुत्वेनधात्वर्थभेदस्यापिविचार्यत्वात्तत्प्रसंगादध्यायसंगतिरित्य
र्थःसन्निकर्षतइतिएकपदस्थत्वादितिभावः ननुधात्वर्थस्यासिद्धरूपत्वाभावान्नकरणत्वयोग्यतेतिविप्रहस्या

सोम० ७६

स्यापिनामार्थस्यैवतत्त्विकारोयुक्तइत्यतश्श्लोकंव्याचष्टेभावेतितत्रैवेयंशंकापरिहृतेतिभावः ननुपूर्वाधिकरणे
निर्गुणसंनिधौसगुणाश्रयत्वेगुणार्थत्वोक्तेकथंकर्मांतरत्वमित्यतआहकिंचेतिअनेनपूर्वापवादेनप्राप्तस्यवस्तुनोनासं
गतिस्सूचितेत्यपितत्संबंधोपीत्यर्थः ननुतर्हिदध्नाजुहोतीतिवाक्यप्राप्तदधिसंबंधानुवादेनहोमस्यैवफलेविधिरस्त्वि
तिशंकांनिवर्तयितुंश्लोकंव्याचष्टेनहीतिकर्मानुवादस्यसर्वस्याप्युत्पत्तिवाक्यमात्रापेक्षत्वेनगुणवाक्यानपेक्षणाद्दधि
प्राप्त्यनंतरंफलविधिरित्यत्रप्रमाणाभावान्नदधिवाक्यप्राप्तदध्यनुवादेनहोमस्यफलविधिसंभवइत्यनेनैववाक्येन
दधिफलार्थतयाहोमाश्रितत्वेनचविधेयमितिवक्तव्यंनचतत्संवतीत्यर्थः ननुप्रकरणप्राप्तानुवादकत्वान्नवैय
र्थ्यमित्यतआहतस्यचेतिप्रकरणेनहिहोमएवप्राप्तोनतुदधिहोमयोस्संबंधोपिततश्चदधिहोमयोः प्रतीयमा
नक्रियाकारकसंबंधस्यानुवादासंभवात्सर्वथापरित्यक्तएवस्यात्तथानियमेनफलार्थिनोदधिहोमसंबंधोपा
दानंचनस्यात्तस्यकर्तव्यत्वेनाप्राप्तेरितिभावः ॥ विधेयमितितत्स्यैवप्रवर्तनालक्षणाविधिसंबंधनिर्वाहायफलाकांक्षा

सोम° ७७ 77

त्वादितिभावः धात्वर्थनामार्थयोरुभयोरपि फलान्वयसंभावनायां हि संनिकर्षो नियामक इतरत्र तु संनिकर्षो किंचि-
त्कर इति भावः अर्थाधिकरणापवादपरतया श्लोकं व्याचष्टे तत्र हीति॥ ननु गुणस्य फले विधाने तु होतेरानर्थक्यापत्तेर
गत्या प्रकृतहोमादिकमंगीकृत्यापि विशिष्टविधिरेव स्वीकार्य इत्याशयेन शंकते तेनु होतेरिति तत्र प्राभाकरोक्तं नु हो
त्यन्वयं निराकर्तुमनुवदति केचिदिति दधि हि न स्वरूपेण फलकामस्य विधातुं शक्यं अक्रियारूपस्य तस्य कार्यात्म
कविधिविषयत्वानुपपत्तेः विषयत्वं हि यागकृतिसाध्यो नियोगः इमकृतिसाध्यो नियोग इत्येवं कृत्यवच्छेदद्वाराकार्य
वच्छेदकत्वं तच्च साक्षात्कृतिव्याप्यतया क्रियारूपस्य भावार्थस्यैव संभवति न तु द्रव्यदध्नो भावार्थत्वाभावेन स्वतो वि
धिविषयत्वासंभवान्न केवलं दधिफलाय विधीयते किंतु क्रियानुरक्तमेव क्रियानुरक्तस्य तु दध्नः स्वतो भावार्थत्वाभावेऽपि
भावार्थलक्षणक्रियानुप्रवेशेन द्रव्यदेवतासंबंधवद्विषयत्वं संभवति तस्मात् क्रियानुप्रविष्टं दधि विधीयते न केव
लमित्यर्थः ननु यदि दध्नो विधिविषयत्वमसिद्ध्यर्थं क्रियानुप्रवेशस्यावश्यकत्वं हि साक्षात्कृतिव्याप्यत्वात् क्रियाया

सोम° ७७

रावविधेयत्वमस्तुनचैवंदधिपदानर्थक्यंदध्यनुरक्तक्रियायाविधौतदानर्थक्याभावादितिशंकायामिष्टापत्तिमभिप्रेत्या
हअतइतिनचैवंदधिहोमसंबंधस्यहोमफलसंबंधस्यचविधानाद्वाक्यभेदस्यादित्याशंक्यादधिसंबंधस्यविधानाभावान्न
भेदइत्याहनन्वेवमितिननुदधिसंबंधस्याप्राप्तत्वात्सोप्यवश्यंविधेयःनचदध्नाजुहोतीत्यनेनतत्प्राप्तिःतथासतिदध्ना
जुहोतीतिवाक्यावगतदधिहोमसंबंधस्यफलोपयुक्ततयादध्नःक्रत्वर्थफलाभावप्रसंगादित्यतआहलौकिकमितिदध्नःका
रकत्वात्होमस्यक्रियात्वात्क्रियाकारकयोस्संबंधस्यलोकतएवावगमाल्लोकसिद्धक्रियाकारकभाववलक्षणासंबंध
यादध्यनुरक्तोहोमइत्यनूद्यसइंद्रियकामस्येत्येतावन्मात्रविधानेनदध्यनुरागस्यविधेयत्वाभावान्नवाक्यभेदइत्यर्थः
ननुसोमेनयजेतेत्यादौकारकत्वंतादर्थ्यलक्षणाशेषशेषिभावसंबंधेनदृष्टंतादर्थ्यंचाविध्येकसमधिगम्यमितिवाक्य
भेदोदुष्परिहारइत्यतआहनपुनरितिक्रियानिर्वर्तकत्वमेवकारकत्वंननुतादर्थ्यपर्यंतंतथात्वेकर्मकारकस्यक्रियार्थ
त्वाभावेनकारकत्वाभावप्रसंगात्क्रियानिवर्तकत्वमात्रंचलोकगम्यमेवेतिभावःनन्वेवंदध्यनर्थकमेवस्यात्नचतत्

सोम०
७८
78

त्फलार्थत्वया होमे फलस्य विधानमुपगमात् अतो दध्नो होमार्थत्वमवश्यं स्वीकार्यमित्यत आह अत इति न हि केवल
स्य होमस्य फले विधानं मयाऽस्वक्रियते किंतु दध्यनुरक्तस्येति दध्नोऽपि फलोपयोगित्वान्नानर्थक्यमिति भावः एवं च दध्यनु
रक्तस्य होमस्य फले विधानात् दध्युपादानाभावे दध्यनुरागावश्यं होमासंपन्नेस्तत्सिध्यर्थं नियमेन फलार्थिनो दध्युपादा
नसिद्धिर्दधिहोमसंबंधविधानावश्यकत्वाभावाद्वाक्यभेदेन विनैव सिद्धो नु होत्यन्वय इत्युपसंहरति तेनेति फले विधा
नादिति फले दध्यनुरक्तहोमविधेरर्थात् तस्मान्निमित्तदधिव्यापारस्य सिध्या फले विहितत्वोक्तिरिति द्रष्टव्यं दध्न एव फले
विधेयं न दध्यनुरक्तो होमस्तन श्वनु होतेरन्वयो दुर्घट इति दूषयति अत्रेति न नु होमगतदध्यनुरागसंपत्त्यर्थमुपादीय
मानमपि दधि न होमार्थं तादर्थ्येन विध्यभावात् किंतु फलार्थमेव फलार्थं तत्रापि यद्यपि दधिनस्वतो विहितं तथापि दध्य
नुरक्तत्वेन होमस्य फले विधानेनैव दध्यनुरागविना होमात्फलासिध्या तदनुरागसंपत्त्यर्थमुपादेयस्य दध्नोऽपि फलार्थ सोम०
त्वसिद्धिरित्यस्वरसादाह अपि चेति दध्नस्साक्षात्फले विधानं मास्तु दध्यनुरक्तहोमस्यैव फले विधीयते तथापि प्राप्तस्य हो ७८

मस्य दध्यनुरागः फलसंबंधश्च विधेय इति संबंधद्वयविधानाद्वाक्यभेदस्यादित्यर्थः ननु तर्हि न दध्युपरक्तो होमः फले विधा
यते किंतु दध्येव होमाश्रितं विधीयते होमाश्रितत्वस्य चान्यतीय यैवावगमान्न वाक्यभेदो न वानुहोत्तेरानर्थक्यमिति पक्षांतरं
शंकते नन्विति ननु दध्नो द्रव्यस्य होमक्रियाश्रितत्वमनुपपन्नं तथाम्नयाश्चयिभावेत्नीया यात्मननुशासनात्तस्यान्यति
यावगमात्वमप्यनुपपन्नमिति शंकां निराकर्तुं होमाश्रितशब्दार्थमाह होम इति अस्मिन्नपि पक्षे वाक्यभेदस्तस्य इमन
सि निधायाह दध्नेति जुहोतिपदस्य समभिव्याहाराद्धोमे लत्कारकमित्यवगम्यत इ शंकले वाक्यादिति तर्हि अनेन वाक्येन दध्नो
होमसंबंधस्य च विधानाद्वाक्यभेद इति परिहरति एवमिति ननु दधिहोमयोः क्रियाकारकभावेन संबंधो लोकसिद्धस्तत्र
श्च दधिहोमसंबंधे विधिव्यापाराभावाद्धोमाश्रितदधिविधानेवा दध्यनुरक्तो होमविधिनेवा वाक्यभेद इति पक्षद्वयेऽप्युक्तवा
क्यभेदस्यो ध्यारमाशंकते नन्विति जे नेति न च दध्यनुरक्तो होमस्य फले विधाने दध्यनुरागाभावे दध्यनुरागावस्था होमासंप
त्तेरर्था देवतत्कर्तव्यतासिद्धेस्तद्भूवराम अनुवादः तथा होमाश्रितदधिविधानेपि तत्रश्च दधिहोमसंबंधकर्तव्यता याविधा

सोम० ७९ नाभावाक्यभेद इति वाच्यं एवं संति सोमेन यजेतेत्यादौवपि सोमयागयाः क्रियाकारकभावलक्षणां संबंधं लोकसिद्धमादाय के
वलयागविधेर्वक्तुं शक्यतया विशिष्टविधिमात्रोच्छेदापत्तेरिति भावः वाक्यभेदमेव संभावितवचनाव्यक्तिनिरासेन वि
शदयति तथा हीति होमस्येति तस्येति तस्येति तस्याग्निहोत्रवाक्यादेव प्राप्तत्वादिति भावः ननु दध्नाजुहोतीत्यादि गुणवि
79
धिषु यथा विहितस्यैव गुणविशिष्टतया शब्दतो विधिः फलतस्तु गुणविधिस्तथात्रापि किं न स्यादित्यत आह विधाने चेति
यत्र हि एकस्यैवाप्राप्तं तत्र परं प्राप्तस्यापि कर्मणो प्राप्तगुणविशिष्टतया पुनर्विधिरिह तु गुणसंबंधस्य फलसंबंधस्य चोभ
योरप्राप्त्या विधेरुभयत्र तात्पर्यभेदेन विध्यावृत्त्या वाक्यभेदप्रसंगान्न प्राप्तस्य कर्मणो गुणविशिष्टतया फले पुनर्विधानं सं
भवति तस्माद्धोमस्य विधाने कर्मांतरत्वमेव स्यादित्यर्थः इति चेति इति च विधेयत्वाद्वाक्यभेद इत्यर्थः ननु इंद्रियकामस्य या होम
प्राप्तिस्सा इंद्रियकामत्वावच्छिन्ना चेति वक्तुं शक्यमित्यत स्तस्यार्थमाह इंद्रियार्थेनेति कामपदस्य फलपरत्वस्यैकादशे वक्ष्य रांम०
माणत्वात्तदेवाभ्युपगंतुमन्याय्यं तद्विहाय यद्यत्र कामनोपलक्षितपुरुषपरत्वं स्वीक्रियते तथा स्वरसतः फलपरतया प्रतीय ७९

मानस्यजन्यपरित्यागेन पुरुषोपलक्षकत्वस्वीकारे न एव दोष इत्याह तदयुक्तमिति ननु वाक्यभेदादुपलक्षकत्वमेवन्यापइत्य
रूचेराह अपिचेति इंद्रियकामशब्दस्य पुरुषोपलक्षकत्वे पुरुषोपलक्षणं गौणीभक्त्यापाः कामनाया निमित्तत्वमेव पर्यवस्येदिति भा
वः विवरणाकारस्येति दध्नेंद्रियकामस्य जुहुयादिति गुणाविभक्ताकारो होमः शब्दतः प्रतीयते तत्र निबंधनमते शब्दब
लादुणाविभक्तत्वाकारेण होमस्य विषयत्वं प्रकृतनियोगे तु न गुणाविभक्तत्वाकारेण होमो विषयः किंतु स्वरूपेण एवं च
रूपभेदेन प्रकृतविषयप्रत्यभिज्ञानाभावात् पूर्वनियोगान्नियोगांतरमिंद्रियकामवाक्ये प्रतीयत इति शब्दबलवादि
नो निबंधनकारस्य मतं विवरणाकारस्य तु वस्तुबलवादित्वात् शब्दतो गुणाविभक्तहोमप्रतीतावपि न गुणाविभक्तत्वाका
रेण नियोगविषयत्वं किंतु वस्तुबलाद्भावार्थरूपहोममात्रस्यैव एवं च रूपभेदाभावेन प्रकृतविषयप्रत्यभिज्ञाबा
धाभावात् इंद्रियकामवाक्ये न नियोगांतरं किंतु स एव नियोग इति मतं एवं च लोकतस्सिद्धं गुणाविभक्तत्वाकारमाह
पत्तेन रूपेण होमस्य नियोगांतरसंबंधंस्वीकुर्वाणस्य निबंधनकारस्य मते तदाकारसंपादकस्य गुणस्य कथंचिदबद्धव्यापा

सोम० ८० 80 रंविनार्थाग्नियोगसंबंधलाभेप्रत्याशासंभवेपिविवरणमतेनतत्प्रत्याशायिनास्तिस्वरूपेगौवहोमस्यतन्मतेविषयतयान
न्वेशाद्व्यापाराभावेलोकन्तोदध्निहोमयोस्संबंधसिद्धावपिदध्नःप्रकृतनियोगसंबंधस्यकथंचिदप्यप्राप्तेस्तस्मान्
प्रकृतनियोगसंबंधस्यवाक्येनैवात्रमतेवश्यबोध्यत्वान्नुतरांवाक्यभेदस्यादित्यर्थःतस्माद्धोमसंबंधस्यदध्नोवाद
धिसंबंधस्यहोमस्यवाविधिरितिप्राभाकरमतेनयुक्तंकिंतुदध्न्येतावन्मात्रंफलायविधीयतइत्याचार्यमतमेवयु
क्तमित्याहतस्मादितितत्राचार्यमतेजुहोत्यन्वयमुपपादयितुंपर्वकृतमाक्षेपंपुनरुत्थापयतिकथमितिजुहोतेर्नोद्देश्य
तयानवाविधेयतयान्वयःकिंतुयइंद्रियकामस्सदध्नेतिइंद्रियकामोद्देशेनदधिविशिष्टंकारकंजुहोतिपरंप्रत्ययेनविधी
यतेतत्रचकारकस्यक्रियापेक्षत्वादपेक्षितक्रियासमर्पणार्थंकेवलप्रत्ययप्रयोगस्यासंभवाच्चयस्मिन्कस्मिंश्चिद्धातौ
प्रयोक्तव्येजुहोतिप्रयुज्यतेतदर्थस्यसंनिहितत्वेनानुवादसंभवान्नतुधात्वंतरंतदर्थस्याप्राप्तत्वेनअनुवादासंभवेनतस्यापि सोम०
विधेयत्वापत्त्यावाक्यभेदापत्तेरेवंचदध्नेतितृतीययाप्रतीयमानंकारकत्वंकिंक्रियानिरूपितमितिक्रियाविशेषपेक्षायांसं ८०

न्निधानाद्धुद्धौवि परिवर्त्तमान होमक्रियानिरूपितमित्यवगमात्संनिधानात्तत्क्रियाकारकाभावेन दध्यन्वेतो होमो जुहोति
नानूद्यते केवलं न तु विधीयत इति वाक्यभेदं विनैव संभवति जुहोत्यन्वय इति परिहरति उच्यत इति यत्र च नतृतीयानिर्देशः
स्रुकाग्यानुग्रह्णीतगतश्रीः प्रतीष्ठाकाम इत्यादौ तत्रापि स्रुक्स्य इतरे यांच प्रथमचरमभावस्य क्रियानिर्वर्त्यत्वान्निर्दोहक
क्रियापेक्षायां संन्निहितक्रियानुवादकत्व यागह्लाति प्रभृतिनामन्वय इति ध्येयं तत्र नाकांक्षालक्षणां प्रकरणां तस्य विनियोग
मात्र प्रमाणत्वाद् दध्नः आश्रयाकांक्षायामपि होमस्य नित्यद्रव्ये निराकांक्षत्व पाकांक्षालक्षणाप्रकरणाभावाच्चेत्यनो विवक्षि
तं प्रकरणशब्दार्थमाह संन्निधिलक्षणेति न नु धात्वर्थस्यासिद्धत्वे क्रियात्मकत्वाभावान्न जुहोते कारकान्वयः एवं च दध्नेति
तृतीयावगतं कारकत्वेन होमापेक्षं किं तु फलभावनापेक्षमेव स्वीकार्यमिति केवलं दध्न एव फले विधानं न करणाभूतस्येति नोक्त
प्रकारेणानुहोत्यन्वय इति शंकते नान्विति फलभावनापेक्षं करणत्वमिति पक्षेपि साक्षाद्दध्यादेः फलभावनाकरणत्वासंभवा
द्धात्वर्थपेक्ष्य फलभावनाकरणत्ववक्तव्यमित्यावश्यकत्वात्तदपेक्षमेव करणत्वं विभक्त्याभिधेयं श्रुतस्य च जुहोतेरनुवादक

सोम० ८१ त्वाज्ञावनाद्वारकसंबंधानुवादपरत्वकल्पनमपि नदोष इत्याशयेन परिहरति उच्यत इति यद्यपि चेति दृष्टार्थव्यापारविषयत्वे
दृष्टार्थक्रियासमवायं विना न संभवतीति सिद्धस्वभावस्य दध्यादेस्स्वरूपेणादृष्टार्थकर्तृव्यापारविषयत्वासंभवेपि अदृष्टार्थ
व्यापारविषयत्वं सिद्धस्वभावस्यापि संभवति अदृष्टव्यापारविषयत्वस्य तदुपकार्यरूपत्वात्तत्र साध्यस्वभावत्वस्याप्रयोजक
त्वादित्यर्थः तत्तद्गुणकामस्थले संभविता दृष्टव्यापारोपलक्षणार्थः प्रयाजादिशब्दः ननु कर्तृव्यापारविषयतामात्रे कार
कत्वोपपत्तेर्मैवं दृष्टार्थव्यापारविषयत्वमित्यत आह अवश्यं चेति वैयर्थ्यमिति प्रवृत्त्यन्तरानुपदेशादिति भावः दधिविशि
ष्टं वा कारकमित्यत्र हेतुः प्रत्ययार्थेति ननु उत्पत्तीयावगतकरणत्वस्य होमापेक्ष्यत्वे फलभावनाकरणत्वं गुणस्य न स्यात्तत्स्वत्या
यद्वाभावादित्यत आह फलेति ननु तर्हि फलभावनाकरणत्वस्याप्यवश्याभिधेयत्वात् दैवतत्त्वतियावगम्यमस्त्वित्यत आह न
विभक्तीति अनुपलभ्यत्वादिति भावः क्रियाविशेषापेक्षः क्रियावच्छेदकधात्वर्थापेक्ष इत्यर्थः संनिधीति एवं च विधिव्यापारं सोम० ८१
चिन्नैव संनिधिनापरस्मुत्पाच होमकारकीभूतं दधीभूतं दधीत्येतावनोर्थस्यासिद्धौ जदिंद्रियकामस्येत्येतन्मात्रएव विधेर्व्यापा

रान्नवाक्यभेदइत्यार्थह्. कारप्रभावइतिन्यायसुधात्कृतस्तुसंन्निधिलक्षणाप्रकरणेनदध्नोहोमान्वयविधायकंवाक्यंकल्प्यतेके
ल्पिताच्चवाक्यात्प्राप्तस्यहोमसंबंधस्यतुहोतिरनुवादइत्याहुः एवंचजुहोतेःसंन्निधिसिद्धार्थानुवादकतयाउद्देश्यविधेयान्य
तरसमर्पकत्वाभावान्नवाक्यभेदइत्युपसंहरतिनवाक्यभेदइतिप्रयोजनंपूर्वपक्षेफलार्थहोमेसायंप्रातःकालनियमाभावा
दनियतकालत्वंसिद्धांतेतुनियतकालएवनित्यहोमेदधिप्रयोगइतिस्तत्रार्थस्तभावार्थाधिकरणन्यायेनतफलस्यकर्म
संबंधित्वात्प्रकृतेपिफलश्रुतेः कर्मांतरं स्यादि॥ ॥समेषुकर्मयुक्तंस्यात्॥ ॥त्रिवृत्स्तोत्रीयानवकस्तोमकः
अग्निष्टोमःअग्निष्टोमसंस्थाअग्निष्टुत्अग्निष्टुन्नामकःअग्निष्टोमसामयज्ञायज्ञावइत्याग्नेयोपुप्रकृतिवत्प्राप्तंत
त्रवायव्यास्त्वितिवायुदेवताप्रकाशकऋग्वचनेनप्राकृतऋगपवादःत्रिवृदित्यनेनाविशेषात्सर्वस्तोत्रेषुत्रिवृत्त्वप्राप्तौ
अग्निष्टोमसाम्निएकविंशत्वंप्रसज्यतेएकविंशमित्यनेनेतिध्येमंअत्रत्रिवृदित्यादियजेतेत्यंतमेकंवाक्यंनतुत्रिवृदित्या
दिअग्निष्टोमइत्यंतमेकंवाक्यंतस्यवायव्यास्त्वितिचान्यद्वाक्यंतेनतस्यवायव्यास्त्वित्यादेर्नोदाहरणत्वशंकावकाशइतिध्ये

सोम॰ यं तस्य चेति इदं च वक्ष्यमाणानुवादत्वसौकर्यार्थमुक्तं रेवतिषु नेशब्दवत्त्विष्वित्यर्थः नन्वत्रानेकगुणाश्रवणे नकस्य गुणस्य फ-
८२ लेविधिरित्यज्ञानात्कथं पूर्ववत्संशय इत्यतस्तमेव दर्शयति किमिति पूर्वापवादात्संगतिरिति समुच्चयं नूधात्वर्थस्यान्यतः प्राप्तिर्गु-
णमात्रविधिरिति पूर्वाधिकरणसिद्धांतस्य येन पूर्वपक्षमाहतत्रेति ननु गुणसाध्यस्यैवाश्रयत्वायागस्य च साक्षामसाक्षाम-
साध्यत्वाभावान्नाश्रयत्वसंभव इत्यत आह सामाश्रयत्वमिति आनर्थक्यादिति नन्विति यआनर्थक्यात्तदंगेष्वित्यधिकरणे स-
सदशारत्निर्वाजपेयस्य यूप इत्यत्र सप्तदशारत्नित्वस्य वाजपेये साक्षादन्वयासंभवाद्वाजपेयांगपशुयागांगयूपद्वारान्वयो
वक्ष्यते तेनैव चन्यायेनेत्यर्थः अनेकार्थविधानमात्रेण न वाक्यभेदः विशिष्टविधिमात्रोच्छेदापत्तेः किंतु यत्रानेकार्थविधिस्थ-
ले। व्यापारं विना विशेषणवैशिष्ट्यासिद्धिस्तत्र विशेषणविशेष्यसंबंधसिध्यर्थं विशिष्टविधानार्थं च विधायकप्रत्ययस्य
व्यापारभेदाद्विधावृत्त्या वाक्यभेदश्च यथा पौर्णमास्यधिकरणे विद्वद्वाक्यविहितकर्मणामाग्नेयादिवाक्यैर्गुणविधिरिति पक्षे राम॰
प्रकृते च विधिव्यापारं विनाकृत्वाशब्देनैव वारवंतियस्य रेवतिसंबंधासिध्यान्तत्र विधिव्यापाराभावात् कृत्वाशब्दानपदसंदर्भे ८२

रेणोपस्थापितत्वेनत्स्याधारवारवंतीयस्यफलसंबंधमात्रएवविधिव्यापाराद्विध्याहृत्यभावान्नवाक्यभेदइतिपरिहरतिनेष
इतिअन्यथासिद्धांतेपिवाक्यभेदस्यादि।त्याशयेनदृष्टांतमाहयपेतिवारवंतीयप्रकरणेनेति।अत्रवारवंतियप्रकरणंवार
वंतीयप्रकृतिर्भावनान्वितिकागुणत्वेनविधीयतइत्यत्रनतात्पर्यंकिंतुरेवत्यांवृत्तीएयोस्सप्तमीद्वितीयाभ्यांकारकतयोपस्थित
योःपरस्परमन्वयस्यक्रियाद्वारकत्वात्तदन्वयघटकत्वेनकृतिरूपाख्यातेनरेवत्याधारवारवंतीयंगुणोविधीयतइत्यादिग्रंथा
विरोधःएतस्येतिप्रथमार्थविधानादपिवाक्यभेदोनशंकनीयइत्याशयेनाहएतच्छब्दइति।एतेनेतिरेवतीष्वितिस्यएतच्छब्दस्य
विरोधःएतस्येतिवार्यविधानाद्पिवाक्यभेदोनशंकनीयइत्याशयेनाहएतच्छब्दइति।
तुविधेयगुणप्रतिपादकतयाविधिशेषत्वमेवनतुअनुवादकत्वंनचविधेयगुणस्यवारवंतीयशब्देनैवसमर्पणादेत
च्छब्दवैयर्थ्यमितिवाच्यंवारवंतीयमितिद्वितीयांतेनप्रधानतयोपस्थितस्यवारवंतीयस्यफलभावनाकरणत्वान्व
यायोग्यत्वेनतद्योग्यतार्थंतस्यतृतीयांतएतच्छब्देनकरणतयानिर्देशावश्यंभावादितिभावः।एतच्छब्दस्यानुवादकत्वे
भावनाोक्तःएवमग्निष्टोमाख्यस्तोत्रसाधनतोपिनवाक्यभेदप्रसक्तिरित्याहअग्निष्टोमसामशब्दइतितन्त्वग्निष्टुतिक्रतौ

स्तोत्रांतराणामपि संज्ञावात्तेषामपि चोदकाद्विपरिवृत्त्य विशेषाद्विशिष्याग्निष्टोमस्तोत्रसंबंधानुवादाद्यागोत्सोऽवश्यंपवि
धेय इत्यत आह यद्यपीति दृष्टमितितत्तच्छक्तत्वर्थवाक्ये शब्देनोपस्थितस्य बुद्धौ विपरिवृत्तेश्चोदकोपस्थितस्तोत्रांतरा
दस्ति विशेष इति भावः॥ प्रकृतमिति प्रकृते कर्मणि कारकीभवतीति यावत् न त्साध्यत्वाभावेऽपि तदाश्रयत्वं किं न स्यादि
ति शंकां निराकुर्वन् श्लोकं व्याचष्टे कारकेति स्तोत्रस्याश्रयत्वयोग्यतायामपि नेह तत्संभव इत्याह संभवति त्विति न प्र
कृतेन विशिष्य स्वशब्देन संनिहितमित्यर्थः। एवं च श्लोके प्रकृतमिति विशेषणं स्तोत्रस्याश्रयत्वासंभवस्फोरणार्थमु
क्तमिति द्रष्टव्यं अंगमप्रकृतस्तोत्रनिर्वृत्तिद्वारा यागाश्रयत्वमुक्तं निरस्यति नचापमिति न हीति क्रियाकारकभावस्य साक्षात्सं
बंधरूपत्वादिति भावः यद्यपि पशुसोमोद्धिकरणे प्रणाड्यापि हि येन यत्क्रियते भवति तत्तस्य करणमित्युक्तं तथापि श्रा
राडुपकारस्य स्तोत्रस्य यागेकारकत्वासंभवादित्याश्रयसंबंधानुवादकत्वाभावाद्यजेतेति + दिह प्रणाड्यापि नास्ति कार
कत्वमित्याशयः किंच सान्नोद्ध्यादिवदाश्रयापेक्षत्वाभावान्न यागस्याश्रयत्व + म्यागांतरविधिरेवाचेत्याह साश्रइ

तिगतिश्चत्र उच्चारणविशेषः कापुनरसौ शब्दस्योच्चारणविशेष इति सप्तमे भाष्यकारोक्तेर्वं च सामान्यधीत्त इति प्रयोगः
उच्चारणक्रियारूपाणां साम्नामुच्चारणविषयत्वाभावेपि गुरूच्चारणानंतरभाविव्यापारविषयत्वमात्रेणोपपादनीयम्
इतिभावः न्यायसुधायां तु ध्वनिविशेषात्मकस्वरसमाहाररूपगीतिर्न क्रियेत्युक्तं उच्चयसंस्थादीनां च समाप्त्यादिक्रिया
त्वेपि संबंधिकत्वादेव क्रियांतरापेक्षत्वमिति वैषम्यं बोध्यं संबंधांतरेणेति आनय एवमुकाम उक्थ्यं गृह्णीयात् दाक्षा
यणयज्ञेन स्वर्गकाम इत्यादौ संस्थाश्रावणत्वादिरूपगुणस्य प्रकृतयागे कारकत्वाभावेपि तत्संबंधिप्रयोगपरि
च्छेदकत्वमात्रेण तदाश्रितत्वमितिभावः एवं च साम्नां गीतिरूपक्रियात्वात् कर्तृव्यापारविषयत्वार्थे दध्यादिवन्न क्रिया
पेक्षादिविरहेपि समानकर्तृकत्वनिर्वाहार्थमस्यापेक्षेत्याशयेनाह किं तदिति एवं यागस्याश्रयत्वसंभवेप्यग्नि
ष्टोमपदानर्थक्यप्रसंगान्न गुणफलविधिस्संभवतीति परिहरन्ति एवमपीति अनुवादत्वेति आज्यपृष्ठादिषु बहुषु
स्तोत्रेषु चोदकप्राप्तेषु विशिष्याग्निष्टोमस्तोत्रसंबंधानुवादे कारणाभावादितिभावः प्रमाणमिति क्रत्वर्थवाक्ये अग्नि

सोम०
८४

ष्टोमोपस्थितेर्गुणविधानार्थत्वेनास्य प्राधान्याभावात्क्रत्वर्थवाक्ये तदुपस्थितेर्नानुवादप्रयोजकत्वमिति भावः नच य
ज्ञायज्ञीयानगिरागिरेति ब्रूयादैरं कृत्वोद्गेयमित्यत्रानुवादबलात्स्थाननियमस्तद्वदिहाप्यस्त्विति वाच्यं नहि तत्राप्यनुवादस्य सा
क्षात्स्थानप्रसारणत्वं किंतु विधीयमानस्य स्थानापेक्षायां अनुवादबलादुपस्थितस्थानमेव विधिरनुमन्यत इत्येता
वन्मात्रं प्रकृते च वारवंतीयस्य न स्थानापेक्षा किंतु समानकर्तृकक्रियापेक्षा सा च यागेनैव शांतेति त्वयोगीयत्वेनात्र स्था
नापेक्षाविरहेणानुवादोपस्थितस्थानस्य विधिनाऽसंस्पर्शान्नानुवादेन स्थाननियम इति वैषम्यमिति भावः किंचेति
इदं चापाततः धात्वसंबंधे प्रत्यया इत्यधिकृत्य समानकर्तृकयोः पूर्वकाल इति क्त्वाप्रत्ययानुशासनेन क्त्वाप्रत्ययस्य
धात्वंतरार्थसमानकर्तृकत्वमेवार्थो वक्तव्यः भावना तु न धात्वंतरार्थः किंतु प्रत्ययार्थ इति पशुभावनापेक्षसमानकर्तृकत्वा
नुपपत्त्या क्रियांतरापेक्षावश्यंभावादिति अनर्थकोऽस्यातामिति अनेनैव वारवंतीयमग्निष्टोमसाम कार्यमिति क्रत्व — रांम० ८४
र्थवाक्यान्निहितं वारवंतीयमाश्विन्यरेवत्य एवफलायविधीयत्तां तासां वारवंतीयसाम्निकारकभावसंभवेन साम्नस्तदा

84

अप्रयत्नोपपत्तेर्गोदोहनेन पशुकामस्य प्रणयेदित्यादाविव संनिधापित एवाश्रयसंबंधस्य प्राप्तत्वात्तदनुवादकत्वं यावारवंती
यशब्दस्योपपन्नत्वेन वाक्यभेदाप्रसंगाच्चेति पक्षांतरनिरस्तं वारवंतीयसामाग्नित्यरेवतिविधानेपि अग्निष्टोमसामेति
यजेतेति च द्वयोरपि शब्दयोरुक्तरीत्यानर्थक्यतादवस्थ्यं तत्राग्निष्टोमस्तोत्रमासिन्यरेवतीनां फलेविधिरिति पक्षस्त्वत्रा
नाशंकनीय एवस्तोत्रनाम्न हातिदेशिकत्वाग्निष्टोमस्तोत्रस्य वारवंतीयं प्रतिरेवतीः प्रत्ययप्राप्तयत्नानुपपत्तेरिति ध्येयं प्रकृ
त्याशब्दकल्पितः कृत्वाशब्देन निर्वाहित इत्यर्थः रेवतिवारवंतीययोः कारकयोः संबंधस्य कृत्वाशब्दोक्तभावनारूपक्रियानि
र्वाह्यत्वादिति भावः रेवतिवारवंतीयेति अत्र वारवंतीयं साक्षाद्यागे विशेषणांतद्वारा रेवत्यो विशेषणमिति विवेकः नन्वग्नि
ष्टोमस्तोत्रविशेषित इत्यपि वाच्ये कथं रेवतिवारवंतीयसंबंधविशेषितत्वमात्रोक्तिरत आह तत्रेति एतस्येति षष्ठ्यंतस्य
प्रस्तयमानकर्मानुवादमात्रपरत्वे अनर्थकापत्तेरेतस्यैत धर्मस्येत्येवं प्रकृताग्निष्टद्धर्मातिदेशकत्वमेव वाच्यं ततश्च प्र
तिभृते अग्निष्टुतिवारवंतीयसामाग्निष्टोमस्तोत्रसाधनत्वात्प्रकृतिवद्विहापितत्स्थानप्राप्तेरग्निष्टोमस्तामेत्यस्यानु

सोम० वाघत्वान्नतस्यविधेयकर्मविशेषकत्वमितिभावः ननु अग्निरितिवा यव्याधारस्यैववारवंतीयस्याग्निष्टोमस्थानत्वादिहकपे
८५ देवत्याधारस्यतत्स्थानप्राप्तिरित्यतआह तदनुवद्य इतिवारवंतीयस्याग्निष्टोमस्थानप्राप्तौतदाधारभूतानांरेवतीनाम
पिअग्निष्टोमस्तोत्रसंबंधप्राप्त्यारेवत्याधारस्यापिवारवंतीयस्याग्निष्टोमस्थानत्वमुपपद्यतेएवंचवायव्यानांरेवतीभिः
प्रत्याम्नानाद्बाधमात्रंनतुतावारवंतीयस्याग्निष्टोमस्थानत्वाभावइतिभावः॥ यद्वाअग्निष्टुदादिनांनिकायित्वान्नि
कापिषुप्रयस्यविध्यंततउत्तरेषुप्रवर्त्ततइत्यष्टमेवपक्षस्यमारुतान्यायेनाग्निष्टुतःप्रथमस्यरेवतिवाकंविहितावर्मांत
रप्रकृतेसंबोध्यंएतच्चवद्इतिषष्ठ्यंतस्यधर्मलक्षकत्वपक्षेरेवतीयांतइतिशेषः। प्राभाकरमतेवक्ष्यमाणसिद्धांतहारेसु
खप्रतिपत्त्यर्थंपक्षद्वयोक्तंगुणादोषजातंसंगृह्यदर्शयतिरेवतीष्वितिप्राभाकरैस्तुगुणाधिकारस्थलेवाक्येनगुणा
विभक्तावस्थातत्पात्रपस्थितस्यकर्मणःफलेविधानमितिवाक्येननैवगुणाश्रयसंबंधस्यफलसंबंधस्यचस्वीकारात्तेषामे राम०
तदधिकरणासिद्धांतेनसिध्येदित्याहयेत्वितिननुगुणाधिकारेषुसंबंधद्वयस्यवाक्येनविधानमस्माभिर्नस्वीक्रियतेये ८५

य्योक्तदोषस्यात्‌किंतुगुणाश्रयसंबंधः क्रियाकारकभावेनलोकसिद्ध एववाक्येनकेवलंफलसंबंधकरणाद्योपादीय्यते
फलसंबंधएवतुविधीयतइ हत्युक्तसामयोस्तत्रैकारकभावेनान्वयात्संबंधस्यलोकतस्सिद्धावपिस्तोत्रयागयोरंगांगि
भावेनान्वयात्तस्यचालौकिकत्वपालोकसिद्धत्वासंभवात्तत्रापिविधेर्व्यापारावश्यंभावाद्वाक्यभेदप्रसंगेनगुणफलवि
धिनसंभवतीतिवैषम्यंशंकतेनन्वितिस्तोत्रयागयोरंगांगिभावस्यालौकिकत्वपालोकतस्सिध्यभावेपिअतिदेशतस्सिद्धि
सद्भावादिहापिनवाक्यभेदइतिपरिहरतिसत्यमितिचैवंचोदकप्राप्ताग्निष्टोमस्तोत्रसंबंधस्यफलार्थत्वयोपयोगात्स्तो
त्रस्यक्रत्वर्थत्वंनस्यादितिवाच्यंभावानबबोधान्न हिस्तोत्रमत्रगुणत्वेनाभिमतंयेनतस्यक्रत्वर्थत्वंनस्यात्‌किंतुरेवत्या
धारंवारवंतीयमेवगुणत्वेनाभिमतंतस्यचयागरूपाश्रयसंबंधघटकमात्रंस्तोत्रमितिस्तोत्रानुरक्तत्वाकारेणयागस्य
फलेनविधिः किंतुवारवंतीयानुरक्तत्वेनेतिस्तोत्रस्यक्रत्वर्थत्वेबाधकाभावादितिभावः अस्तुवास्तोत्रानुरक्तत्वाकारेणै
वयागस्यफलेविधिस्तथापिनवाक्यभेदप्रसक्तिरित्याह किंचेतितत्करणकत्वमितिदृष्टान्तार्थमुक्तंननुसमानकर्तृक

सोम० ८६

86

कत्वेनविधिपक्षेतत्वापिसिद्धांतमानिस्यात्तस्मादुभाभ्यामेवसमानकर्तृकत्वपक्षोदूष्यइत्यस्वरसादाहपद्धितीफ
लार्थगुणस्यकृत्वेनःप्रयोगशास्त्रध्यर्थमतिदेशप्राप्तनिमित्तविशेषणांननुयजिपरस्यविधेर्यागविधायकत्वयात्तस्यैवगुणा
नुरक्तस्यफलेविधिकत्वेननुस्तोत्रस्यतत्रद्विधेरसामर्थ्यादितआहयजिपरस्यतिनिर्वापेतिसौर्यंचरुंनिर्वपेदित्यत्रननु
तत्रनिर्वापस्यचोदकप्राप्तत्वयानुवादत्वात्प्राप्तत्वर्थस्यविध्यसंभवेनान्यस्यविधिस्वीकारेपिद्रहधात्वर्थस्यैवविधिर्युक्तइत्य
तआहयजेरपीतिस्तोत्रानुरागस्यत्वदुक्तरीत्यालोकसिध्यभावेनतदनुरक्तयज्यर्थस्यफलेविधानासंभवात्कर्मांतरविधिप
क्षेगौरवात्त्वाग्निष्टुद्वाक्यप्राप्तोयागोत्रानुघत्तेनिवर्तितिवदित्याश्रयणीयत्वात्तौल्यमितिभावःनन्वाग्निष्टोमशब्दस्यअग्नि
मस्तोत्रमात्रार्थत्वात्कथंचोदकप्राप्तस्याश्रयत्वनियमोयेनप्रकृतकत्वनुप्रवेशःसिध्येदित्यतआहअत्रालामिजियथा
त्वन्मतेप्रकरणादाश्रयसंबंधानंगीकारेपिदध्नेन्द्रियकामस्यजुहुयादित्यादौप्रकृतहोमाश्रितत्वमेवमीहापिचो सोम०
दकप्राप्ताग्निष्टोमस्तोत्रस्याश्रयत्वमुपपद्यतइतिभावःतत्रार्थत्वसमेयुक्तिपात्वाविशेषादाश्रयानपेक्षतयातनु ८६

त्स्येषु गुणेषु कर्मयुक्तं फलं स्यान्न गुणयुक्तमिति॥ ॥सौभरे पुरुषश्रुतेर्निधने कामसंयोगः॥ ॥सौभरस्य फलत्र
यार्थत्वं विना तत्फलान्तराधिकारस्य तत्तत्फलसाधने निधननियमस्य चासंभवात्कारिष्यमाणविचारहेतुत्वेन सौभर
स्य फलत्रयसाधनत्वमाह यद्यपि ब्रह्मसामेति ऋक्ष्यस्तोत्राणां मध्यमानीत्यर्थः सौभरं यदि स्वरूपेण फले विधीयेत
तदापरमाश्रयापेक्षाविरहात् ब्रह्मसमाश्रितत्वं न भवेदिदं तु न स्वरूपेण विधीयते किंतु अन्यत्र कारकीभूतं तत्र च कुत्र
द्रंकारकमिति तस्य स्वाश्रयापेक्षा वारवंतीयस्य तु अनन्यत्र कारकभावमनापन्नस्यैव स्वरूपेण फले विधानान्नाश्रयापेक्षे
ति वैषम्येण परिहरंति तथापीति नन्वेवाकारत्वमेवासिद्धमित्यत आह तथा हीति नन्वानर्थक्ये वारवंतीयवाक्यवदे
वकमान्तरविधायकत्वं स्यादित्यत आह स्तूयं तेन रेति वारवंतीयं त्वितिनच द्वितीयं तस्यान्वयायोग्यत्वेपि यज्ञुका
मोत्येते नेन यजेनेति एतच्छब्देन तृतीयांतेन निर्दिष्टस्य तस्य यजेतेत्यनेन करणाभावेनान्वयोग्यत्वाद्वारवंतीयस्या
पि कारकविशिष्टस्य विधिः शंकनीय॥ एतेनेत्येतत् छंदस्य साम परत्वेपि यागे साम्नः करणत्वासंभवात्स्तोत्र

सोम० ८१

स्याप्रकृतत्वाच्चात्र एतेनेतितृतीयया न्यत्र करणभावो न प्रतिपाद्यते किंतु द्वितीयांतवारवंतीयशब्देन प्रधानतया वि
हिष्टस्य तस्य पुनस्तृतीयांतेनैतच्छब्दनिर्देशं विना फलभावनाकरणत्वान्वयायोग्यत्वात् फलभावनाकरणत्वमेव एते
नेत्यनेन प्रतिपाद्यत इति वैषम्यादित्तिभावः निधनमिति प्रस्तावो द्वीय प्रतिहारोपद्रवनिधनाख्यां पंचसाम्नो भक्तयस्सं
तितत्र यांतिमा समाप्तिरूपा भक्तिस्तत्सान्निधानशब्दार्थः निधनविशेषा निधनसाधनविशेषा इत्यर्थः सोभरफलादि
ति अत्र हीषादिशब्दाः किं वृष्ट्यादिफलार्थतया विधीयंते इत्येव पूर्वपक्षकोटिः सोभरवत् हीषादिनामपि फलसा
धनत्वे तत्फलं न सौभरफलं किंतु ततोन्यदित्याशयेन सोभरफलात्फलांतरार्थत्वेनेत्युक्तं तदपि फलभेदोपि प्रसं
गाद्युत्पद्यते इत्यध्यायसंगतिस्सूचनायोक्तं पद्याभावनाभेदापवादाध्यायसंगतिः अवांतरसंगतिस्तु रेवतीवा
केयगुणफलविध्यसंभवेपीह तन्नसंभवतीति प्रत्यवस्थानाद्बोध्या पाठत इति शारवाभेन हीषादिनिधनयुक्ततया सौभ
रस्य पाठादीत्यर्थः साधनेति वृष्टिरूपफलसाधने यत सोभरं तदर्थं हीषितिनिधने कुर्यान्न निधनांतरं इत्येवं व्यवस्थावि

राम० ८१

ध्यौवृष्टिकामादिशब्दैस्तत्साधने सौभरं लक्षणाणीप्यामित्यर्थः एवं च नियमविधेऽपीयत्त्वेपि लक्षणा प्रसंगात्सन्नपुक्त इत्या
शयनोपसंहरतीति तस्मादिति ॥ प्रत्यभिज्ञापत्त इतित न ब्रूते षां वृष्ट्यादीनां सौभररूपसाधनेन निराकांक्षत्वान्न हीषादिलक्ष
णासाधनान्वयार्हतेति भावः ननु पत्त एव प्रकृतफलानां साधनांतरावरुद्धत्वं अत एव प्रत्यभिज्ञा वाधेन फलांतरत्वमित्यस्वर
सादाह किं चेति न तदिति अनेकावयवव्यक्तस्य तस्यां निमावयवमात्रसाधनीभूतेन हीषादिनानिर्वर्त्तयितुमशक्यत्वादि
तिभावः अस्तु तर्हि निधानमेवाश्रय इत्यत आह यत्विति सत्यपि चेति निधनवद्भक्त्यंतरे व्यय्यवतारसंभवादिति भावः तस्माद्वाक्य
त्वादितिभावः अस्तु तर्हि निधानमेवाश्रय इत्यत आह यत्विति सत्यपि चेति निधनवद्भक्त्यंतरे व्यय्यवतारसंभवादिति भावः त
तस्माद्वाक्यभेदाल्लक्षणा याऽन्यस्त्वा यस्याव्यवस्थाविधिरेव स्वीकार्य इत्याह तदिति ननु वृष्टिसाधनसौभरार्थतया
हीषिति शब्दस्य नियमस्तस्य निधनसंबंधश्चाविधेय इतितत्रापि वाक्यभेदस्तुल्य इति शंकां निराकर्त्तुमाह निधनसाधनत्वे
नेति पाठादेव निधनसाधनत्वेन हीषादीनां प्राप्तेस्तेषां नियममात्रमेव क्रियत इति न वाक्यभेद इति भावः अत्र वृष्टिसाध

न सौभरं नोद्देश्यविशिष्टोद्देशदोषप्रसंगात् किंतु दृष्टिसाधनमात्रं तत्तु प्रस्तुतत्वात् सौभरमेवेत्याशयेन सौभरं इत्युक्तिरिति
दृष्टव्यं ननु सौभरार्थानां हीषादीनां साक्षात्फलार्थत्वाभावात्तदभावे च फलकामसंबंधित्वेन विध्यसंभवात् वृष्टिकामा
दिशब्दानां लक्षणावश्यंभाव इत्यत आह न हीति अंगांगिभावे आनर्थक्यसत्तदंगन्यायावतारसंभवात् सौभरार्थस्यापि पु
रुषशेषतया विधिसंभवतीति भावः एवं प्रस्तुतमधिकरणं समाप्य वार्त्तिके किंचित्र क्वापि शाखायामधीतस्य सौभरस्य वृ
ष्टिफलं साधयतः हीषशब्दो नियम्यते अत्र यत्र हीषं निधनं कंपद्यते तच्छाखागतमेव वृष्टिकामस्य प्रयोक्तव्यमेवं शब्द इत्ये
वसंशय्य सर्वशाखागतस्यापि सौभरस्य वृष्ट्यर्थप्रयोगसंभवात्त्रनिधननियममात्रमेवेति पूर्वपक्षं कृत्वा प्रपद्यते रूपवि
नाशभीतेर्गीतिर्न गित्यंतरभक्तियोगं अतस्समस्तेव विकल्पमाना यथासमाम्नायमसौ नियम्येति हीषादिनिधनमुखेन सौभ
रस्यैव तत्तन्निधनयुक्तेन तयाम्नातस्य तत्तत्फलेन नियम इति सिद्धांतितं तत्तद्दर्शयति यथा प्राप्तानां चेति शाखांतराम्नाते सौ
भरे शाखांतराम्नातस्याप्राप्तेस्तन्मात्रस्य नियमो न संभवति संभवति तु यो वृष्टिकामस्य सौभरे रागोऽस्य विशेषेणोक्त एष्वर्थ

त्पासर्वशाखागतसौभरप्राप्ते ही ही षनिधनयुक्तत याम्नानमेव सौभरं वृष्टिकामस्येति नियम इति ही षादिमुखेन सौ
भरस्य वस्थैवे यमित्यर्थः प्रयोजनं पूर्वपक्षे सौभरमुखानां ब्रह्मसामकार्यमिति निन्यस्य पदि वृहत्सामाग्निरात्रस्यान्सौ
भरमुक्थानां ब्राह्मसामकार्यं यदि रथंतरसामा सौभरं कुर्यादिति नैमित्तिकस्य च सौभरस्य संनिध्यविशेषेण ही षादिगु
णाप्रत्याम्नायत्वसंभवत्तत्रापि फलार्थतयाहीषाद्यनुष्ठानं तथा वृष्ट्यार्थे सौभरे ऊर्गादिनिधनस्यापि स्वर्ग्यफलार्थं प्रयोगः सि
द्धांतेतु नेति सूत्रार्थस्तु वृष्टिकाम इत्यादिपुरुषसंयोगात्तसौभराश्रिते ही षादौ फलसंयोग इति॥ ॥ ॥इति श्रीमिहलकुल
कमलभट्टमहोपाध्यायतनूभवस्य वैकटाद्रियज्वगुरुचरणानुजस्य सोमनाथसर्वतोमुखयाजिनः कृतौ शास्त्रदीपिकाव्या
ख्यायां मयूखमालिकाख्यायां द्वितीयस्याध्यायस्य द्वितीयः पादः॥ ॥ ॥ॐ गुणास्तु क्रतुसंयोगात्कर्मांतरं प्रयोजयेत्सं
योगस्याशेषभूतत्वात्॥ ॥पूर्वस्मिन्पादे कर्मभेदः प्रतिपादितः अस्मिन्पादे तदपवादः प्राधान्येन प्रतिपाद्यत इति पा
दांतरत्वमानंतर्यं चेत्याद्युः निमित्तत्वेनेति क्रतुविशिष्टरथंतरनिमित्तमिति पक्षेपि क्रतोर्निमित्तविशेषणत्वमात्रेणापद

सोम० ८९

र्थं प्रतीत्यवस्थायां बद्धव्रीहिणा क्रत्तोरभिधानमात्रेणावाज्योतिमोनिमित्तत्वेनानुकीर्त्यत इत्युक्तिरूपपद्यत इति ध्येयं
किमयमितिश्चास्मिन्वाक्ये प्रतीयमानो रथंतरक्रतुसंयोगः किं यावतिक्रतौ स्तोत्राणि तावत्सु स्तोत्रेषु उतैकस्मिन्नित्यर्थः
तदर्थमपीति यदि रथंतरविशिष्टः क्रतुर्निमित्तं तदा कृत्स्नक्रतुसंयोगं विना विशेषणत्वासंभवात् कृत्स्नक्रतुसंयोग एव र
थंतरस्य भवति प्रकृतस्य च क्रत्तोः कृत्स्नस्य रथंतरसंयोगाभावात्कर्मांतरत्वं यदि च क्रतुविशिष्टं रथंतरं निमित्तं तदा रथंत
रस्य विशेष्यतया कृत्स्नक्रतुसंयोगस्यानपेक्षितत्वाद् कृत्स्नक्रतुसंयोग एव प्रकारणात्प्रभवतीति प्रकृतज्योतिष्टोम एव
कीर्त्यत इति फलितभावः ननु पूर्वपक्षे निमित्तत्वाभावात्तत्ती यः संशयो न युक्तः न्न च किमिह रथंतरविशिष्टक्रतुर्निमित्तम
वगम्यते उत क्रतुविशिष्टं रथंतरं निमित्तमवगम्यत इत्येवमर्थकतया पूर्वपक्षेति मितोत्वानंगीकारेपि न दोष इति वाच्यं त
थासत्यस्य संप्रायस्य सिद्धांतासिद्धितत्सिद्धिमात्रोपयुक्ततया पूर्वसंशयहेतुत्वाभावादिति चेन्न पूर्वपक्षे शब्दतः रथं सोम० ८९
तरसाम कसोमस्य ग्रहाग्रतो प्रतिनिमित्तत्वेना प्रतिपादनेपि प्रधानस्यांगानुष्ठाने निमित्ततया हेतुहेतुमतोर्लिङि·ति

पक्षेरथंतरसामसोमहेतुकानैंद्रवायवाग्रान्गृह्णीयादितिवाक्यार्थांगीकारेणाशब्दतोपिनिमित्तत्वाप
रपर्यायहेतुत्वप्रतिपादनाभ्युपगमेन चतदुपपत्तेरितिभावः नन्वस्तु बहुव्रीहिबलाद्रथंतरविशिष्टक्रतोर्नि
मित्तत्वेनत्थापिप्रकृतस्यैवज्योतिष्टोमस्यरथंतरविशिष्टस्यनिमित्तत्वंसंभवान्नकर्मांतरत्वमित्यतआ
ह विशेषणमिति अयोगव्यवच्छेदकतयाविशेषणत्वनिराकरणार्थमाह विशेष्यव्यापीतिनीलमुत्पलमित्यादौविशेषणस्यव्या
पित्वदर्शनादितिभावः ननुदेवदत्ताकुंडलीत्यादावेकदेशस्थकुंडलादेर्विशेष्यव्यापित्वाभावेपिविशेषणत्वदर्शनादिहापिरथंत
रस्यक्रत्वेकदेशेतुव्याप्त्यभावेपिविशेषणत्वंकिंनस्यादित्यतउक्तंव्यवच्छेदक इति तत्रदेवदत्तैकदेशभूतकर्णस्थस्यापिकुंडलादेर्व्या
वर्तकत्वात्संभवतिविशेषणत्वमिहतुव्यावर्तकत्वाभावान्नतत्संभव इतिभावः विशेषणाद्वयस्यक्रमेणप्रकृतेव्यतिरेकमाह ज्योतिष्टो
म इति उभयव्यतिरेकेहेतुमाह संतीति गायत्र्यादिनाम्नांसद्भावात्तद्विधिवैयर्थ्यापत्त्यानतद्व्यावर्तकत्वंतेषांसद्भावदिवरथंतरस्य
नक्रत्वव्याप्तिः गायत्र्यादिसामयुक्तक्रत्वंशेरथंतरव्याप्त्यभावदित्यर्थः ननुपत्रविशेषणासत्तानित्यपशः प्राप्तानत्रैवसत्ताप्रतिपद

सोम° ९० नस्यानर्थक्यादन्यव्यवच्छेदकत्वापेक्षा प्रकृते च रथंतरसत्ताया नित्यप्राप्तभावेन तत्प्रतिपादनानर्थक्याभावात्स्वासत्ताव्यावर्त्त
नेन विशेषणत्वमस्तु यद्वा विरोधिबृहद्व्यावर्त्तनेन विशेषणमस्त्वित्यत आह सामांतरेति रथंतरसामेति समासगम्यरथंतरस्य वि
90 शेषणत्वं समासश्च समर्थः पदविधिरित्यनुशासनात्सामर्थ्यापेक्षः सामर्थ्यं च यदि क्रतौ कृत्स्ने रथंतरमेकमेव स्यात्तदा भवति
प्रकृते च रथंतरस्य सामांतरसहितस्यैव क्रतौ सद्भावो न केवलस्येति सामांतरसापेक्षसत्ताकस्य क्रतुसंबंधात्सापेक्षमसमर्थमित्य
समर्थ्यात्समासानुपपत्तेस्तद्रूपं विशेषणत्वमनुपपन्नं न च क्रतौ सापेक्षसत्ताकत्वेपि पृष्ठस्तोत्रेऽनपेक्षत्वं शंकनीयं तत्स्यान्य
न्यपदार्थतयानुक्तत्वात्तस्मान्न कथंचिदपि रथंतरस्य प्रकृतक्रतुविशेषणत्वसंभव इत्यर्थः विशेषणशब्दो भावसाधनो बोध्यः
पर्वैत्रेति प्रकृते कर्मणि अनुवादतया निवेशमलभमानोयं गुणः स्वनिवेशयोग्यकर्मांतरविधिपरत्वमेवास्य वाक्यस्य कल्पयती
तिभावः ननु कर्मांतरपरत्वे तस्य संप्रति विधीयमानत्वात्सिद्धधर्मनिमित्तत्वप्रतिपादकयदिशब्दानुपपत्तिरित्यत आह यादि सोम°
त्तिरूचीति यदि रोचेत तदा रथंतरसामानं क्रतुं कुर्यादित्यनेन प्रकारेणोत्पर्थः आदिशब्देन गृह्णीयादिति लिङः कामप्रवेदनार्थ ९०
त्वाभिप्रायाविष्करणं =

त्र यागधेड्वा पवाग्रान् ग्रहीतुमिच्छेत्तदा रथंतरसामानं क्रतुं कुर्यादिति व्याख्यानप्रकारस्याहेतुहेतुमतोर्लिङित्यनुशासनात्
स्यादिति लिङो नैरर्थक्यं न यदि रथंतरसामा सोमो हेतुस्तदा तद्धि तु कानैंद्रवाग्रान्गृह्णीयादिति गृह्णीयादिति लिङो वा हेतुमदर्थ
त्वेन यदि ग्रहणग्रता हेतुमत्त्वेन विवक्षिता तदा तद्धेतुः सोमः कर्तव्य इति व्याख्यानप्रकारस्य च संग्रहः॥ यदि शब्दादिति प्रथमपक्षे
आनर्थक्यमेव दोषः द्वितीये रूच्यध्याहारो वा क्रमभेदश्चान्तनीये यदि गृह्णीयादिति व्यवहितान्वयः चतुर्थे त्वसिद्धस्य हेतु
त्वकल्पनाक्लेश इति चतुर्णामपि पक्षाणां दुष्टत्वात् स्वरसतः प्रकृतस्य कर्मणो निमित्तत्वप्रतिपादकयच्छब्दबलात् प्रक
रणाच्च प्रकृतस्यैव कर्मणः सोमशब्दः प्रतिपादको न कर्मान्तरस्येत्यर्थः शब्दो हीति न हि व्यवच्छेदो विशेषणशब्दस्य साक्षाद
र्थः किंतु विशेष्ये विशेषणसत्तामात्रं तत्प्रतिपादनस्य त्वानर्थक्याद्व्यवच्छेदशब्दस्य तात्पर्यकल्पनामात्रं प्रकृते रथंतरस
त्तायाः पाक्षिकत्वेन नित्यप्राप्तत्वाभावान्नानर्थक्यमिति न व्यवच्छेदेऽपि तात्पर्यं कल्पनीयं स्वार्थसत्तायां तु प्रतिपादिता
यां स्वार्थस्यासत्तारूपोऽप्ययोगोऽर्थाद्व्यावर्तितो भवतीत्ययोगव्यावर्तकत्वेनैवास्य विशेषणत्वमित्यर्थः अन्ययोगव्यव

सोम॰ ९१

९१

छेदकत्वमपि प्रकृते संभवतीत्याह यद्यपीति यद्यपि बृहद्रथंतरयोरेकस्मिन्पृष्ठस्तोत्रे न विकल्पस्तथापि बृहत्सामसा
धनकपृष्ठस्तोत्रस्य रथंतरसामसाधनकपृष्ठस्तोत्रस्य च क्रतौ विकल्पात्सामद्वयस्याप्येकप्रयोगानन्वयित्वाभिप्राया
वैकल्पिकत्वोक्तिः तत्तस्य विरोधनिबंधनत्वाद्यवच्छेदस्य बृह॰ रथंतरयोः परस्परविरोधिपर्यावर्तकत्वेन विशेषणत्वं संभ
वतीत्यर्थः सापेक्षत्वात्सामर्थ्यमुक्तं निरस्यतितिन चेति अतपेक्षस्येति यद्यप्यत्र पृष्ठस्तोत्रे न श्रुतं तथापि रथंतरं साम्नाः साक्षा
त्सोमयागसंबंधाभावादानर्थक्यात्तदंगत्वामेन पृष्ठस्तोत्रद्वारा परंपरासंबंधस्यावयोग्यत्वात्पर्यवस्यति उक्थ्यो वैरूपसामा
एकविंशः षोडशी वैराजसामेत्यादिवद्वाशमिकल्पा येन रथंतरसामेति निर्देशस्य पृष्ठस्तोत्रमात्रपरत्वावसायाद्यपि तथैव स्वी
कर्तव्यं तत्र च पृष्ठस्तोत्रेति निरपेक्षत्वात्सामर्थ्ये सति समाससंभवतद्रूपं विशेषणत्वमुक्तरीत्यान्ययोगव्यवच्छेदेनान्ययोग
व्यवच्छेदेन वा उपपद्यत इत्यर्थः तेनेति यद्यपीत्यनेनेत्यर्थः पक्षस्य सिद्धांत्यनभिमततोप्यभ्युपगमवादेन समर्थितं इति दर्शयति
सिद्धांत्यभिमतं पक्षमवलंबते अथवेति तेनेति बहुव्रीहिणा पदार्थप्रतीत्यवस्थायां विशेष्यतयावगतस्यापि क्रतोर्निष्प

सोम॰ ९१

त्तयानिमित्तत्वानर्हत्वात्तत्परित्यागेनविशेषणस्यैवतन्निमित्तत्वंस्वीकार्यंवाक्यस्यतन्निमित्ततात्पर्यकत्वेनतदनुसारेणायोग्य
विशेष्यपरित्यागेनयोग्यविशेषणएवतत्कल्पनस्यन्याय्यत्वाद्यथादध्नाजुहोतीत्यादौविशेष्यहोमस्यप्राप्तत्वेनवाक्य
तात्पर्यविषयविध्यन्वयायोग्यतयातत्परित्यागेनयोग्यस्यविशेषणतयापिप्रतीतस्यदध्नोविधिस्वीकारस्तद्वदित्यर्थः
क्रतुंयावन्नगच्छतीत्यन्वयः क्रतुपर्यन्तंनगच्छतीत्यर्थः नतुसाम्नां॥ः क्रत्वंतरेपिसत्त्वादव्यापकेनक्रतुनाविशेषणमयुक्तमयो
गव्यावृत्त्यातुविशेषणत्वस्वीकारेक्रतुनिमित्तत्वपक्षंपरित्यज्यैतत्पक्षपरिग्रहस्यप्रयोजननपश्यामइत्यतआहतत्रचेतिज्यो
तिष्टोमेपिरथंतरंक्रत्वंतरनैरपेक्ष्येणास्तीत्यर्थः एवंचापर्यायेणसर्वपदार्थग्राहिणाप्रयोगवचनेनयुगपत्सर्वैरंगैःसाम्नां
ग्रहणात्सामांतरसापेक्षक्रतुसंबंधकत्वात्तत्रास्ययोगव्यवच्छेदासंभवेनतत्पक्षपरित्यागःक्रत्वंतरस्यज्योतिष्टोमस्यचद
यकूःप्रयोगवचनकत्वेनप्रकृतप्रयोगवचनःक्रत्वंतरनिरपेक्षतयैवप्रकृतक्रतुगतंसामग्रह्णातीनिरपेक्षसामसंबंधि
त्वात्क्रतुनास्ययोगव्यवच्छेदेनविशेषणंसंभवतीत्येतत्पक्षपरिग्रहइत्यस्तिवैषम्यमितिभावः यद्वारथंतरमेवतन्निमित्तंनक्रतु

सोम० ९२ 92 विशिष्टं येनोक्तदोषस्यात्र नचैवं क्रतुबहिरध्ययनादावपि रथंतरस्य सद्भावादतिप्रसंग इति वाच्यं शब्देन प्रकृतक्रतुविशिष्टस्य
निमित्तत्वाबोधनेपि संन्निधानात्तस्यैव निमित्तत्वावगमः अनुवादस्य सति संभवे संन्निहितगामित्वादित्याशयः एवं च न विशिष्टोद्देश
दोषप्रसक्तिः प्रथमपक्षे तु क्रतोर्नित्यत्तपानिमित्तत्वासंभवाद्रथंतरेण विशेषणेपि यस्योभयं हविरार्त्तिमार्छतीत्यत्रार्त्ते हविषा
विशेषणाद्वन विशिष्टोद्देशो दोष इति द्रष्टव्यं अत्रेदमवधेयं बृहत्सामन्यभिमुक्ताग्रत्वविधानादेव पाठप्राप्तं द्वापवाग्रतायाः
रथंतरसामविषयत्वसिद्धावपि यदि रथंतरसामेति वचनं पे द्वापवाग्रतायां नैमित्तिकत्वप्रतिपादनार्थं तत्फलं च संसव उभे
कुर्याद्गोसव उभे कुर्यादिति बृहद्रथंतरोभयसामसु निमित्तभूतस्य निरपेक्षस्य रथंतरस्य बृहतश्चाभावेन उपवर्त्तीरथंतरपृ
ष्ठस्य प्रतिपदं कुर्यादनवर्त्ती बृहत्पृष्ठस्येति विहितप्रतिपद्यनिवृत्तिवद्रथंतरनिमित्तैं द्वापवाग्रतायाअपि निवृत्तिरिति प्र
योजनकर्मान्तरत्वे तस्य फलवदफलत्वापातेन ज्योतिष्टोमांगत्वात् ज्योतिष्टोमांगत्वेन केवलरथंतरसामकं कर्मान्तरमनुष्ठेयं सि सोम० ९२
द्धांते तु नैमित्तिकाग्रतामात्रानुष्ठाने यदि बृहत्सामेति वाक्यसन्निहितभुक्ताग्रतायाः प्रकृतानिवेशनिवेशादिकं च द्रष्टव्यंमत्रा

र्थस्त्वर्थांतरसामेतिसामसंयोगस्याशेषेक्रत्वंतरक्रतौ अक्रतुत्वाद्द्रव्यांतरसामेतिशब्दस्यापूर्वक्रतुसंयोगाद्द्रव्यांतरसामादिगुणाः
कर्मांतरमाक्षिपेदिति॥ ॥अवेष्टौ यज्ञसंयोगात्क्रतुप्रधानमुच्यते॥ ॥आदिशब्देनः ऐंद्रमेकादशकपालमृषभो
दक्षिणा वैश्वदेवं चरुं पिशंगी पष्ठौही दक्षिणा मैत्रावरुणीमामिक्षां वशा दक्षिणा बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणोऽस्य
स्य संग्रहः मध्य इति सर्वहविषामिति शेषः मध्ये निधायेत्यादेरैंद्रमित्यनेन वैश्वदेवमित्यनेनापि संबंधः तत्रेति आर्यप्रसिद्धिबला
त्सर्वलोकव्यापित्वात् म्लेच्छानामपि क्षत्रियादन्यस्मिन् राज्ययोगेन राजशब्दप्रयोगेन विप्रतिपत्त्यभावाच्च राज्ययोगप्रसिद्धेर्बला
वत्तया राज्ययोगनिमित्त एव राजशब्दः ननु क्षत्रियत्वजातिनिमित्तः तस्य सिद्धेरनार्यप्रसिद्धित्वात् इवि उद्देशमात्रगतत्वात् आर्या
णां जातिमात्रे प्रयोगाभावेन विप्रतिपन्नत्वाच्च दुर्बलत्वादित्यर्थः॥ अत्र म्लेच्छप्रसिद्धेर्विगीतत्वोक्त्या युक्तं बर्हिराज्यस्थलेना
र्यव्यवहारादपि जात्यर्थत्वं आर्यव्यवहारस्य जात्यव्यभिचारित्वात् इह तु ब्राह्मणवैश्ययोरपि आर्यैः प्रयोगे राजजातिव्यभिचारा
न्न जात्यर्थत्वमिति वैषम्यं सूचितं तिनेति यद्यपि ब्राह्मणवैश्ययोश्शास्त्रदृष्ट्या न राज्ययोगः क्षत्रियस्यैव परिपालनविधानात्

सोम० ९३ 93 तथापि शास्त्रे लंघनेन ब्राह्मणवैश्ययोरपि राज्ययोगस्य दृश्यमानत्वात् प्रवृत्तिनिमित्तानां यांशास्त्रमूलकत्वस्यानन्तरत्वाद्यथा
कथंचिद्राज्ययोगसद्भावमात्रेण त्रयाणामपि वर्णानां राजशब्दवाच्यत्वमुपपद्यत इति भावः नन्वेवं राज्ययोगाद्राजा राज्ञो यो
गाच्च राज्यमिति परस्पराश्रयस्यादित्यत आह राज्यपदमिति तस्येति तस्य भाव इति तस्यैत्यधिकृत्य गुणवचनब्राह्मणादिभ्यः कर्म
णि चेति कर्मणीत्यधिकृत्य चेत्यर्थः तत्रेति पुरोहितादिगणे राजाऽसे इति पाठादित्यर्थः अन्यत्राचारान्तरस्य तेर्बलवत्त्वेपि इह प्रयो
गमूलत्वाद्व्याकरणस्य तदपेक्षया प्रयोगरूपाचारस्य बलवत्त्वमिति परिहरति उच्यत इति शब्देति न कुलनरवनक्षत्रादिशब्देष्विव व्याक
रणं राज्यशब्देपि साधुत्वमात्रपरं व्याख्येयमित्यर्थः यदिशब्देति अनेन पर्वेव यदिशब्दबलान्निमित्तार्थत्वमिति प्रत्यस्थानात्संग
तिरिति सूचितं प्रागेवेति जनपदपरिपालनलक्षणराज्ययोगस्याभिषेकोत्तरकालत्वादिति भावः रूढमेति यद्यपि राज्ययोगनिमित्त
त्वेपि रूढत्वमेव न यौगिकत्वं राज्यशब्दं प्रकृतिं कृत्वा राजशब्दाव्युत्पादनात् तथापि रूढमेवेत्यस्य निरपेक्षार्थप्रतिपादकमेवेत्यर्थः परि रोम० ९३
पालनरूपराज्ययोगस्तु परिपाल्यसापेक्ष इति भावः यथाकथंचिदिति पूर्वाधिकरणपूर्वपक्षोक्तप्रकारेणेत्यर्थः अत इति पूर्वोक्तामि

येकविधमनुगृहीतप्रयोगमलकत्तयास्मरणस्ययाथार्थ्यनिश्चयादितिभावः ननुएषवोमरजाराजासोमोस्माकंब्राह्मणानांरा
जासोमोवाओषधिवांराजाराजानौचाराजानौदेवतानांयदग्नीषोमौ इंद्रोराजाजगतश्चर्षणीनां इत्यादिवैदिकनिर्देशः परिपा
लनेप्यस्त्येवतथास्मरणमप्यस्तितथाहिजनपदविशेषवाचिनोविदेहपंचालादिशब्दात्तस्यराजेत्यर्थेऽपत्यार्थप्रत्ययातिदे
शकेनतस्यराजन्यपत्यवदितिवार्त्तिकेराजशब्दस्यपालकार्थकत्वात्तस्मात्केयंजात्यर्थकत्वनिर्णयइतिचेन्न उच्यतेस्मृतिव्याकरणा
योरुभयत्रसाम्येपिअनेकार्थकत्वस्यान्याय्यत्वात्पालकत्वं क्षत्रियत्वजातिर्वा एकमेवराजशब्दार्थइतरत्रव्यवहारस्तुगौणात
यानेपः नचविनिगमनाविरहः सप्रतियोगिकोपाधिकपालकत्वरूपधर्मापेक्षयानिष्प्रतियोगिकक्षत्रियत्वजातेर्लघुत्वस्यै
वनियामकत्वात्किंचनजनपदपरिपालनंराजशब्दार्थः राज्ञानियुक्तेजनपदाधिकारिणिसत्यपितस्मिन्राजपदाप्रयोगात्त्रापि
स्वमंत्रपालनंसंरम्राजदेशविशेषेराजभावेनाभिषिक्तेतदभावात्तस्मादनुगतानतिप्रसक्तपरिपालनाभावाज्जातिरेव
राजपदार्थः क्षत्रियस्यचप्रायेणपालकत्वात्तद्गुणयोगेनब्राह्मणादिषुगौणोराजव्यवहारः यथाक्षत्रियगतशैर्य्यगुण

सोम० योगेन पक्षिराजो हंसराज इति व्यवहारस्तद्वदिति राजयोगादेवेति न तु जनपदरक्षणोरूढ इत्येवकारार्थः स्वतंत्रास्त्विति राजश
९४ ब्दस्य स्वतंत्र इत्यन्वयः प्राप्त्यभावादिति न तु राजशब्दस्य क्षत्रियमात्रवचनत्तया राजा राजसूयेनेति वाक्येन ब्राह्मणवैश्ययोः
प्राप्त्यभावेप्येतयान्नाद्यकामं याजयेदिति वाक्येन प्रकृतावेष्टेः प्रयोगान्तरविधानात्तत्र च वान्नाद्यकामत्वाविशेषेणात्रयाणा
9.4 मपि वर्णानां प्राप्तिसंभवात्सिद्धांतेपि निमित्तार्थत्वाद्दुर्वारेति चेन्न॥ एतयान्नाद्यकाममित्यत्र कर्तृत्वेन त्रयाणामपि वर्णानां नश्रु
तं किंत्वन्नाद्यकामस्य फलित्वेन श्रवणबलादाक्षेप्यं तत्र यावदाक्षेप्यमर्थं विधिः प्रवर्त्तते ततः प्रागेव स्वाराज्यकामवाक्येत्र
वेष्टिकर्तृत्वेनावगतक्षत्रियेणैव स्वस्य निराकांक्षतां पश्यन्तत्तमेवानुमन्यते न कर्त्रंतरं प्रयुक्ते यथा लब्धाप्तिविषयत्रैवर्णिकला
भेन निराकांक्षाः कर्मविधयो न शूद्रस्याप्तिविषये प्रयुंजते तद्वत्तस्मात्स्वाराज्यप्रयोगविधिसंगृहीतस्यापि क्षत्रियस्य कर्तुः प्रसंगा
दन्नाद्यकामप्रयोगेप्यन्वयापत्त्या यदि ब्राह्मणा इत्यादेर्निमित्तार्थत्वासंभवात्प्रापकत्वेनानुपपन्नमिति भावः अत्र यदि ब्रा॰ रम०
ह्मणा इत्यादिवाक्यैर्नैकर्मांतरविधिः प्रकृतावेष्टिप्रत्यभिज्ञाविरोधात्किंतु ब्राह्मणादेर्विशिष्टप्रयोगांतरविधिरेवं चान्नाद्यकामवा ९४

क्येतस्यैव प्रयोगस्य फलापेक्षस्य फलसंबंधः ननु अनाधकामवाक्ये नैव प्रयोगान्तरविधिरिति द्रष्टव्यं यद्यपि यदि ब्राह्मण
इत्यादिः प्रापकत्वे निमित्तार्थत्वे च बहिरवेष्टौ पूर्वपक्षे त्रयाणां वर्णानां कर्तृत्वं सिद्धं तेनु क्षत्रियस्यैवेति फले भेदो बोध्यः एवं स
ति राजसूयमेव विषमीकृत्य राजशब्दार्थनिरूपणे कर्तृशक्येऽपि अध्यायसंगतये प्रयोगभेदव्युत्पादनायावेष्टिवाक्योदाहरण
मिति द्रष्टव्यं सूत्रार्थस्तु अवेष्टिविषयं यदि ब्राह्मण इत्यादिकं ब्राह्मणादिकर्तृकप्रयोगान्तरप्रधानं स्यादेकस्यैव क्षत्रियस्य राज
सूयप्रयुक्तसंयोगादिति॥ ॥आधाने सर्वशेषत्वात्॥ ॥इह तर्हि प्राप्तार्थत्वान्निमित्तार्थत्वमस्त्विति प्रत्यवस्थानात्संगतिः य
द्यप्यत्र आधानप्रापका ब्राह्मणादिश्रवणानि निमित्तार्थानि तदा ब्राह्मणादीनामिव अशूद्रस्याप्यस्त्याधानं यदि तु ब्राह्मणादिवाक्यान्ये
वाधानविधायकानि तदा अशूद्रस्य पृथगाधानविध्यभावान्नाधानमित्यधिकरणप्रयोजनं इदं चानुपपन्नं ब्राह्मणादिश्रवणस्य
निमित्तार्थत्वेऽपि अशूद्रस्योपनयनाभावेन विद्याभावेन विद्याभावादेवाध्यानेऽधिकाराप्रसंगादित्याशंक्य प्रयोजनसिध्यर्थं तद्या उ
दाहरणान्तरमाह तथेति तत्र पूर्वपक्षे अशूद्रस्याप्युपनयनसंभावादस्ति विद्येति न प्रयोजनानुपपत्तिरिति भावः स एवेत्यनेन तद्

सोम०
९५

95

र्पसंशयात्तितिदेशस्यापिप्रसक्तौनह्यावृत्त्यपेक्षंस्वयमेवविदृणोतिकिमिननूपनस्यविद्यायाक्षेपसंभवेप्याधानस्यनाक्षे
पःसंभवत्तिउपनयनविद्ययोरिवाधानादवनीयाद्योःकार्यकारणभावस्यलोकतोसिद्धेरितिशंकत्तेकथंमितिलोकतः
कार्यकारणभावानवगमेपिगुणवाक्ये आधारस्याहवनीयादेश्चसाध्यसाधनभावकीर्तनात्तदवगमसंभवइतिइमंप
रीहारंपरमुखेनवाचयितुंप्रतिबंदीमाहसतिचेतिननुनक्तंगार्हपत्यमादधातीत्यादिवाक्यानांनकालादिगुणमात्रविधायक
त्वेनाधानाविधायकत्वाभावात्ततःकथंसाध्यसाधनभावप्रतीतिःनन्वाधानविध्यभावेपिद्वितीययागार्हपत्यादस्साध्यत्वे
प्रतिपादनात्समभिव्याहारादेवसाध्यसाधनभावावगमइतिवाच्यंविध्यभावेसमभिव्याहारमात्रेणसाध्यसाधनभावप्रती
तेरौदुंबराधिकरणेनिरस्तत्वादेवंचावश्यमाधानविधिर्वसंतादिवाक्येषुस्वीकार्यस्सत्तिचविधौविधिबलादेवाधानस्यप्रयो
जनाश्पंभावाद्द्वितीययास्ववाक्येसाध्यत्वेनावगताग्नीनमिवप्रयोजनत्वकल्पनौचित्याद्वसंतादिवाक्येष्वाहवनीयादि
ग्रहणाभावेपिनक्तंगार्हपत्यमित्यादिवाक्येष्वाधानसाध्यस्यगार्हपत्यादिशब्दनिर्देशादाधानवाक्येयोयमग्निशब्दस

रांम०
९५

गार्हपत्यादिपरः अन्यथा गार्हपत्यादीनां गुणवाक्येष्वाधानसाध्यत्वेनानुवादानुपपत्तेरित्येवं संभवति गार्हपत्यादीनामाधा
नसाध्यत्वनिश्चयः विध्यभावे तु केवलसमभिव्याहारान्न साध्यसाधनभावनिश्चय इत्यस्ति वे यम्यामित्यस्य वरसादाहत्य एवेति न नु
वसंतादिवाक्यादस्य कोविशेषो येनेदमाधानविधायकं स्यादित्यत आह गुणानपदत्तेति ब्राह्मणादिनिमित्तमिति अत्र सा
मान्यविधित आयां प्रेप्स्याधानप्राप्तौ सत्यां तत्कर्तृत्वेन ब्राह्मणादीनामिव कालत्वेन वसंतादीनामपि प्राप्तेर्वसंतादौ नि
मित्ते ब्राह्मणादिविधेरपि संभवाद्ब्राह्मणादिनामेव निमित्तत्वमिति नाग्रहः किंतु ब्राह्मणादौ निमित्ते वसंतादिविधिर्वसंता
दौ वा निमित्ते ब्राह्मणादिविधिस्सर्वथा वसंतादिवाक्यं नाधानप्रापकमिति नात्पर्यं येकांतिकीनिपत्ताय दिशादेति यदि शब्दादि
संज्ञावेधात्वर्थस्य प्राप्तत्वावगमाद्विधि प्रतिबंधः एवं प्रत्यामित्तयामपि प्रकृते च तदुभयाभावाद प्रत्यहः कर्मविधिरित्यर्थः
बलादितिक्रियायाः प्राप्तत्वेन लब्धिध्यसंभवे सति यदि शब्दाद्यभावेपि प्राप्तार्थत्वमात्रेण ब्राह्मणादिश्रवणस्य निमित्तत्वस्या
न्नचात्राप्यतः प्राप्तिरित्यर्थः नत्वेनैवेति अग्निसाध्यकर्माधिकारिणो वेत्यर्थः आधानविधिसज्ञावे त्वंयदधीते त्याम्नने पदब

लेनाधानसाध्याग्नीनां कर्तृसंबंधप्रतीत्या स्वीयाधानसाध्यत्वं स्यात् आक्षेपपक्षे तु आत्मनेपदस्यानुवादत्वेनाविवक्षितत्वा
अग्निभिराधानमात्राक्षेपे तित्तस्य स्वकर्तृकत्वे प्रमाणाभावात्परानुष्ठिताधाननिष्पन्नाग्निनां क्रयादिनापि संपादनं संभवती
ति भावः न चेति पद्यध्यध्ययनविधिबलादध्ययनसंपादितविद्याया एव कर्मानुष्ठानोपयुक्तत्वात् तत एव पुस्तकनिरीक्षणा
दिव्यावृत्तौ सत्याम ध्ययनमात्रसाध्याया विद्याया गुरुमनुपेत्याध्ययनस्य कर्तुमशक्यत्वादध्ययनद्वारोपनयनाक्षेपस्सं
भवति तथापि प्रत्यक्षविधौ सत्याक्षेपात् प्राप्तिवर्णानमनुचिंतं ब्राह्मणाविशिष्टोपनयनानुवादेन वसंतादिकालवि
धौ विशिष्टानुवाददोष इत्यादिदूषणोत्तानत्यर्थबोध्यं सामान्येति य एवं विद्वानिति वचनमित्यर्थः स्तत्रार्थस्तत्र आधाने
विषये व वसंतादिवाक्यं प्रापकमेव अ सर्वशेषत्वादाधानस्यकं म्व दपि क्रतुं प्रतिशेषत्वाभावेन क्रतुविधिभिराक्षेपत्तः
प्राप्त्यभावादिति॥ ॥अयनेषु चोदनांतरं संज्ञोपबंधात्॥ ॥ वसंतादिवाक्येष्वाधनमिवात्रापि कर्मांतरं विधे
यमिति प्रत्यवस्थानं तत्संगतिः न चैवं विधेत्तिदाक्षायणशब्दवाच्यस्य गुणस्याप्रसिद्धत्वेन दृध्येंद्रियकामादिष्विव फल

यगुणविध्यसंभवाद्यजिसामानाधिकरण्यादुद्भेदादिवन्नामत्वमेव वाच्यं तत एव संज्ञाबलात्कर्मान्तरत्वमित्यर्थः अपि चेति
यद्यपि कर्मगुणविधेयत्वेपि सन्निधौ त्वविभागादिति न्यायात्कर्मान्तरत्वं तथापि एकस्यानेकसंज्ञानर्थक्येन संज्ञायाः प्रकृ
तकर्मानन्वयात् दुर्योद्भलितात्पुनर्विधानात्कर्मान्तरत्वमित्येवं संज्ञानिबंधनभेदस्यैव दृढीकरणार्थमिदमिदमित्याहुः साकं
प्रस्थानमावृत्तिश्च गुण इत्यन्वयः वाक्यशेषादिति द्वे पौर्णमास्यौ द्वे अमावास्ये यजेतेत्येतस्मात् सह कुंभीरभिक्रामं जुहोतीत्येत
स्माच्च वाक्यशेषात् पौर्णमास्यमावास्यावृत्तिलक्षणगुणकुंभिभिः सह प्रस्थानरूपस्य च गुणस्य प्रसिद्धत्वात् दक्षस्य त्वसा
हितो यजमानस्येमे दाक्षायणत्विजस्ते यामयनं आवृत्तिरावृत्तितश्चतोऽभ्यासभेदविवक्षया यज्ञशब्दसामानाधिकरण्यनिर्वाहस्त
तश्च दक्षस्य यजमानसंबंधि ऋत्विक्कर्तृका वृत्यात्मको यज्ञ इत्येवं व्युत्पत्त्या साकं प्रस्थाय्यस्य सह प्रस्थानेन तत्संबंधित्वात् सा
कं प्रस्थायीय इत्येवं व्युत्पत्त्या च वाक्यशेषप्रसिद्धावृत्तिसहप्रस्थानलक्षणगुणवचनत्वमनयोरवगम्यत इति लोकतो
प्रसिद्धत्वेपि गुणस्य विधिर्नानुपपन्न इत्यर्थः अप्राप्ताविति फलार्थत्वेनेति शेषस्ततश्च वाक्यशेषः लोकतो प्रसिद्धस्य गुणस्य

सोम०
९७

स्वरूपज्ञापनार्थः ताभ्यां तु फलसंबंधविधिरिति नोक्तस्यापि वैयर्थ्यं उक्तस्यव्यवच्छेदादेः स्वरूपफलसंबंधयोर्बोधकवाक्यद्वयव
दिति भावः विधातव्यावितिलोहितोष्णीषादिवदुपसर्जनविधिरिति भावः एवं च दध्नेंद्रियकामाधिकरणन्यायेन फलायगुणवि
धिरेव नतूद्भिदादिवत्कर्मांतरत्वमित्याह यागस्त्वित्यादिना प्रयोजनं पूर्वपक्षे दर्शपूर्णमासप्रयोगाद्द्विः सौर्यादिवद्दाक्षा
यणयज्ञादेः प्रयोगः तथा दाक्षायणयज्ञस्य पंचदशवर्षप्रयोगेण दर्शपूर्णमासयोस्त्रिंशद्वर्षप्रयोगाबाधः सिद्धांते तु त
स्यैव गुणविकृतप्रयोगमात्रं त्रिंशद्वर्षप्रयोगबाधश्चेति सूत्रार्थस्तु अनेषु दाक्षायणादिवाक्येषु संज्ञोपसंबंधात्कर्मांतरं स्या
दिति॥ ॥संस्कारश्चाप्रकरणेकर्मशब्दत्वात्॥ ॥इषानिर्वापार्थशकटावयवभूतदारुविशेषः अनारभ्येति अनारभ्यो
क्तिः कर्मांतरत्वादिप्रतिपादनसौकर्यार्था फलायगुणविध्यसंभवस्फोरणार्था च तत्तश्च युक्तं पूर्वत्र कर्मणः संनिहितत्वात्फला
यगुणविधिरिह तु अनारभ्यविधानात् प्रकरणाद्याश्रयालाभेन फलायगुणविध्यसंभवात्कर्मणि गुणविधिः गुणविशिष्टक राम०
र्मांतरविधिर्वा स्वीकार्य इति पूर्वपक्षस्थानात् संगतिर्बोध्या पावदुक्ते श्रुतमात्रे इत्यर्थः इदं च अश्रुतयागविधिव्यावृत्त्यर्थमु ९७

क्तं यागविधानमित्यत्रापि गुणफलवैशिष्ट्यान्वयो ज्ञेयः इन्नरदितिसौर्यवाक्यादितरद्वायवाक्यं तस्मादितरत्सौर्यवाक्यं चेत्यर्थः

सिद्धान्ते दोषान्तरमाह यागास्थितिरित्येष्टः अस्यंता प्रसक्त इति यावत् ननु गुणविधिपक्षेपि न संभवति प्राप्तकर्मानुवादेन देवतायाः

प्राप्तत्वादेकविधाने वाक्यभेदप्रसंगान्न चायं न देवतान्तद्धितः किंतु संबंधसामान्यार्थक इति वाच्यं देवतायाः वाच्यत्वनुपपत्तेः सोयदि

तियत्तस्य यविधानात्संबंधसामान्ये ठञ्घ इति ठप्रत्ययप्रसंगादित्यत आह न चेति भवतु देवतान्तद्धितः एवायं तथापि यागा

भावे देवतात्वानिर्वाहाद्गौणापात्यान्तद्धितो निर्वाह्यः अनुवादत्वाच्च गौणानदुष्यतीति न वाक्यभेद इति भावः सर्वेति ओषधि

वनस्पतयोन्नं प्राणभृतोन्नादा इति श्रुतौ प्राणभृतां वनस्पतिभोक्तृत्वावगमात्तेन संबंधेन वनस्पतिसंबंधिनि प्राणे वायो देवता

त्वोपचारेण वायव्यशब्दोनुवाद इत्यर्थः ननु लोके प्यालंभादिसंभवात्कथमेकांततो दार्शपौर्णमासिकप्रतीतिरिति शंकां निरा

कुर्वन्नाह अत इति अनारभ्याधीतानां प्रकृतिगामि॥ कत्वान्न त्वन्नीतिरिति भावः नन्वाग्नेयस्य पुरोडाशत्वात्तत्र चरुविधानमश

क्यमत आह चरुशब्द इति यत एव पुरोडाशे चरुविधिरनुपपन्नो न एव लक्षणया पात्रं चरुशब्दः स्थालीवचन इत्यर्थः केवलगुणवि

सोम० ९८

98

धौफल्यप्रदानन्दयमाशंक्याह्भवतीति पश्चिकेत्तिसर्वेभ्यः कामेभ्य इत्ति सार्वकाम्यस्य प्रयोगभेदाधीनत्वात् भव्यादैः पाक्षिकत्व
मित्यर्थः आनर्थक्यमित्ति अनुवादस्य प्रयोजनाभावादित्तिभावः लोकेपि चेत्ति अव्यभिचरितऋतुसंबंधिष्वेव प्रकृतिगामित्वन्या
योनान्यत्र अन्यथा हिरण्यभरणादिष्वतिप्रसंगः हिरण्यभरणादिष्वतिप्रसंगादेव वैदिकत्वसामान्याद्वैदिकमेकसंवध्यालंभाद्य
नुवादेन गुणविधिरित्यपि नाशंकनीयमित्तिभावः याग स्येत्ति आग्नेयोष्टाकपालो भवतीत्यत्र पुरुषव्यापारं विना विध्यनुपपत्तेः पुरु
षव्यापारापेक्षायामवश्यकल्प्यः पुरुषव्यापारः पदान्तरार्थद्रव्यदेवतासंबंधोपस्थितयागरूप एव कल्पयितुं न्याय्य इत्ति युक्त स
त्राश्रुतस्यापि यागस्य विधिरिह तु आलंभनिर्वापयोः पुरुषव्यापारयोः श्रुतत्वात्तत एव विध्युपपत्तेरश्रुतयागविधिर्नाभ्युपेय
इतिभावः ननु यागस्याश्रुतत्वाद्देवतापदवैयर्थ्यं न्यायप्राप्तं न दुष्यतीत्यत आह न हीति उक्तमित्ति अर्थाद्वाकल्पनेत्यत्रेत्ति शेषः
आलंभनिर्वापयोरनुवादाद् स्मात्पक्षेपि नात्यंतगौरवमित्या शयेनाह तत्रेतिन चास्मात्पक्षे वापव्यपदानर्थक्यं तत्पक्षे आ
लभतेरिति कोन्वत्र विशेष इत्ति वाच्यं विधिप्रत्ययप्रयोगार्थं धातूपादानावश्यंभावेन स्वपक्षे धातोरानर्थक्याभावादित्तिभावः म

सोम० ९८

नुपक्रान्तावग्नीषोमीयेपशावालंभस्यस्पर्शस्यार्थिकत्वाद्दार्थिकस्य च चोदकाभावान्न चोदकान्नत्वाग्निरित्यत आहार्थ्या
द्धितेन हि प्रकृतिवद्देवेहाप्यार्थप्राप्तिस्संभवतीति भावः परिनिष्ठितं वाक्यार्थं वक्तुमाह न चेति सत्त्वार्थ्यस्त्वप्रकरणेऽप्रक
रणे अनारभ्य श्रुते वायव्यादिवाक्ये दार्शपौर्णमासिकस्संस्कार एवान्वयते ननु यागो विधीयते कर्मणो यागस्य शब्दाभावादिति
॥ ॥विशये प्रायदर्शनात्॥ ॥दोहाधिकारे दोहप्रस्ताव इत्यर्थः अत्र पूर्वपक्षस्यातिमंदत्वे प्युदाहरणमात्रत्वमित्यना
स्थया संशयानुपन्यासः ननु कथमत्र यागविधिरिति पूर्वः पक्षः वायव्यादिष्विव देवतासंयोगाभावान्न च प्रयासीति वत्समुप
सृजति वत्सालंभे मंत्रविधानान्मान्त्रवर्णिकदेवतालाभोस्त्विति वाच्यं उपसृजतीत्यस्य समीपधारणार्थत्वेनालंभार्थत्वाभावात्
सन्निहितवाच्यसि शब्दसामानाधिकरण्येन पशब्दस्य पुष्टियोगे नवत्सपरतया देवतापरत्वाभावाच्चेत्यत आह तत्रेति वत्साल
भोपजिमत्कर्म प्राणिद्रव्यकालंभत्वादिति सामान्यतो दृष्टानुमानाद्दस्य पजिमत्कर्मत्वाध्यवसाये यागविधित्वमुपपद्यत इत्यर्थः
यद्वा वायव्यं श्वेतमालभेतेत्यादिप्रयोगबलात् प्राणिकर्मकत्वं यं प्रयुज्यमानस्यालभेतेत्यस्य यागार्थत्वादिहाप्यालभतिना यागा

सोम० ९९ मिधानाद्यागविधिसंभव इत्यर्थः सति च यागविधित्वाध्यवसाये प्राणिद्रव्यकत्वेन अग्नीषोमीयविध्यंतप्राप्त्यादिना देवतालाभः
उपपादनीय इति भावः सामान्यतो दृष्टानुमानस्य वैदिकार्थे प्रवृत्त्यसंभवात् स्पर्शार्थकतया प्रसिद्धस्यालभतेर्यागार्थत्वे प्रमा
णाभावाद् द्व्युमालभतेत्यादौ प्राणिद्रव्यकर्मत्वेपि स्पर्शमात्राभिधानाद्यापव्यवच्छेद्यालभतेरार्थिकार्थानुवादकत्वमिति पूर्वाधि
99 करणएवोक्तं अत्र प्रकारद्वयमप्यनुपपन्नमित्याशयेन मन्यत इत्युक्तं आलंभो नामेति आलभते स्पर्श एवाद्योन यागः इत्यर्थः अ
नुमानेन निषेधति न तस्येति उभयत्र हेतुमाह लोके पीति ननु दोहनबलाद्वावत्समुपावसृजतीत्युपावसर्जनबलाद्यार्थसिद्धत्वा
दालंभविधिरप्यनुपपन्न इत्यत आह वत्ससंस्कार इति न स्पर्शमात्रं विधीयते येनोक्तदोषस्यात् किंतु चाटुकरणात्मकस्पर्शविशे
षलक्षणसंस्कारः स च नार्थप्राप्तः गोः प्रमोदातिशये चोपयुज्यते इति न तस्य वैयर्थ्यमिति भावः प्रयोजकं पूर्वपक्षे अग्निहोत्रांगत
याकश्चित्पशुयागो नुष्ठेयसिद्धांते तु वत्सचाटुकरणं तत्रार्थस्तु यागविधिस्संस्कारविधिर्वेति संशये यावदुक्तं संस्कारमात्रमे रांम०
व विधेयं दोहनादिसंस्कारप्रापपाठादिति ॥ ॥संयुक्तस्त्वर्थशब्देन तदर्थश्रुतिसंयोगात्॥ ॥उपधानमात्रमिति मात्रशब्दप्र रांम० ९९

योगादुत्तयागइत्यत्रतदप्रयोगाच्चऽतोप्रधानयुक्तो यागो विधीयतइति द्वितीयकोटेरर्थोबोध्यः कथमिति यदि बृह
स्पतिनीवारप्रकृतिके चरौ देवतानभवेत्तदा कथं बृहस्पतेर्नीवाराऽन्नंभवे पुरिरस्यर्थः न नुतद्धितचतुर्थीमंत्रवर्णानामे
वदेवतावगमकत्वेन तदभावात्प्रकृते कथं बृहस्पतेर्देवतात्वावगमइति यदि किम्भिद्धपान्तं प्रति तद्धितोप्यस्तीत्याह नेति
रीयाणामितिपदं वैश्वदेवगणस्य वस्थानात्संगतिरितिस्तच्चयन्नुपसंहरति अतइति किंच ऽप्रधानमात्रविधिस्वीकारे चरोरन्य
त्राविनियुक्तस्य संस्कार्यत्वासंभवाद्द्वितीयाश्रुतिरनुपपन्ना स्यात् यागविधिपक्षेतु तस्य यागस्यैकदेवताकत्वोषध
द्रव्यकत्वादिनाग्नेयविध्यंतप्राप्तौ चोदकप्राप्तस्विष्टकृदादिप्रतिपत्तिबाधनेन ऽप्रधाने चरोः प्रतिपत्तित्वेन विधीयतइति न
द्वितीयानुपपत्तिरित्याशयेनाह ऽप्रधानेत्विति वाक्यशेषे हि देवतात्वेन श्रूयते तत्र यदि विध्युद्देशस्य देवताकांक्षा स्यात्तदा
द्धत्वादश्रुतदेवताकल्पनायेक्षयाऽन्यायस्त्वाद्वाक्यशेषश्रुतबृहस्पतेरेव देवतात्वं रात्रिसत्रे प्रतिष्ठायाः फलत्ववत्कल्प्येत इ
हच विध्युद्देशस्य ऽप्रधानमात्रविधायकत्वेनोपपन्नस्य न देवतापेक्षा चरोरुप्रधानस्य वा देवतापेक्षाविरहात् ततो न वाक्यशे

सोम०
१००
100

यादेवतालभ इत्याह विध्युद्देशेति स्थंडिलनिर्वृत्तीति च रूपधानं प्रकरणादङ्गं गंतदंगत्वं च स्थंडिलनिर्वृत्त्यर्थतयैव उपधा
नस्य च स्थंडिलनिर्वृत्त्यर्थत्वं उपधेय चरुद्वारा न साक्षात् तत्र उपधानलक्षणसंस्कारविधिबलादेव उपधेयस्य चरोरपि उप
धानसाध्यस्थंडिलनिर्वृत्तौ विनियोगकल्पनादुपधानविधेरयमर्थो भवति उपहितेन चरुणा स्थंडिलं निर्वर्त्तयेदिति एवं चानेनै
वचनेन चरोरपि विनियोगात्संस्कार्यत्वं भवतीति द्वितीयाप्युपपद्यते अयं चार्थोऽन्यापरत्वमालायामस्पष्टः यद्यपि इष्टका
भिरग्निं चिनुत इति प्रबलश्रुत्यवगतेष्टकावरुद्धे स्थंडिलनिर्वृत्तिरूपकार्ये लिंगप्रकरणाभ्यामुपधानस्य साधनत्वेन संभव
तित्तथापि द्वितीयावगतसंस्कारत्वानर्थक्यात् दृष्टे संभवत्यदृष्टकल्पनायाअन्याय्यत्वाच्च इष्टकावरुद्धेपि चयने उपधानस्या
पि निवेशो नानुपपन्नः न चेष्टकाभिरेव स्थंडिलनिर्वृत्तिस्तथा सति परिशेषोपधानादेरप्यदृष्टार्थत्वापत्तेरिति स्थंडिलनिर्वृत्त्योपयिक
त्वं वदतोऽयं ग्रंथकारस्याशयः यथा चानेनन्यायेन होमविधिबलादेव सक्तूनां न संस्कार्यत्वलाभस्तथा नवमे वक्ष्याम इति रांम०
रीयवाक्यमपि प्राहीव्यातीत्यार्थमात्रविहितरापघ्रत्ययांतत्वेन विशिष्टदेवतार्थत्वे विध्युद्देशाकांक्षालक्षणप्रमाणाभा १००

वाघ्याकर्षं चिन्त्रीयमानमपि न दुष्यतीत्याशयेनाह तैत्तिरीयेति स्तत्रार्थस्तु चरुरर्थशब्देन कार्यशब्देन उपदधातिनासंयु
क्तस्तदर्थ एवननुयागार्थः श्रुतिसंयोगात् उपधानार्थत्वं चोपधानसंस्कार्यस्यापि चरोरार्थिकसाधनत्वाभिप्रायेण बोध्यं ॥
॥ ॥पात्नीवते तु पर्यग्निकृतत्वादवच्छेदः ॥ ॥ इह विधौ पात्नीवतमिति देवताश्रवणाद्यागांतरमिति प्रत्यवस्थानात्संगतिः पर्य
त्रेमित्वाष्ट्रवाक्यविहिते कर्मणीत्यर्थः पर्यग्निकरणांतं गरीति विधिः पर्यग्निकरणांतेंगानुष्ठानविधिः पर्यग्निकरणांतां
गकलापविधिरिति पर्यवसितार्थः तदर्थमिति अन्वयः पर्यग्निकृतस्तं पात्नीवतं कुर्यादिति न पर्वपक्षकोटेरर्थः कर्मांत
रविधिपक्षे अप्राप्तस्य पर्यग्निकृतस्योद्देश्यत्वासंभवान्नापि पर्यग्निकृतत्वपात्नीवतत्वाभ्यां विशिष्टविधिः कर्मांतरविधि
पक्षे तत्र चोदकत एव पर्यग्निकरणस्य प्राप्ताविधिवैयर्थ्यात्तस्मादयमत्र तदर्थसंशयार्थः उत्सृजतीति प्रत्ययप्रतिपाद्य
विधेः किं पात्नीवतेनान्वयः किं वा पर्यग्निकृतेनेति यदि पात्नीवतेनान्वयस्तदा वायव्यस्यायेन द्रव्यदेवतासंबंधाक्षिप्त
यागविधिसिद्धिः तत्र पर्यग्निकृतशब्दश्चोदकप्राप्तपर्यग्निकरणानुवादः उत्सृजतीति धातुस्तु यागविधिबलादुत्सर्गस्य

प्राप्तेः प्रत्ययानुग्रहमात्रार्थः पदानुपर्यग्निकृतेन विधेरन्वयः । तदा उत्सृजतिधातोः पर्वयागानुवादार्थत्वात् उत्सृजतीति यत्र स
पर्यग्निकृतमित्येवं धातुना पर्वयागमनूद्य प्रत्ययेन तत्र पर्यग्निकरणांततागरीतिविधिसिद्धेरेवं च पात्नीवतीं कुर्यादित्येव पर्वपक्षे
वाक्यार्थस्तत्र चोदकप्राप्तपर्यग्निकरणानुवादकत्वेन पर्यग्निकृतशब्दः पात्नीवतेनाप्येतीत्येतावता पर्यग्निकृतं पात्नीव
तं कुर्यादित्युक्तमिति द्रष्टव्यं । अव्यवहितेति पात्नीवतच्छब्दो विधिप्रत्ययस्याव्यवहितः पर्यग्निकृतशब्दस्तु व्यवहित इति भावः । ननु
पात्नीवतशब्दस्य प्रकृतप्रत्ययाभिज्ञापकत्वात्कथं तस्यैव यागांतरविधिप्रयोजकत्वमिति त्याशंक्याह नचेति । अनेनैव नवमो
पांत्याधिकरणे पर्यग्निकृतानारण्यानुत्सृजंतीत्यत्र पर्यग्निकरणांततागरीतिविधानस्य व्युत्पादनात्तन्न्यायेनैवात्रापि तदंतता
गरीतिविधानसिद्धेरस्याधिकरणस्य वैयर्थ्यमिति शंका निरस्तापुक्तं । तत्रारण्यानामीशानाय परस्वत आलभेत इति विहिते
प्रकृते कर्मणि प्राप्तत्वेन तद्बलात् प्रकृतकर्मप्रत्यभिज्ञायां तदंततागरीतिविधिरिह तु प्रत्यभिज्ञाविरहान्न तदंततागरीतिविधि
संभव इति शंकानिराकरणार्थत्वेनास्य वैयर्थ्याभावादिति एवं च पघपिनवमोपांत्याधिकरणस्यैव तदंततागारीतिव्युत्पाद

नपरत्वात्पर्यग्निकृतवाक्येपूर्वकर्मणोविधेयगुणाभावप्रतिपादनंतत्पूर्वपक्षएवसंगनत्विहतथापितत्रत्यमेवात्र
कर्मांतरविधुर्योद्वलनार्थमुक्तमितिध्येयंतस्यापीतिदेवतोद्देशेनद्रव्यत्यागात्मकयागोत्पत्तिवाक्याद्देवत्यागरूपस्योत्सर्गस्य
सिद्धत्वादित्यर्थः उत्सर्गविधौदोषांतरमाहपर्यग्निकरणादिविशिष्टेति उत्सर्गविधिपक्षेविशिष्टस्यैवोद्देश्यत्वापत्त्यावाक्यभेदइ
त्यर्थः प्राप्तेरितिव्यवधानेपिपौर्वापर्याविघातादितिभावः॥प्रथमंप्रोक्षितादेनत्वस्वसापेक्षस्यैवपत्नीवत्तोदेवतात्वमभ्युप
गम्यसापेक्षत्वेप्येकदेशप्रत्यभिज्ञयातन्मुखेनसमुदायलक्षणयापात्तघुक्तपूर्वयागप्रत्यभिज्ञासंभवतीत्याहयात्निवत
शब्दइतित्वंत्वग्नेप्रथमोमनोतितिमनोतामंत्रस्थाग्निशब्दोपयाग्नीषोमौलक्षयतितथापात्नीवतशब्दप्रकृतिभूतप
त्निवच्छब्दोपिलक्ष्यपत्नीवद्वत्त्रक्षकसंनूपूर्वयागमुपस्थापयितुंशक्नोतीत्यर्थः इदानीमभ्युपगमेपरिसख्यानिरपे
क्षस्यैवदेवततात्वात्प्रत्यभिज्ञासुलभेत्याहनचात्रेतिआग्नेयवदसामर्थ्यमप्यत्रनास्तीत्यर्थः स्यादित्यनंतरंकेवल
स्यासमर्थत्वंचस्यादितिशेषः ननुप्रत्येकंदेवतात्वेविकल्पःस्यात्तत्त्वयदापात्नीवतत्वंतदैवतद्धेमांगरीतिविधिःस्या

दित्यत आह नचेति युगपदिति तत्र एकक्रियावशीकारादन्योन्यनियमलाभ इति भावः प्रागेवेति तत्र आप्राप्त
परिसंख्यात्वान्नैव दोषमिति भावः ग्रहमेधायवदिति यथा ग्रहमेधीययागः आज्यभागौ यजतीति क्लृप्तप्राकृ
तोपकाराज्यभागाभ्यां निराकांक्षत्वान्नातिदेशमपेक्षते तद्वदित्यर्थः नन्वेवमपि यथाग्निकरणमात्रविधिरेव स्यान्न
तु तद्देवतांगरीति विधिः शस्वंतात्प्रापणीयासंतिष्ठतइडांता आ तिष्ठेतिवदंतशब्दाभावादित्याशंकायामसत्यंप्यत
तशब्दे भूतकालार्थकनिष्ठाबलादेवतद्देवतालाभ इति परिहारमभिप्रेत्याह शन्कोतीति ननु पात्नीवतविशिष्टोत्स
र्गानुवादेन तद्देवतांगरीतिविधौ विशिष्टोद्देशाद्वाक्यभेदः नचोत्सर्गमात्रानुवादेन तद्विधिः संभवतीति आतिप्रसंगादित्य
त आह प्रकृतेति उत्सृजतिमात्रमेवोद्देश्यसमर्पकमिति न विशिष्टोद्देशदोषः संनिधानात्प्रकृतस्यैवोद्देश इति ना
तिप्रसंगश्चेति भावः सत्वार्थस्य पात्नीवते यथाग्निकृतं पात्नीवतमिति वाक्यैकवाक्यतापन्नमानकर्मवत्वात्तद्देवतांगा
रीतिविधानेनेतरेषामभावस्यादिति॥ ॥अद्रव्यत्वानुकवस्तकर्मशेषस्यात्॥ ॥हविषेतिहविषासोमेन हविः

सोमं परेत्युपसर्गस्य एतीत्यनेनान्वये पर्यैतीति तत्र पत्नीत्यर्थः अनर्हत्वादित्ति संकल्पादिष्वनुपयोगादिति भावः कि
मुक्तेतित्यत्र प्रकृतत्वोक्तेरेव पर्ववत्त्वस्य भिन्नताविरहाद्यागांतरविधिरिति चेत्स्य व स्थानात्संगतिरिति स्पष्टं चितं तथापीति ग्रह
णस्य संस्कारकर्मणो नामधेयानर्हत्वाद् ग्रहणाव्यतिरिक्तं प्रधानभूतमेव संज्ञकं कर्म विधीयत इति कल्प्यत इत्यर्थः तथापि देव
ताभावात्तस्य कथं मागत्वाध्यवसाय इत्यत आह तच्चेति ज्योतिष्टोमे प्यद्वायवं गृह्णातीत्यादि गृह्णातिशब्ददर्शनादि हा
प्यदाभ्यं गृह्णातीति गृहणातिशब्दसद्भावात्तमेव गृह्णातिशब्दं चोदनासामान्यमादाय अस्मिन्वाक्ये विधेयं कर्म ज्योतिष्टो
मप्रकृतिकमिति निश्चीयत इति तदीयद्व्यदेवतालाभात् यागरूपत्वाध्यवसायः यथा आघारमाघारयतीतीत्यत्र आघा
रसंज्ञके कर्मण्यत्रे विहिते मांत्रवर्णिकदेवतालाभाद्यागत्वाध्यवसायः तद्वदत्र एवं च गृह्णातिरपि चोदकप्राप्तानुवाद इति भा
वः।। संस्कारकर्मणो नामीनर्हत्वे ऽपत्रापि यागविधिः स्यात्तत्र तु तदस्तीत्याह संस्कारणामिति सामानाधिकरण्यस्वानी
यमानं संस्कारनामत्वं प्रयोजनाभावान्न परिन्पतुमर्हमिति भावः आनंतर्यादिति अनंतरश्रुतत्वादित्यर्थः अत्र श्रुतत्व

सोम०
१०३

पविशेष्याभावादंशुवाकेयज्ञीत्याहृतिरदाभ्येनुविशेषणाभावादित्याहअंशावितितेनेति एवं चअंशुवाके प्रथमं तत्संस्तक
कर्ममात्रविधिकल्पनाक्लेशोनांगीकरणीयः किंच तस्य पश्वाद्यागत्वनिर्वाहोपि न संभवति कर्मस्वरूपविशेषस्याज्ञानेन विध्य
जिन्यायात्फलविशेषकल्पनाभावे फलविशेषाज्ञाने सति अनेन कर्मणेतत्फलं कर्तव्यमित्येवरूपेतिकर्तव्यताकांक्षावि
रहेणातत्फलचोदनालिंगसामान्यनिबंधनातिदेशस्याप्यप्रवृत्तेः एवं च यागत्वनिर्वाहाभावादाग्नेयाधिकरण इव कर्ममात्र
विधिर्न संभवतीति भावः ननु ग्रहत्यविशेषापरिज्ञानात् प्रयोजनाभावाच्च ग्रहणविधिरप्यनुपपन्न इत्यत आह तत्र योरिति ज्यो
तिष्टोमाव्यभिचरितगृह्णातिशब्दोपस्थितज्योतिष्टोमांगत्वे सति तत्रापि संनिपातित्वसंभवे आराटुपकारित्वस्यान्याय्यत्वा
त्संनिपातित्वस्य सोमसंस्कारद्वारेव कल्प्यत्वात्संस्कार्यसोमाख्यग्रहत्यलाभः क्रतुपकारलक्षणप्रयोजनलाभश्चेति भा
वः ननु चतुर्जुह्वांगृह्णाति चतुर्दुवायां गृह्णातीति गृह्णानेर्दर्शपूर्णमासयोरपि दर्शनान्नतत्तोज्योतिष्टोमांगत्वलाभ इत्य रांम०
रुचेराहश्रप्यवेति वाक्यमिति देवा वै यज्ञे कुर्वत तदसुरा अकुर्वत ते देवा अदाभ्ये छंदांसि सवनानि समस्थापयन्नित्यादि दे १०३

103

वावै प्रबाहुग्यहानग्रह्णन्नसएतं प्रजापतिरंशुमपश्यत्तमगृह्णीतेत्यादिचेतिशेषः गुणोत्तिपर्याये वत्यधिकरणपूर्वपक्षेपत्तिप
येणाविधिनाकृत्वाशब्दार्थविधिरेवमदाभ्यवाक्येपिग्रह्णीत्वाशब्दार्थविधिरूपपद्यतइतिभावः सत्रार्थस्तुअग्न्युक्तत्वात्तद्वचस्य
त्तदुपलक्षितदेवतायाश्चालाभात्केवलेग्रह्णातोकर्मशेषः ज्योतिष्टोमकर्मांगविधिरेवस्यादिति॥ ॥अग्निस्तुलिंगदर्शनात्
क्रतुशब्दः प्रतीयेत॥ ॥विषयवाक्यमुक्त्वा पूर्वोत्तरपक्षसौकर्यार्थमाहतत्रेमानतिगुणोविधीयतइतिपद्यपिपएवंवि
द्वानग्निंचिनुतइतिवाक्येचयनमात्रमेवविधीयतेननुज्योतिष्टोमादिगुणत्वेनतथापितस्यचयनस्यायातोग्निमित्यादिवा
क्यैः ज्योतिष्टोमाद्यंगभावावगमाज्योतिष्टोमेगुणाभूतंननुस्वतंत्रमितिद्वितीयपक्षाक्रेदप्रदर्शनायगुणइत्युक्तंपूर्वे वे
चम्येणाप्रत्यवस्थानात्संगतिरितिसूचयन्पूर्वपक्षमाहतत्रेतिप्रथमपक्षेप्रत्येवसिद्धांतपक्षंनिराकृत्यद्वितीयपक्षंनि
राकरोतितिदभावइतिनचक्रत्वंग्नेत्येवेत्यार्थवादिकफलश्रवणात्स्वातंत्र्यमशंकनीयंफलवत्त्वेसंस्कारत्वस्यैवानुपपत्तेरितिभा
वः ननुयागविधौचिनोतेः कथमन्वयः पूर्वाधिकरणपूर्वपक्षेग्रहणस्येवचोदकप्राप्तभावेनानुवादानुवादासंभवादित्यत आ

सोम० हविर्जोतिरितिपूर्वपक्षे यएवं॰निद्धानितिवाक्यस्य यागविधायकत्वेनचयनविधायकत्वाभावादिष्टकावाक्यमिष्टकावि-
१०४ शिष्टचयनविधायकंतत्त्वप्रकरणाद्यएवंविद्धानितिवाक्यविहितयागांगमितितद्वाक्यप्राप्तचयनानुवादइत्यग्निर्नोतिरित्यर्थः
अथवाक्यवदिहापियागविधानानुपपत्तिरित्याशयेनदृष्टांतिकमितिअस्यत्वात्तिदेशात्प्रागेवयागत्वाध्यवसायइतिवैष
१०५ म्यमभिप्रेत्यपरिहरतिउच्यतइतिसंज्ञायैवेतिआहवनीयाग्निप्राप्तेरग्निशब्दस्यसंस्कारकत्वन्यायेननामधेयमितिभावः अथातइति
अथातोग्निमग्निष्टोमेनानुयजंतितमुक्थ्येनतंषोडशिनातमतिरात्रेणतद्विरात्रेणेत्यादीनिचतुर्दशवाक्यानिअयंतेतत्रउक्थ्या
दिवाक्येष्वनुयजंतीतिक्रियापदमनुषज्यतेतत्राद्यानिचत्वारिवाक्यानिअग्निनामकयागस्यसंस्थादिपराणितितंद्विरात्रेणेत्यादी
निदशवाक्यानितस्यैवयागस्यकालविधायकानितत्रअंतेषुसर्वेषुवाक्येषुयजतिनानुवादादनुवादेयागसामानाधिकरण्ये
नाग्निशब्दस्ययागनामत्वाध्यवसायादस्तिप्रथमतोयागत्वनिश्चयस्तन्निर्वाहिश्चाव्यक्तत्वात्सौमिकधर्मप्राप्त्यासुकरइतिभा सोम०
वः एवंचसंस्थाविधिपरइत्युपलक्षणंकालविधिपरइत्यपिबोध्यंअनुशब्दश्चइष्टकाभिरितिवाक्यप्राप्तचयनानंतर्यस्यपरएतेने १०४

ंतिवाक्याव गताग्निष्टोमानंतर्यस्यैवानुवादक इति भावः नन्वनुवादत्वेऽप्यनुशब्दस्यानर्थक्यमित्यस्वरसादनुशब्दस्य कर्म
प्रवचनीयत्वमाश्रित्याग्निमनु अग्निष्टोमादिसंस्थेन यजनीयं एवं सिद्धान्यमिमतं वचनव्यक्तिं स्वीकारेणापि यागविधानमु
पपादयति अग्न्याधानीत्यादिना सिद्धांते इमनिवाक्यानि अग्निविनियोजकानि तत्राग्निष्टोमसंस्थायाः क्रतुत्वे धर्मत्वादग्रे स्यादग्नी
संभवादग्निष्टोमसंस्थेन यागेनेति तत्रैव यागलक्षणा उक्थ्यादिवाक्ये पुनः उक्थ्यादिशब्दानामुक्थ्यादिसंस्थामात्रपरत्वमेव
न तु तद्युक्तयागपरत्वं तासामेव संस्थानां फलवत्त्वेनाग्निप्रतिशेषित्वसंभवादिति ध्येमन त्यन्यपेति तुल्यरूपेष्वेव पौर्वापर्यद
र्शनादिति भावः ॥ अत्र विद्धवाक्य इत्यर्थः न हि विद्धवाक्ये अग्निविधिरिष्यते येनाहवनीयादिप्रापकशास्त्राद्वैविध्यसिन
गुणप्राप्तेर्नामत्वं स्यात् किंतु प्रसिद्धस्यानुवादेन तस्य संस्कारो वैयधिकरण्येन विधीयते अतो नात्र तत्र स्वव्यन्यायावतार इत्याश
येनाहतेनेति तथा यागविधेरभावादग्निष्टोमादिवाक्यानां न संस्थाविधिपरत्वमित्याशयेनाह तस्य संस्कारस्येति ननु तत्र सुवाक्ये
सुकेवलाग्निशब्दश्रवणात्कथं तत्र तत्संस्कारस्य क्रतुसंबंधसिद्धिरित्यपेक्षायां तेषां वाक्यानां क्रतुसंबंधविधिपरत्वमुपपादयति त

सोम० १०५ त्रेतिअनुशब्दः पश्चाद्भावमाह तेनु क्त्वाच पनानंतर्यरूपगुणविधित्वमेवैषामिति किस्यचित्भ्रमः स्यात्तन्निराकरणायनिष्ठ
ष्टमर्थमाह तेनेति एवं चाग्निष्टोमादिवाक्येषु यजिसामानाधिकरण्यंपपदु क्तं तद्गमित्याह नत्वत्रैति यदपि सिद्धांतिवचन
व्यक्त्याश्च परोनापि प्रागविध्युपपादनं तन्निषेधति न चावश्यमिति सत्त्राध्यस्त्व अग्निरसिशब्दोपागानामप्रत्ती यतेअन्येस्तोत्र
मन्त्रे शस्त्रमितिस्तोत्रशस्त्रयुक्तत्पानिर्देशरूपलिंगदर्शनात्स्तोत्रशस्त्रयोः कत्वेकसंबंधित्वादितिस्तोत्रशस्त्रवाक्येअनु
105 पपत्तिबलात्तलक्षणायाग्निशब्दस्यतद्युक्तकत्वपरत्वमात्रेणविद्धवाक्येमागनामत्वमग्निशब्दस्यनाभ्युपेयमितितिसिद्धांताशयः॥
॥ ॥प्रकरणांतरे प्रयोजनान्यत्वं॥ गुणभेदेति अंश्वदाभ्यादिविचारश्च प्रासंगिकः तत्र पक्षद्वयेपि कर्मभेदात्तस्य चभेदस्यना
मनिबंधनत्वादिति द्रष्टव्यं मासं वैश्वदेवेन मासं वरुणप्राघासैर्मासं साकमेधेन मासं शुनासीरीयेण मासं त्रिवृतामासं पंचदशा
नेत्यादिरादिशब्दार्थः यदाहवनीयेजुहोति अग्निष्टोमे प्रवृणक्तीत्यादिव्याव्रत्यर्थमनुयादिपसमाप्तिव्याहतेत्युक्तं ननु नैय सोम०
मिकाग्निहोत्रादेरसंनिहितत्वेनानुपस्थितत्वात्तत्रकथं मासगुणविधिरित्याशंक्यासन्निहितस्यापि नाम्नाउपस्थितिर्नानुप १०५

पन्नेत्याहतत्रेतिननुमासस्यपुरुषकृत्यासंपादयितुमशक्यत्वादनुपादेयस्यकथंविधेयत्वमित्याशंक्यमासस्यानुपादेयत्वया
योमासस्तत्रहोमंकुर्यादित्येवंशब्दतोमासोद्देशेनकर्मविधिप्रतीतावपिअप्राप्तपक्षप्राप्तित्वाद्विधेःकर्मणिमासस्एवविधेयइ
त्याहउपादेयमितिशब्दान्तराधिकरणोक्तरीत्याविहितस्यविधानानुपपत्त्याभेदोवक्तव्यस्तत्रचविधानमेवोपयुज्यतेनोपादान
मित्यर्थःतत्रभाव्येआपाततःप्रतीयमानंप्रकरणान्तरशब्दार्थमाहअप्रकृतेतिप्रागपरिज्ञातकर्माभिधानमित्यर्थःपक्षप्रा
गवगतकर्मानभिधानमित्यर्थःननुअग्निहोत्रशब्दःस्वाभिधेयंनैयमिकाग्निहोत्रमुपस्थापयतीत्युक्तत्वादिदमयुक्तमिति
पृच्छतिकथमितिवाक्यभेदप्रसंगात्प्रसिद्धाग्निहोत्रंपरित्याज्यमितिपरिहरतिउच्यतइतिननुमासंदीक्षिताभवन्तीतिमासिसो
मंक्रीणन्तीतिषड्द्वादशोपसदउपद्धिःस्वरित्वासोममुपनत्यमासमग्निहोत्रंजुहोतीतितांडिब्राह्मणेआम्नानंचदृष्टान्नोप
सद्धानन्तर्यानुवादकत्वेनोपसद्धिःस्वरित्वेत्यस्योपपत्तेर्वाक्यभेदाप्रसंगात्कथंप्रसिद्धाग्निहोत्रेगुणविधिनिरासइत्यतआ
हनहीतिप्रसिद्धाग्निहोत्रस्यकुंडपायिनामयनस्यचाङ्गाङ्गिभावाभावेनएकप्रयोगवचनपरिगृहीतत्वाभावाद्दीक्षितोनद

सोम० १०६ 106

हातिनतु होतीति न पचतीति सोमयागमध्ये पुरूषार्थहोमनिषेधेन संततपत्नीयाग्निहोत्रयोरेव दैवादेककालोपनिपाताभावाच्च
क्रमाकांक्षाविरहात्काम्येष्टीनामिवात्र पाठेन क्रमप्रापकः एवं च पाठप्राप्तक्रमानुवादकत्वेनोपसद्भिन्नारित्वेन्यस्योपपत्त्यसं
भवात् प्रसिद्धाग्निहोत्रेऽनेनोपसद्दानंतर्यमासस्याविधेयाइत्तिस्वीकार्यमितिवाक्यभेदो दुरुद्धरः इति भावः नन्वेवं गुणानिमित्तक
एवभेदास्यादित्यत आह अत्र चेति इमं पक्षं दूषयति यद्येवमिति सर्वत्रेति संख्याव्यतिरिक्तस्थल इत्यर्थः ननु शब्दांतरादीनां साक्षाद्भेद
कत्वाभावेपि परंपरयात दस्तीति शंकते अथेति द्वार द्वारिभावापन्नयोरुभयोरप्येकविषयत्वादेकपरिगणने नैवेतरस्यार्थात्सिद्धेरुभयो
स्सह परिगणनेन स्यादित्याशयेनाह नह्रीति अपि चेति न च तत्राप्युपसद्भिन्नारित्वेन्यस्यानुषंगादनेकगुणाभिधानमस्तीति वाच्यं निरा
कांक्षवाक्येष्वनुषंगे प्रमाणाभावात् ननु मासगुणस्याग्निहोत्रं जुहोतीत्यनेनानन्वयः प्राकरणिकप्रातरादिकालांतरावरोधात् किंतु गुपस
द्भिन्नारित्वेन्यनेनैनैवान्वयः एवं दर्शपूर्णमासादियागैरपि नान्वयः उप्रतिवाक्यादिश्रुतकालांतरावरोधात् ततो मासमित्यस्य दर्शपूर्णमासा सोम०
दिवाक्येषु साकांक्षत्वादुपसद्भिन्नारित्वेन्यस्यावरूपकोनुषंगस्तत्र चोपसत्सु मासस्य दर्शपूर्णमासादिकर्मगुणोपसद्दानंतर्यस्य चेत्यनेक १०६

गुणस्य विधित्वमपीति चेन्मैवं उपसद्भावोदकेन वा कुंडपायिनामयनयनगतं प्रागुदाहृतं तांडिवाक्येन चाद्य दशत्वसंख्यावरु
द्धत्वेन तद्विरोधेन नु समस्यपि मासगुणविधानासंभवस्य तुल्यत्वात्तस्माद् उपसत्सु मासविधौ अग्निहोत्रादिकर्मणि मासविधौ च व
चनांतरावगतार्थबाधस्यावश्यकत्वान्मासगुणस्य धात्वर्थसापेक्षासु गुणाभक्तासु चोपसत्सु न विधिः किंतु तन्निरपेक्षे प्रधाने अनेन धात्व
र्थ एव विधिर्युक्त इति दर्शपूर्णमासादिवाक्येषु उपक्रिस्थारित्वेन्यस्यानुषंगाभावादिति भावः वार्तिकोक्तं प्रकरणांतरशब्दार्थमुपाक्षिपति
किंत्वन्यदिति उच्यत इति यत्र पूर्वकर्मसंनिहितं तत्र तदनुवादेन गुणविधिः यथा दध्नाजुहोतीत्यादौ यत्र तु कर्म न संन्निहितं तत्र पूर्वकर्मप्र
त्यभिज्ञाभावेन तत्र गुणविधित्वासंभवाज्ञावार्थाधिकरणन्याये न धात्वर्थविध्यवश्यंभावाद्विहितस्य विधानानुपपत्त्या सिध्यति कर्मभेद
इत्याशयः ननु पूर्वकर्मणां संन्निहितत्वेपि सगुणस्यानेगुणात् हृष्टशक्तिकत्वाद्विधेर्यथा पहवनीयं जुहोतीत्यादौ जुहोति शब्देन
कर्मणा उपस्थापनमाश्रित्य तत्र गुणविधिः स्वीक्रियते तद्वदिह किं न स्यादित्यत आह शब्दादिति एवं चासंनिधानाद्भेद इत्युत्सर्गस्य उपा
देयगुणाश्रवणे अपवादेप्यनुपादेयगुणस्थलेन प्रवृत्तिरिति भावः यद्यपि वारुणपानिष्कासेन तुषैश्चावभृथं यंतीत्यत्रोपादेयगुण

सोम॰ १०७

स्थलेपिकर्मान्तरत्वंयंप्रकारस्येष्टंअतएवसन्नमेतत्तथावक्ष्यःसोमादित्यत्रवक्ष्यतियंतीत्यनेननुप्रकरणान्तरन्यायेनकर्मान्
रंविधीयतेतत्रप्रयुज्यमानोवक्ष्यशब्दोमुख्यावक्ष्यसादृश्यंविदधत्धर्मान्तत्तिदिशतीतितथाप्यनुपादेयगुणाश्रवणावदुपा
देयानेकगुणाश्रवणमप्यपवादकमितितिनदोषइत्याहुःनन्वसंन्निधानाविशेषेउपादेयत्वानुपादेयत्वाभ्यांकोविशेषइतिशंकां
निराकुर्वन्श्लोकंव्याचष्टेअसंनिहितमितिकथंचिदितिअभिधानादिनाबुद्धौविपरिवृत्तिंसंपाद्येत्यर्थःतत्रआहवनीयादेर्गु
णस्यकर्मोद्देशेनउपादेयत्वसंभवात्विशिष्टविधिगौरवभीत्याकर्मणःउद्देश्यत्वावश्यंभावेदूरस्थस्यापितस्यकथंचित्बुद्धौ
विपरिवृत्तिंसंपाद्ययज्जुहोतीत्येवमुद्देशासंभवात्कर्मोद्देशेनगुणविधिःसंभवतीत्याशयेनाहतत्रहीतिअनुपादेयगुणस्थलेतु
कर्मोद्देशेनगुणविधिमिच्छतायद्धोमंकुर्यात्तन्मासमित्येवंवचनव्यक्तिःस्वीकार्यानचसास्वीकर्तुंशक्यतेकर्मोद्देशेनमास
स्यदध्यादिवदुपादानानर्हत्वात्तथावचनव्यक्तेरयोगात्तत्रकर्मणःप्राप्तवन्निर्देशस्यासंभवेनकर्मणएवमासोद्देशेनवि
धिर्वाच्यःततश्चविहितस्यविध्ययोगात्तत्रकर्मभेदआवश्यकइत्याहयत्रेतिनचेतिमासस्यदध्यादिवत्संपादनानयनग्रह

सोम॰ १०७

107

रागादिक्रियांतराविष्टत्वात्तदुपादेयत्वाभावादित्यर्थः मासोद्देशेन कर्मोपादानेपि कर्मणस्तत्रैव कर्तव्यत्वात्तत्कर्मविशिष्ट
त्वयैव विधेयत्वं मासे कर्मणोनुष्ठेयतायाश्चैव परोद्देशप्रवृत्तकृतिव्याप्यत्वलक्षणपारार्थ्यात्मकं शेषत्वं च मासस्योपपद्यत इ
ति भावः ननु पौर्णमास्यां पौर्णमास्या यजेतेत्यादौ कालोद्देशेन कर्मणस्तद्वादेयत्वेपि यथा नकर्मांतरत्वं तद्वदिहापि किं न स्यादित्यत आ
ह सान्निधानेतितद्वैषम्यं संनिधौ त्वविभागादित्यपत्रव इष्यत इति भावः कालेउक्तन्याये देशनिमित्तयोरव्याप्तिं दिशति एवमिति
त्र्यागोरणां संकल्पः अप्रवर्तमानस्य सत्रसंकल्पो विश्वजिद्यागस्य निमित्तमिति भावः॥ न चैवं य इष्ट्या पशुना सोमेन वा य
जेत सोमावास्यायां पौर्णमास्यां वा यजेतेत्यत्राप्यनुपादेयकालसमभिव्याहारात्कर्मांतरत्वास्यादिति वाच्यं तत्र य इष्ट्या यजे
तेति यच्छब्दसमभिव्याहृताख्यातेन कर्मणः सिद्धतयैव प्रतीत्या तद्विरोधेनयः पौर्णमास्यादिकालस्तत्र इष्ट्या यजेतेत्येवंरूप
वचनव्यक्तिस्वीकारस्यायुक्ततया कर्मणो विध्यसंभवे यथाश्रुतवचनव्यक्तिस्वीकारेणैव य इष्ट्या यजेतेत्यनेन दूरस्थमेव
कर्म सिद्धतयानूद्य द्वितीयेनाख्यातेन तत्र गुणविधेरेव वाक्यस्वरसतः प्रतीयमानस्य स्वीकर्तव्यत्वादिति भावः ननु संनिधा

नासंन्निधिकृतविपरिवृत्त्यभावेपिनामधेयकृततन्तद्विपरिवृत्तिस्संभवतिनचनाम्नाविपरिवर्त्तमानेपितस्मिन्ननुपादेय
मासविध्यसंभवाद्विपरिवृत्तिरप्रयोजिकेतिवाच्यंप्रसिद्धाग्निहोत्रेमासविध्यसंभवेपिप्रसिद्धस्यैवाग्नेहोत्रस्यनाम्नाविपरिव
र्त्तमानस्यकुंडपायिनामयनांगत्वेनविधिसंभवादितिशंकतेनन्विति प्रथमंनामधेयेनधात्वर्थस्यविपरिवृत्तिमभ्युपगम्यप
रिहरतिभवत्वित्तितेनेतिअग्निहोत्रादिशब्दोहिधात्वर्थस्यैवनामधेयंनतुभावनायाःइतितेनभावनोपस्थित्यसंभवात्प्रसि
द्धाग्निहोत्रस्यकुंडपायिनामयनांगत्वेननविधानेपिभावनाभेदोपरिहार्यइतिभावः इदानीमभ्युपगमंपरित्यज्यपत्तिधात्वर्थो
पीतिपादशइतिलिंगसंख्याद्यन्वयानहोसत्वभजइत्यर्थः ननुनाम्नातद्रूपोपस्थित्यभावेपिनैयमिकाग्निहोत्रेअग्नि
होत्रशब्दोपद्रूपवाचकस्तद्रूपविपरिवृत्तिरस्त्वितिशंकांनिराकर्तुंविधेरुपनीयतइत्युक्तंप्रसिद्धाग्निहोत्रस्यविध्यर्थे
हित्वयाविपरिवृत्तिरुच्यतेविधिप्राप्तसिद्धरूपस्यनामोपस्थाप्यस्यनसंभवतिभावार्थाधिकरणेधात्वर्थस्यविधिविषयाकारस
मर्पणाधातुनैवननाम्नेतिप्रतिपादनात्तत्प्राप्तसिद्धरूपस्यविपरिवृत्तिर्विध्यनुपयुक्तेतिभावः विधेरूपनीयतइतिपरिहारग्रं

येविध्युपयोग्युपस्थितिर्नाम्नानसंभवतीतिप्रतिपादनादस्माभिःशंकायांप्रसिद्धाग्निहोत्रस्यकुंडपायिनामयनांग
त्तयाविधौतात्पर्यंवर्णितमितिबोध्यंननुयत्रनामधेयंप्रसिद्धंतत्रआख्यातंनामपरंतत्रयथादर्शपूर्णमासाभ्यांस्वर्गका
मोयजेतज्योतिष्टोमेनस्वर्गकामोयजेतेत्याख्यातंअग्निहोत्रादिनामधेयंचप्रसिद्धार्थमितीहापिआख्यातस्यनामपर
तंत्रत्वात्तदनुसारेणप्रसिद्धस्यैवाग्निहोत्रस्यकुंडपायिनामयनांगतयाविधिरस्त्वितिचेन्नैवंनहिदर्शपूर्णमासज्योतिष्टो
मफलवाक्यगतंनामधेयंस्वातंत्र्येणकेचिदर्थमुपस्थाप्यतत्राख्यातमवस्थापयतीत्येवंरूपंनामधेयस्यस्वातंत्र्यमत्राग्नि
त्याख्यातस्यतत्पारतंत्र्यमभिप्रेतंयेनप्रकृतेपितत्पायेननामोपस्थापितप्रसिद्धाग्निहोत्रेआख्यातावस्थानंस्यात्त
त्रापिहिनामधेयंप्रधानभूताख्यातमुखप्रेक्षंसत्तत्स्वरसोपस्थितार्थएववर्ततेतेनतत्रसंनिधिवशादाख्यातेनस्वरसो
पस्थिताग्नेयादिव्यतिरिक्तार्थेनामधेयानामाख्यातव्यवस्थापकत्वाभावात्किंतुसंनिध्यविशेषादाख्यातेनप्राकरणि
कसर्वकर्मपरामर्शप्रसक्तौतन्मध्यएवकेषुचित्कर्मस्वाख्यातंनामधेयानिसंकोचयंतीत्येतावन्मात्रंतस्मादिहापिआख्या

सोम०
१०९

109

त्स्वरसावगतार्थ एव नाम्नः प्रसिद्धस्यापि वृत्तिर्वीच्याख्यातं चासंन्निधानात्स्वरसतः कर्मान्तरमेवोपस्थापयती
तीति तत्रैव नाम्नः साप्तमिकन्यायेन सादृश्याद्वृत्तिरिति सिद्धं कर्मान्तरत्वमिति भावः एवं चातिरात्रश्चतुर्विंशश्चत्वारोभिप्ल
वाषडहा इत्यादौ पठ्याख्यातं नास्तीति तत्र केवलनामधेयेन प्रसिद्धस्यैव कर्मणोऽतिरात्रः कार्य इत्येवं विधिसंभवान्न तत्र धा
त्वर्थभेदः किंतु भावनामात्रे भेदः तदुक्तं मिधत्ते भावनामात्रं धात्वर्थो नायजिश्रुतेरिति एकादशिनीवत्पत्नीकापरिवृत्ति
स्यादिति दाशमिकाधिकरणे ऽभिप्लवषडहगतज्योतिरादिषु गवामयनगतेषु एकाहिकधर्मातिदेशोक्तिश्च कर्मभे
दाभावात् भावनाभेदमात्रेणोपपादनीया इति प्रौढिवादेन कार्त्तिकोक्तं सर्वत्र भावनाभेदपक्षमाह तद्भेदेपीति प्रयो
जनं पर्वपक्षे प्रसिद्धाग्निहोत्रे यावज्जीविकाधिकाधर्मासस्य विकल्पः कुंडपायिनामयने अग्निहोत्रानुष्ठानं च सिद्धं तेन तदुभया
भाव इत्यादिसूत्रे प्रयोजनशब्दो धात्वर्थः भावनापरो वा॥ ॥फलं चाकर्मसंन्निधौ॥ ॥पर्ववद्दित्पने न पर्वन्यायातिदेशात्से
गतिरिति सूत्रं चितं यजमानसंस्कारवाचकशब्दाभावात्कथं तत्रैव धातव्या विधिरिति शंकानिराकरणार्थमुक्तं दीक्षणीयाकार्येति

राम०
१०९

दीक्षणीयाशब्दस्तत्कार्ययजमानसंस्कारलक्षणार्थक इति भावः अतिदेशस्य विशेषाशंकानिराकरणार्थत्वमित्याशयेन
जातमाह पर्वेति तिद्वेति पर प्रकरणगतत्वलक्षणप्रकरणांतरमेवेत्यर्थः अस्य प्रकरणस्यत्रैधातवीयाधामव्यापनात् प्रकारांत
रमाह योवेति ननु पुरुषप्रवृत्तविषयस्य फलस्य कथमुपादेयत्वमित्यत आह शब्दल इति कामनामुखेन फलस्यापि पुरुषप्रवृत्ति
विषयत्वं संभवतीति भावः दर्शपूर्णमासस्थेन यजमानेन स्वकामसंपादनवत् काम्यत्रैधातवीयाप्रयोगे सौवाम्यमेधे यजमान
संस्कारस्यापि संपादयितुं शक्यत्वात् तत्रापि नकर्मांतरत्वमित्यतनेनैवोक्तं प्रायंमासादिवदिति देशनिमित्तसंग्रहार्थं आदिशब्द
स्य रस्वत्या दक्षिणे तीर इति स्वतस्सिद्धस्यैव देशस्य ग्रहणादनुपादेयत्वं प्राकसिद्धस्यैव निमित्तत्वात्तस्याप्यनुपादेयत्वमत एव दे
वकालनिमित्तानि पूर्वाधिकरणे एवोक्तानि इदं तु फलसंस्कार्यमात्रविषयमीति भावः॥ प्रथमप्रकारं निरस्यति पूर्वत्रेति द्वितीयं
निरस्यति यद्यपीति स्वरसादिति कामनामुखेन फलस्य प्रवृत्तिविषयत्वाङ्गीकारे कामनाविबलात्संपाद्यस्यात् न चात्र समुद्रम
नोध्यानादिवद्विधितः कामनासंपाद्यते किंतु स्वरससिद्धैव नतत्र स्वारसिककामनामुखेन फलस्य विध्यधीनप्रवृत्तिविषयत्वास

सोम०
११०

110

भवेनोपादेयत्वासंभवादुद्देश्यत्वमेवेतितदुद्देशेनकर्मैवोपादेयमित्यर्थः ननुअस्तुउद्देश्यत्वंतथापिदेशादिवद्विधेयत्वंकिं
नस्यादित्यतआह फलत्वेतिव्याघातमेवोपपादयतिविधीतिविधेयत्वेदेशकालवदेवांगंस्यात्तस्मात्देशकालयोस्सिद्धवत्का
ररूपोद्देश्यत्वेपिकर्मणस्तत्रानुष्ठेयतयातद्विशिष्टवैधेरागतयोरपिविध्यधीनप्रवृत्तिविषयतयाविधेयत्वमुपपद्यतेफलस्यतु
स्वारसिकप्रवृत्तिविषयत्वलक्षणाप्रयोजनरूपेणोद्देश्यत्वंतन्नविधेयत्वविरोधिविधेयत्वेविध्यधीनप्रवृत्तिविषयत्वापत्त्यास्वा
रसिकप्रवृत्तिविषयत्वरूपप्रयोजनत्वव्याघातादितिवैषम्यमितिभावः संस्कार्यस्यापिविधेयत्वेतरसिद्धस्यफलवदुद्देश्यतयातद्
देवप्रधानत्वात्तद्व्याघातप्रसंगान्नविधेयत्वमित्याह एवमितिप्रयोजनंपर्वपक्षेरुक्तामार्थनष्टथवक्ष्यप्रयोगः किंतुगुणफलवद्द
र्शपूर्णमासप्रयोगेणोवतत्सिद्धिस्सिद्धांतेतुकर्मांतरत्वात्प्रथक्प्रयोगइतिइदंचप्रयोजनंशक्यतेहितद्दर्शपूर्णमासस्येना
पिकामयितुमित्यग्रंथेन्नैवमस्वरसितंकेचित्तुफलेचफलसंस्कार्यदेशकालनिमित्तलक्षणमनुपादेयपंचकमेवप्रकरणांतरलक्ष रांम०
णाप्रमाणस्यसहकारिनपरप्रकरणपाठः फलाद्यात्मकानुपादेयसमभिव्याहारादसन्निधौसतितत्तएवमेदंसंभवादित्य ११०

स्यस्तत्रस्यासंनिधिप्रयोजकफलाद्यनुपादेयपंचकप्रदर्शनमात्रेणतात्पर्यप्रकरणांतरशब्दस्यासन्निधानार्थकस्यव्याख्यानात्व
चनादप्यवगतिसंभवात्फलविधेयत्वस्यालिङ्गस्तत्रेयमुक्ताद्यादौ चव ठकु धानिरासाच्च प्रागुक्तविशेषाशंकाप्रकारद्वयस्या
पिमंदत्वेनाधिकरणांतरानर्थक्यात्तत्रश्चानुवादेयपंचपरत्वमेवसौत्रफलपदस्यान्नतुफलसंस्कार्यमात्रपरत्वमितिवदं
ति॥ ॥संनिधौत्वविभागात्फलार्थेनपुनःश्रुतिः॥ ॥अनुपादेयसहकृतासंनिधेर्भेदकत्वेऽभिहितेफलमात्रप्रत्युदा
हरणारयोगात्सूत्रेफलग्रहणंभाष्येतदुदाहरणंचोपलक्षणार्थमितिदर्शयन्नेवसंगतिमाहसर्वेषामितिसमइत्याद्यामिनी
णिवाक्यानिदर्शपूर्णमासयोर्देशकालनिमित्तपरारिणश्चवेष्टेःफलपरमेतयेतिवाक्यंस्वीकृत्यपजन्नीतिविहितस्वि
ष्टकृद्यागस्यसंस्कार्यपरंशेयादितिवाक्यमितिविवेकःननूपादेयत्वमात्रेणाकथंविधेयत्वमित्यतस्तदुपपादनपूर्वकं
श्लोकंव्याचष्टेविधानमेवेतिननुदेशादेरुद्देश्यत्वेपिकर्मणउद्देश्यत्वमेवास्त्वितिशंकानिराकरणार्थमवश्यमित्युक्तंउद्देश्य
द्वयान्वयासंभवादेकस्योद्देश्यत्वेऽपरस्योपादेयत्वमावश्यकमितिभावःसत्यपीतितत्रश्चकर्मभेदेऽनुपादेयसंबंधएवप्र

सोम० १११ योजकोनत्वसंनिधानमिति पूर्वोक्तमनुपादेयसंबंधस्य सहकारित्वमसन्निधिर्भेदकत्वं चायुक्तमित्याक्षिप्यत इति भावः तत
एव च संगतिर्बोध्या संन्निधाविति कर्मणास्सान्निध्येसति वुद्धौ विपरिवर्त्तमाने तस्मिन्नेव धातोर्वृत्तेरसन्निधिस्थल इव धातोस्वर
सतः कर्मान्तरत्वप्रतिपादकत्वाभावात् प्रत्यभिज्ञाबलादकर्मान्तरत्वमित्यर्थः ननूपादेयत्वे विधानावश्यंभावे निर्दिष्टस्यवि
धानानुपपत्त्या विधिसमभिव्याहारेण धात्तोः कर्मान्तरपरत्वमेव स्वरसतो वाच्यमिति कथं प्रत्यभिज्ञेत्याशंक्य उपादेयस्यवि
धेयत्वनियमो नास्तीत्याह निर्देशेति व्रीहीन्प्रोक्षतीति ये व्रीहय इति स्वप्राधान्येन व्रीहीन्निर्दिश्य तान् प्रोक्षेदिति तत्पर
तन्त्रतया प्रोक्षणं निर्दिश्यते तत्र व्रीहीणामनन्यनिष्ठतया स्वप्राधान्येन निर्देश्यत्वमेवोद्देश्यत्वं प्रोक्षणस्य चान्यनिष्ठ
तया पारतन्त्र्येण निर्देश्यत्वमुपादेयत्वमिति निर्देशगतस्वातन्त्र्यपारतन्त्र्ये एवोद्देशोपादाने इत्यर्थः प्राप्नोति प्राप्तबोधनमनुवा
दो प्राप्तबोधनं विधानमिति यावत् प्रत्यभिज्ञापत्त इति संन्निधिवशादिति भावः ननु कर्मणोनुवाद्यत्वाद्देशकालयोश्चोद्देश्यत्वा रांम०
त्कस्यापि विधियोगस्याभावाद्वाक्यस्य विधायकत्वमेव न स्यादित्यत आह तस्यापीति देशकालयोर्न फलेवत् प्राधान्येन प्रयोज १११

नभावेनोद्देश्यत्वं किंतु निर्देशगतस्वातंत्र्यमात्रं तत्तश्च दध्यादिवेदानयनोपादानादिक्रियाविष्टतयानुष्ठेयत्वाभावाभा
त्रेरा देशकालयोस्वतंत्रं निर्देशेपि फलवत्प्रयोजनतया निर्देशाभावेन विधिसंभावात्स प्रम्पाचतयोः शेषत्वप्रतीतेः कर्मा
र्थतयात द्विधिपरमेवेदं वाक्यमित्यर्थः निमित्तेतितेषां विधेयत्वे देशकालवत्कर्मांगत्वापत्तेरितिभावः तस्यैव फलाद्यर्थां पुनश्श्रु
तिरिमंश्योकांशंक्याकुर्वन्नेवसमाधत्ते सत्यमिति उत्पत्तिविधिभेदस्य कर्मभेदप्रयोजकत्वमुपपादयति कर्मस्वरूपेति निमि
त्तफलवाक्ययोरधिकारविधिः संस्कार्यवाक्ये विनियोगविधिरिति तत्रोत्पत्तिविधिलाभावान्नभेद इत्याशयेनाह संभवती
तितदेवोपपादयति कर्त्तव्यतेति फलविनियोग इति फलविधेरधिकारविधित्वेपि कर्मणाः फलशेषत्वसज्ञावाद्विनियोगो
क्तिरित्याहुः एवं निमित्तादिवाक्येष्वधिकारविनियोगविधिवद्देशकालवाक्ययोः कर्मणो विधिस्वीकारेपि प्रयोगविधिरेवापस्या
न्नतत्पत्तिविधिरितिनतत्रापिभेदप्रसक्तिः पर्ववाक्ये च देशकालयोः कर्मणोनुवादत्वोक्तिः कर्मस्वरूपाभिप्रायेतिनतद्विरोधः ए
कस्मिन्नपिवाक्ये एकस्यैवकर्मणो विध्यनुवादयोरुत्पत्तिप्रयोगरूपविषयभेदेनोपपत्तेः नन्वेवं मासमग्निहोत्रमित्यादावपि प्रयो

गविधिरेव नोत्पत्तिविधिरित्यसन्निधानस्थलेपि भेदो न स्यादिति चेत्सत्यमयमपि प्रयोगविधिरेव किंतु प्रयोगस्योत्पत्त्यपेक्षत्वा
त्संन्निहितोत्पभावे अयमेव विधिरुत्पत्तावपि व्याप्रियते यथाग्नेयवाक्ये द्रव्यदेवतासंबंधमात्रप्रतीतावपि तस्य यागवि
नानुपपत्तेर्यागापेक्षायां स एव विधिर्यागमपि विधत्ते तद्वत्र पौर्णमास्यां पौर्णमास्येत्यादौ तु संन्निहिताग्नेयादिवाक्यैरुत्पत्ते
र्लाभात्तत्तामेवानुमन्यते न तूत्पत्तावपि प्रयोगविधिर्व्याक्रियते यथा यद्वायवादिवाक्येषु श्रुतस्य द्रव्यदेवतासंबंधस्य या
गापेक्षायां सोमेन यजेतेति संनिहितयागलाभान्नैं द्रवायवादिवाक्यानि यागविधावपि व्याप्रियंते तद्वदिति वैषम्यं प्रयोजनं पौ
र्णमास्यादिवाक्येषु कर्मांतरविधौ कर्मांतरविधायकत्वे तस्मिन्कर्मरापव्यक्तासुनुसोमस्येति सौमिकधर्मप्राप्तेरनाघकामेन सो
महविष्को यागः कर्त्तव्यः सिद्धांते त्वाग्नेयादिहविष्कावेष्टिरेवेति वार्त्तिके व्यक्तं सूत्रे अविभागाद्धिपरिहृत्ते रित्यर्थः॥ ॥आग्नेय
स्तत्त्क हेतुत्वादभ्यासेन प्रतीयेत अच्युतः स्तान्नाप्यवत्कादाचित्को न भवतीत्यर्थः अविशेषाद्भेदमेवोपपादयति न हीति पौर्ण
मास्याधिक्यादिति उत्पत्तिशिष्टगुणावरोधात्केवलाभावास्याकालयुक्तवाक्योत्पन्नकर्मानुवादेन कालद्वयुक्तवाक्ये पौर्णमासी

सोम०
११२

कालविध्यनुपपत्तेः कालद्वयवाक्यमेव विधिरित्यवधारणान्नविपर्यय इत्यर्थः ननु प्रथमं पाठयुक्तं कस्यचिदवर्जनी
यमितिनतत्रो विशेषावधारणमित्यस्वरसादाह किंचेति केवलामावास्याकालयुक्तवाक्योत्पन्नकर्मणि कालद्वयमुक्तवा
क्येन पौर्णमासीलक्षणकालविधिमवलंब्यापि विशेषो नोच्यते येन तदुत्पत्तिशिष्टामावास्यावरुद्धे कर्मणि पौर्णमासविध्यनुपप
त्तेस्तत्रैव कर्मविधिनिर्णयः स्यात्किंतु कालभेदादाग्नेययागद्वयं प्रतीयते तत्र केवलामावास्यायुक्तवाक्योत्पन्नः अमावास्या
कालयुक्तः आग्नेयोऽनूद्यते पौर्णमासीकालयुक्ताग्नेययागान्तरं विधीयत इति कालद्वययुक्तवाक्ये आग्नेययागभेदमाश्रि
त्यात्रापि विशेषाग्रहणमुपपादयति किमुभयोरिति कर्मणा इति कालद्वययुक्तवाक्यविहितकर्मणः प्रत्यभिज्ञानात्तदेवैककालयुक्त
वाक्येन तु कर्मान्तरमित्यर्थः विधिपुनःश्रवणबलाद्विशेषाग्रहणाच्चाभ्यासन्यायादैन्द्र इत्युक्ते निरस्यति ऐंद्राग्नस्येति अमावा
स्यायां केवलाग्निदेवत्योऽपि प्रशस्तः किमुतेन्द्रसहिताग्निदेवत्य इत्येवमैन्द्राग्नप्रशंसार्थत्वात्पुनःश्रवणस्य विधिरेवात्र नास्तीति वि
धिपुनःश्रवणाभावादैन्द्राग्नविध्येकवाक्यतया तत्प्रशंसार्थं केवलामावास्यावाक्यमेवानुवाद इति विशेषाग्रहसद्भावाच्च नाभ्यास

सोम० ११३ न्यायाद्भेद इत्यर्थः कर्मणः प्रत्यभिज्ञानादित्यनेन सन्निधानात्कर्मान्तरत्वमिति पूर्वन्यायातिदेशात्संगतिरिति सूचितं सूत्रार्थस्तु
आग्नेयः अमावास्यायामावर्त्तनीयः अभ्यासस्य कर्मभेदकत्वस्योक्तत्वेनामावास्यायामाग्नेयद्वयावगमादिति भेदेन प्रतीये
तेति वाच्येसं प्रतिपन्नदेवताकत्वाद्यागभेदेपि तंत्रेणानुष्ठानादनुष्ठानभेदो नास्तीति शंकानिराकर्त्तुं यागद्वयस्य तंत्रानुष्ठानेपि
पुरोडाशद्वयं कर्त्तव्यमिति प्रयोजनप्रदर्शनार्थमभ्यासेन प्रतीयेतेत्युक्तं॥ ॥इति श्रीनिद्दलकुलतिलकस्सूरुभट्टमहोपाध्याय
113 नन्नभवस्य वैकटाद्रीयज्वगुरुचरणानुजस्य सोमनाथस्य सर्वतोमुखयाजिनः कृतौ शास्त्रदीपिकाव्याख्यायां मयूखमालिकाख्या
यां द्वितीयस्याध्यायस्य तृतीयः पादः॥ ॥यावज्जीविकोभ्यासः कर्मधर्मः प्रकरणात् यावज्जीवं भवो यावज्जीविकः सकिंक
र्मार्थ उत पुरुषार्थः तदर्थं च किमयं अभ्यासात्मकः नियमात्मक इति संशयद्वयं सकलय्याह किमिति पूर्वपक्षे यावज्जीवकाल
स्य कर्मांगत्वेनाप्राप्तेस्तस्यावश्यविधेयत्वात्तद्विधानार्थं प्राप्तोभ्यासोनुवाद्य एवं न विधेयस्तथासिद्धांतेपि नियमवाचकशब्दाभावा सोम०
न्न नियमो विधेयः किंतु दर्शपूर्णमासादिकर्मैव जीवनेन निमित्ते विधेयं कर्मणश्च नैमित्तिकत्वेन निमित्ते सति नैमित्तिकावश्यंभावादवश्या ११३

नुष्ठेयत्वात्मकनियमोप्यर्थादेवसिध्यतीतितथाचकिमत्रदर्शपूर्णमासादिकर्मार्थंतयायावज्जीवकालोविधीयते उत जीव
नेनिमित्ते दर्शपूर्णमासादिकर्मविधीयतइतिसंशयनिष्कर्षोबोध्यः ननुक्रतुपुरुषशेषत्वचिंतातस्तीयेसंगतत्तानात्रेत्यतआ
हपूर्वपक्षइति प्रयोगांतरमितियद्यपियथापूर्वपक्षेयावज्जीवकालाभ्यासविशिष्टएकः प्रयोगः नतथासिद्धांतेएकः प्रयो
गःकिंतुकालेविधिबलात्पौर्णमास्यादिकालविशिष्टजीवनस्यनिमित्तत्वपर्यवसानात्प्रतिनिमित्तंकर्मणः प्रयोगपरिसमाप्तेर्भि
न्नभिन्नएवप्रयोगः तथापिप्रयोगांतरमितिसामान्याभिप्रायेणैकवचननिर्देशः प्रयोगभेदेतिअनेनास्मिन्पादेप्रयोगभेदः
प्राधान्येनप्रतिपाद्यतइतिपादांतरत्वंपूर्वपादेकर्मभेदसहायत्वेनोक्तानुपदेयसमभिव्याहारेणप्रयोगभेदव्युत्पादनात्दानंत
र्यंचेतिसूचितंननुसिद्धांतेपिप्रकृतकर्मणएवनिमित्तेविधानात्दस्तिप्रकरणानुग्रहइतिशंकांनिराकर्तुंकथंभावसंबंधादित्युक्तं
ततश्चप्रकरणशब्दोनाधिकारपरः इतिभावः लक्षणेतिअव्ययकृतोभावेभवंतीतिणमुलंतस्यजीवनक्रियावीचिनः कालेल
क्षणास्यादित्यर्थः यदिजिनाचेतिएकस्याःयागक्रियायायावज्जीवकालासंबंधाद्यजिनायम्यासोलक्षणीयइत्यर्थः ननुक्रियाभ्य

सोम०
११५

११५

तिरिक्तस्यकालस्याभावाज्जीवनक्रियायाएवकालरूपत्वान्नलक्षणेत्यतआहत्वन्यक्षइतिक्रियायाःकालत्वाभ्युपगमेपिनि
यतपरिमाणानिमेषादिक्रियायाएवकालत्वान्नजीवनक्रियाकालइतिप्रकृतेकाललक्षणावश्यंभावःननुयथापौर्णमास्यां
पौर्णमास्यायजेतेतिचोदितकालैकदेशेसकृदनुष्ठानेनापिशास्त्रार्थसिद्धिस्तथायावज्जीवकालैकदेशेसकृदनुष्ठानेनापि
शास्त्रार्थसिद्धिसंभवात्किमित्यभ्यासलक्षणेत्यतआहयजिनाचेतितत्रापौर्णमासीव्यावृत्त्यर्थाचोदनेतियुक्तासकृदनुष्ठानेपि
शास्त्रार्थसिद्धिःइहतुअजीवनकालव्यावृत्त्यर्थानचोदनातदाकर्मणोअशक्यत्वादेवाप्रसक्तेःसमस्तकालग्रहणार्थैवचोदनेत्य
भ्यासलक्षणाप्यवर्जनीयेत्यर्थःजीवनेनिमित्तइतिधातुसंबंधाधिकारविहितणमुलन्तप्रत्ययेनजीवनस्ययागस्यचसंबंधःप्रतीयते
सचसंबंधोव्याप्तिरूपोवाच्यस्संबंधमात्रस्यपूर्वोक्तप्रकारेणावर्जनीयत्वतयातत्प्रतिपादनानर्थक्यात्व्याप्तिश्चयदायदाजीवनंत
दातदायागइत्येवंरूपाजीवनस्यनिमित्तत्वएवसंभवतिनान्यथेतिसंबंधसामान्यवाचिनाप्रत्ययेननिमित्तत्वंलक्ष्यतइत्याशयःए
वंचजीवनेनिमित्तेयागंकुर्यादित्युक्तेनिमित्तस्यनैमित्तिकव्याप्तेर्यावच्छब्दोनुवादइत्यभिप्रायेणजीवनमात्रमेवनिमित्तत्वेनोपन्यस्तंप्र रांम० ११५

त्यवायेतिपापक्षयापेत्यर्थः सर्वशक्त्यधिकरणे तु पूर्वीकां तंत्ररत्नयोर्नित्यकर्मणः विहिताकरणजन्यप्रत्यवायप्राग
भावपरिपालनार्थत्वं निरस्य विधिबलात्पापक्षयरूपफलं कल्प्यत इति व्यवस्थापितत्वात् न्यायसुधाकृतस्तु नित्यक
र्मणः पापक्षयो न फलं किंतु विहिताकरणजन्यप्रत्यवायप्रागभावपरिपालनमेव फलमित्याहुः नन्वेवं नियमः पुरुषार्थो
विधीयत इति कथमुच्यत इत्यत आह जीवनं चेति जीवननैमित्तिके कर्मणः पापक्षयार्थतया विधौ नियमोप्यर्थ
सिद्ध इत्यभिप्रायात्तदुक्तिरिति भावः प्रयोजनं पूर्वपक्षे दर्शपूर्णमासयोः फलकामनावत एव प्रयोगः सोपि या
वज्जीवमभ्यस्त एव कामायकं कल्पते सिद्धांते तु कामनारहितस्यापि काम्यस्तु सकृत्कृत एव फलाय कल्प्यत इति सू
त्रार्थस्तु यावज्जीवकोभ्यासस्तन्न कर्मार्थ प्रकरणादिति ॥ ॥नामरूपधर्मविशेषः॥ ॥सर्वप्रमाणानिबं
धनमेदापचादाम्नसर्वान्तेनिवेशोस्येत्याहुः शाखान्तरे स्थिति अनेकशाखाश्रुतमग्निहोत्रादिकं प्रतिशाखमभिधत्त इत्यर्थः तथेति
यद्यविशेषेणाश्रवणात्तदाभ्यासाद्भेदः यदि च विशेषेणात दागुणादिति तात्पर्यं अत्र काठकं कान्नापमित्यादि संज्ञापाठ्यत्तिसंयो

गाभावेन कर्मभेदकत्वासंभवात् अपर्यायधातुप्रयोगाभावेन शब्दांतराभावात्संख्यायास्वातंत्र्येण कर्मोत्पवगमकत्वाभा
वाच्च अभ्यासप्रकरणांतरगुणाख्यानिमित्तानपेक्षो यन्यत्रानिमित्ते च नामाद्युक्तिरभ्युच्चयमात्रार्थेति ध्येयं कर्मयत्तामात्रेक
र्मोत्पत्तिगोचरतामात्रमित्यर्थः विहितस्यापीति अधीयत इत्यध्यायः स्वस्याध्यायः स्वाध्यायः स्वत्वं च पितृपिता
महादिपरंपरागतत्वं तत्र स्वस्याध्यायोध्येतव्य इति स्वकीयशाखाध्ययनमात्रमेव विधीयते स्वाध्यायस्याध्ययनं सं
स्कार्यस्यापि अर्थज्ञानं प्रत्युपादेयत्वेन तत्र स्वत्वस्य एकत्वस्य च विवक्षितत्वादेवं च एकैकस्य पुरुषस्य एकैकशाखाध्या
पित्वात् तत्तच्छाखागतविधीनां तत्तदध्यायिपुरुषान् प्रत्यप्रज्ञातज्ञापकत्वेनार्थवत्त्वादेकस्यैव पुनःश्रुतिरविशेषादनर्थकं
हि स्यादिति न्यायाप्रवृत्त्या न भेद इत्यर्थः न चैवं वेदांतराध्ययनमपि न स्यादिति वाच्यं वेदानधीत्येत्यादिशास्त्रेण वेदद्वयसमुच्च
यावगमादिति भावः न बलमिति जितनस्य विकल्प इति भावः अनेनैव विरुद्धानां विकल्पो अविरुद्धानां तु भिन्नशाखागतानामपि
समुच्चय इति प्रयोजनमपि सूचितं सत्रार्थस्तु काटकमित्यादिसंतया अष्टाकपालद्वादशकपालादिना रूपेण कारीर्यां घध्यम

शा॰दी॰सो॰ ११५

116

नेपुम्भोजनादिधर्मविशेषेण पुरुषन्तथा उदितानुदितहोमनिर्णयाय कस्मिन्कर्मणि सर्वशाखागतानामंगानामनु
ष्ठानाशक्त्या अग्निचयनादेः शाखाभेदात्समाप्तिभेदेन उदितानुदितहोमयोः स्वस्वकालातिक्रमे प्रायश्चित्तविधानेन
दृष्टयज्ञानामनिष्टयज्ञानांच द्वादशाहे दर्शनादिरूपान्मार्गदर्शनेन च शाखांतरे कर्मभेदः स्यादिति॥ ॥इतिश्रीनिट
लकुलतिलकस्य रुमद्दमहोपाध्यायतनूभवस्य वेंकटाद्रियज्वाज्विगुरुचरणानुजस्य सोमनाथस्य सर्वतोमुखयाजिनः कृ
तौ शास्त्रदीपिकाव्याख्यायां मयूखमालिकाख्यायां द्वितीयस्याध्यायस्य चतुर्थपादः॥ अध्यायश्च संपूर्णः॥ ॥ ॥
यथामतिसमालोच्य पुस्तकं शोधितं मयाऽदेवेनपियतां रामः सीतापतिरधोक्षजः॥ ॥संवत् १८५[illegible] रामरामराम

राम॰
११५

१९

मीमांसा शास्त्रदीपिका टीका सोमनाथी

సోంవునాథి ३००

४२८५